
न्यायविशारद-न्यायाचार्य-महोपाध्याय-

श्रीयशोविजयगणि-प्रणीतम्

शासनसम्राट्-श्रीविजयनेमिसूरि-विहितवृत्तिविभूषितम्

# अध्यात्मोपनिषत्प्रकरणम्-सवृत्ति



शासनसम्राट्-शताब्दीग्रन्थमाला-पुष्पम् .६

# अध्यात्मोपनिषत्प्रकरणम्-सवृत्ति

प्रणेता
न्यायविशारद-न्यायाचार्य-महोपाध्याय-
**श्रीयशोविजयगणिः**

वृत्तिकर्ता
शासनसम्राट्-श्रीविजय**नेमिसूरीश्वरः**

सम्पादनम्
श्रीविजय**शीलचन्द्रसूरि**-शिष्यः
मुनिश्री-**त्रैलोक्यमण्डन**विजयः

प्रकाशनम्
**श्रीजैनग्रन्थप्रकाशनसमितिः, खम्भात**

वि.सं. २०७१ ई.स. २०१५

अध्यात्मोपनिषत्प्रकरणम्-सवृत्ति

कर्ता : महोपाध्याय-श्रीयशोविजयगणिः

वृत्तिकर्ता : शासनसम्राट्-श्रीविजयनेमिसूरीश्वरः

मार्गदर्शनम् : श्रीविजयशीलचन्द्रसूरिः

सम्पादनम् : मुनिश्री-त्रैलोक्यमण्डनविजयः

प्रकाशनम् : श्रीजैनग्रन्थप्रकाशनसमितिः, खम्भात

आवृत्तिः : प्रथमा, वि.सं. २०७१, ई.स. २०१५

प्रतयः : २५०

पत्राणि : १६ + ७९ + २१ = ११६

मूल्यम् : ₹ १६०/-

विषयः : अध्यात्मम्

प्राप्तिस्थानम्: (१) **सरस्वती पुस्तक भण्डार**
११२, हाथीखाना, रतनपोळ, अहमदाबाद - ३८० ००१
फोन : ०७९-२५३५६६९२

(२) **श्रीविजयनेमिसूरि स्वाध्यायमन्दिर**
१२, भगतबाग सोसायटी, नवा शारदामन्दिर रोड,
पालडी, अहमदाबाद - ३८० ००७
फोन : ०७९-२६६२२४६५ / ०९४०८६३७७१४

आवरणचित्रम् : नैनेश सरैया - सूरत

मुद्रणम् : किरीट ग्राफिक्स : ०७९-२५३३००९५

**आर्थिक-सहयोगः**

એક સદ્ગૃહસ્થ

અલકાપુરી - વડોદરા.

# અધ્યાત્મોપનિષત્ : ઉપાધ્યાયજીનું આર્ષ દર્શન

ઉપાધ્યાય શ્રીયશોવિજયજી મહારાજ, તેમણે રચેલા અદ્‌ભુત ગ્રંથો થકી જગપ્રસિદ્ધ છે. એમના ગ્રંથો એ એમના ક્ષયોપશમનો, એમના સ્વાધ્યાયનો, એમની તાત્પર્યગ્રાહી દૃષ્ટિનો અને એમના અનુભવજ્ઞાનનો પરિપાક છે.

શાસ્ત્રોના શબ્દોને એમણે જે કુશળતાથી ખોલ્યા છે; શબ્દોના અંતસ્તલમાં પ્રવેશીને તેના મર્મ જે રીતે પકડ્યા છે, તે અનન્ય છે. મર્મોદ્‌ઘાટનની આવી ક્ષમતા બીજા કોઈને વરી હોય તેવું જાણ્યું નથી. ઓછામાં ઓછા શબ્દોમાં, વધુ ને વધુ તાત્પર્ય પકડવાનું અને પમાડવાનું તેમનું સામર્થ્ય, તેમને તેમના સમકાલીન શાસ્ત્રકારોમાં અગ્રસ્થાને બેસાડી આપે તેવું છે; તો તેમના પછીની સૈકાઓ પર્યંત ચાલનારી પરંપરામાં તે, તેમને એક અને અદ્વિતીય પુરવાર કરી આપે છે.

તેમના જ્ઞાનપૂત જીવનને ત્રણ તબક્કામાં જોઈ શકાય : ૧. જ્ઞાનાર્જન; ૨. શાસ્ત્રસર્જન; ૩. અનુભવના ગર્ભગૃહમાં પ્રવેશ અને પ્રતિષ્ઠા.

જ્ઞાનસાર, અધ્યાત્મસાર, અધ્યાત્મોપનિષત્, શ્રીપાલ-રાસનો ઉત્તરાર્ધ - આ અને આવા અન્ય ગ્રંથો, ઉપાધ્યાયજીની અનુભવ-સાધનાના ફળરૂપે નીપજી આવેલા ગ્રંથો છે. તર્ક - અકાટ્ય અને હૃદયસોંસરવા ઊતરી જાય તેવા તર્ક એ એમનું અમોઘ અને આકરૂં શસ્ત્ર હોવા છતાં, આ બધાં સર્જનોમાં તે તર્ક અત્યંત સહજ, સૌમ્ય અને હૃદયંગમ આકાર લઈને અવતર્યો છે. આ તર્ક સ્પર્શે છે, પણ વાગતો નથી. અનુભવની સાધનાનું આથી મોટું કે વધુ પ્રમાણ કયું હોય ?

અનુભવજ્ઞાનના યોગે તેમની ભાષા વધુ પ્રાંજલ બની છે, વધુ પ્રસાદ-મધુર બની છે. કઠિન વાતને પણ એકદમ સરળ-સુગમ શૈલીમાં અને ઓછામાં ઓછા શબ્દોમાં તેઓ મૂકી આપે છે. તેમની અભિવ્યક્તિનું માધ્યમ બનેલા છંદો તો અનેકાનેક છે, પરંતુ અનુષ્ટુપ્ છંદ એ જાણે કે તેમને વર્યો છે ! ફળ્યો છે ! સિદ્ધ થયો જણાય છે ! અહીં જેનાં નામ નોંધ્યાં છે તે ત્રણે ગ્રંથો જુઓ; તેમાં મોટા ભાગે અનુષ્ટુપ્‌નો જ ઉપયોગ તેમણે કર્યો છે. ૩૨ અક્ષરના આ છંદમાં તેઓ શાસ્ત્રોના ગહન અને કઠિન પદાર્થોને કેટલા બધા લાઘવ સાથે અને પાછા એક ધડાકે જ હૃદયમાં ઊતરી જાય તેવી રીતે રજૂ કરે છે ! તો તેમણે આપેલી વિવિધ તત્ત્વોની વ્યાખ્યાઓ કેટલી સુસ્પષ્ટ હોય છે ! એમ લાગે કે આ વ્યાખ્યા જ આખરી વ્યાખ્યા છે, યથાર્થ વ્યાખ્યા છે; આનાથી વધુ સારી વ્યાખ્યા કોઈ આપી ન શકે; કે આ વ્યાખ્યામાં કોઈ સુધારો કે ફેરફાર દાખવી ન શકે. એકબે ઉદાહરણો જોઈએ :

गतमोहाधिकाराणा–मात्मानमधिकृत्य या ।
प्रवर्तते क्रिया शुद्धा, तदध्यात्मं जगुर्जिनाः ॥

'અધ્યાત્મ' ની કેવી તાત્ત્વિક વ્યાખ્યા ! જિનમાર્ગના 'અધ્યાત્મ'નું કેટલું લાઘવભરેલું અને છતાં પરિપૂર્ણ લક્ષણ !

વૈરાગ્યની વ્યાખ્યા જુઓ :

''तदिच्छोच्छेदरूपं वैराग्यं'' અર્થાત્ ''भवेच्छोच्छेदरूपं'' - સંસારની ઇચ્છાઓનો ઉચ્છેદ તે વૈરાગ્ય !

'વૈરાગ્ય'નો અર્થ કે મર્મ સમજાવવા માટેના આ લક્ષણમાં કશું પણ ઉમેરવા જેવું રહે છે ખરું ?

એક ઠેકાણે તેમણે 'मार्ग' ની વ્યાખ્યા આ પ્રમાણે આપી :

''मार्गश्चेतसोऽवक्रगमनम्'' ચિત્તની અકુટિલ ગતિ/અવસ્થા તે માર્ગ ! ઉપાધ્યાયજી સિવાય આવી અદ્ભુત અને પરિપૂર્ણ વ્યાખ્યાઓ કોણ આપી શકે ભલા ?

❋

જ્ઞાનસાર, અધ્યાત્મસાર અને અધ્યાત્મોપનિષત્ - આ ત્રણ ગ્રંથો, એમનાં નામ પ્રમાણે પરમાત્માના માર્ગના સમગ્ર જ્ઞાનમાર્ગનો અને અધ્યાત્મતત્ત્વનો અર્ક પોતાના પેટમાં સમાવીને બેઠેલા ગ્રંથો છે. 'સાર' અને 'ઉપનિષત્' એ બે શબ્દો કેટલા મૂલ્યવાન અને વજનદાર છે, તેનો અંદાજ આ ગ્રંથોના અવગાહન વિના મળવો અશક્ય છે.

૮-૮ અનુષ્ટુપ્‌ના બનેલાં ૩૨ અષ્ટકોમાં, ૩૨ પ્રકરણોમાં, વિવિધ ૩૨ ગંભીર અને તાત્ત્વિક વિષયોનો અર્ક ભરી દેવો, એ ઉપાધ્યાયજી સિવાય કોઈને માટે શક્ય નથી, એમ કહીએ તો તેમાં અત્યુક્તિ ન થાય.

તો ૨૦ અધિકારોમાં અધ્યાત્મ, વૈરાગ્ય, દંભ, ભવસ્વરૂપ, મમતા, સમતા, સમ્યક્ત્વ, સદનુષ્ઠાન, આત્મનિશ્ચય, મનશુદ્ધિ જેવા ગહન વિષયોની તલસ્પર્શી, શાસ્ત્રાનુસારી અને આગમાદિ શાસ્ત્રોનાં વચનોના પરમ ઐદંપર્યને પ્રગટ કરતી વિચારણા તથા પ્રસ્તુતિ, એ ઉપાધ્યાયજીના જ ગજાનું કામ ! બીજાને આ વિષયો ન સૂઝે, એના આવા ક્રમ પણ ન સમજાય, અને આવા ઐદંપર્ય સુધી બીજાની પહોંચ પણ ન સંભવે ! અને તેથી જ, આ બન્ને ગ્રંથો સાથે 'સાર' શબ્દનું સંયોજન, તેઓ સાર્થક રીતે જ નહિ, પણ પૂરા અધિકારપૂર્વક કરી શક્યા છે.

'અધ્યાત્મોપનિષત્'માં 'ઉપનિષત્' શબ્દ જોડ્યો છે. 'ઉપનિષત્' એ 'સાર' કરતાં આગળનો શબ્દ છે. 'ઉપનિષત્' દ્વારા જે તત્ત્વ અથવા રહસ્ય લાધે, તે પરાકાષ્ઠાનું જ હોય; અને તે અન્યત્રથી, ક્યાંયથી, કોઈ રીતે લાધતું નથી હોતું. આ અર્થમાં વિચારીએ તો, ઉપરના બન્ને ગ્રંથો કરતાં 'અધ્યાત્મોપનિષત્' ગ્રંથ વધુ આગળ છે, વધુ ગંભીર-ગહન છે, અને તત્ત્વને વધુ ઊંડાણથી એ ઘૂંટે છે. અલબત્ત, ત્રણેય ગ્રંથોના વિષય અલાયદા છે, તો પણ ત્રણે વચ્ચે એક અદશ્ય કે અગમ્ય તંતુ છે જ, જે ત્રણેને એક નિશ્ચિત ક્રમ આપે છે, અને પાછા ચડતા ક્રમે ગોઠવી આપે છે. ત્રણેયનું એક સાથે, ક્રમશઃ અધ્યયન કરવામાં આવે તો તે ત્રણે ગ્રંથો વચ્ચેનું અનુસન્ધાન અને ત્રણે દ્વારા થતો ક્રમિક તાત્ત્વિક/આધ્યાત્મિક વિકાસ - અવશ્ય સમજાય, અનુભવી શકાય.

'ઉપનિષત્' શબ્દ આવે એટલે સહેજે વેદ અને પુરાણ સાથે જોડાયેલા ઉપનિષદો યાદ આવી જાય. બૃહદારણ્યક, શ્વેતાશ્વતર, ઈશાવાસ્ય, કેટલા બધા ઉપનિષદો ! કેવું અદ્ભુત ભર્યું છે એમાં તત્ત્વજ્ઞાન ! કેટકેટલા ઋષિશ્રેષ્ઠોએ પોતાના તપોબળ દ્વારા જે મંત્રોનાં દર્શન કર્યાં હશે, તે મંત્રોનો, તે દર્શનનો શબ્દદેહ એટલે આ ઉપનિષદો ! આવાં આર્ષ દર્શન વગર જે ગ્રંથો લખાયા તે ગમે તેટલા પાંડિત્યપૂર્ણ હોય તોય તેને ઉપનિષદનો દરજ્જો નથી મળ્યો. ન જ મળે. ઉપનિષદનો એક માત્ર અનુબંધ આર્ષ દર્શન સાથે છે. એવાં દર્શન થકી જે શબ્દો લાધ્યા તે મંત્ર ગણાયા, અને જે વાક્યો લાધ્યાં તે મહાવાક્ય કહેવાયાં. એ શબ્દોમાં અને વાક્યોમાં વૈરાગ્યનો, તત્ત્વજ્ઞાનનો, અધ્યાત્મનો અને ભારતીય સંસ્કૃતિનો અક્ષય ઝરો નિરંતર વહી રહ્યો છે.

ઉપાધ્યાયજી મહારાજે પ્રસ્તુત ગ્રંથને ઉપનિષત્ શબ્દથી ઓળખાવ્યો છે ત્યારે સહેજે સમજાય છે કે આ ગ્રંથ, તેમના દ્વારા થયેલું સર્જન નથી, પણ તેમને લાધેલું આર્ષ દર્શન છે. યશોવિજયજી એક એવા પુરુષ છે કે એક શબ્દ પણ વણજોઈતો, બિનઉપયોગી, અનુચિત રીતે કદી પણ ન પ્રયોજે. શબ્દ એ તેમને મન કામધેનુ અને કલ્પતરુ છે. મંત્રરૂપ અને બ્રહ્મસ્વરૂપ છે. તેનો અયોગ્ય ઉપયોગ તેમને કદી ન પાલવે.

અને તેમણે ઠેર ઠેર વેરેલા સંકેતો તો જુઓ ! "अकस्मादस्माकं परिकलिततत्त्वोपनिषदां", "अनुभव एवाऽत्र साक्षी नः", "ब्रह्मविदां वचसापि, ब्रह्मविलासाननुभवामः", "दर्शनपक्षोऽयमस्माकम्", ઈત્યાદિ. આ સંકેતો अध्यात्मसारમાં વેરાયેલા ભલે હોય, પરંતુ તેનો તંતુ તો, અગાઉ સૂચવ્યું છે તેમ એક તરફ ज्ञानसार સુધી, તો બીજી તરફ આ अध्यात्मोपनिषत् સુધી સંધાયેલો જ છે.

જૈન પરંપરામાં ઉપનિષત્સંજ્ઞા ધરાવતી ગ્રંથ-રચનાઓ લગભગ નથી. નિગમમતના આચાર્યોએ રચેલાં નિગમશાસ્ત્રો જો કે ઉપનિષદના નામે ઓળખાય છે ખરાં. પરંતુ આગમ-પરંપરામાં તે નિગમોનો ઝાઝો આદર થયો જણાતો નથી, અને તેથી તેમનો પ્રચાર પણ નથી. એ સંજોગોમાં આવા મહાપુરુષની આવી રચના એક અજોડ અને મહત્ત્વપૂર્ણ રચના બની રહે છે.

જો કે તાજેતરમાં આપણે ત્યાં જથ્થાબંધ પ્રકરણો અથવા સંયોજનાત્મક ગ્રંથો છપાઈ ચૂક્યાં છે, જેને 'ઉપનિષત્' એવું નામ તેમના સંયોજકે-સંપાદકે આપેલ છે.

પોતાની સામાન્ય અને આધુનિક રચનાઓને તથા સંકલનોને 'ઉપનિષત્' જેવું ગંભીર નામ આપી દેવું, એ વાસ્તવમાં તો એક અપરાધ જ બની રહે. આ પ્રકારના શબ્દનો આવો યથેચ્છ તેમજ અનુચિત ઉપયોગ, એ શબ્દને છીછરો બનાવી મૂકે છે, અને તેના મૂળ પદાર્થ પ્રત્યે વિદ્વાનોના ચિત્તમાં વિચિત્ર વિકલ્પો પ્રેરે છે. ના, શબ્દ-પ્રયોગની છૂટનો આવો દુરુપયોગ ન થવો જોઈએ. આપણે ત્યાં એક મહત્ત્વપૂર્ણ સૂત્ર આવે છે : "एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति ।" આ સૂત્રને શબ્દસેવીઓએ હમેશાં યાદ રાખવું જોઈએ.

❋

અધ્યાત્મોપનિષત્‌ને ઉપાધ્યાયજીએ ૪ અધિકારોમાં વહેંચ્યો છે, તે ચાર અધિકારોનાં નામ પણ બહુ માર્મિક છે. શાસ્ત્રયોગશુદ્ધિ, જ્ઞાનયોગશુદ્ધિ, ક્રિયાયોગશુદ્ધિ અને સામ્યયોગશુદ્ધિ - એવા નામના એ ચાર અધિકારો છે. અહીં તેઓ 'શાસ્ત્રશુદ્ધિ', 'જ્ઞાનશુદ્ધિ', 'ક્રિયાશુદ્ધિ' તથા 'સામ્યશુદ્ધિ' એવાં નામો રાખી શક્યા હોત. પરંતુ તેમણે તેમ નથી કર્યું. તેમણે આ ચારે પદાર્થોને 'યોગ' ગણાવ્યા અને તે ચારે યોગોની શુદ્ધિનું તેમણે તે તે અધિકારમાં નિરૂપણ કર્યું.

શાસ્ત્ર એ ફક્ત ગોખી કે વાંચી જવાની બાબત નથી, તે તો 'યોગ' છે. અને આ વાતને હરિભદ્રસૂરિ મહારાજનું સમર્થન પણ મળે છે. યોગદષ્ટિસમુચ્ચયમાં તેમણે ઇચ્છાયોગ અને સામર્થ્યયોગને જોડતા સેતુને શાસ્ત્રયોગ તરીકે ઓળખાવ્યો જ છે. અને શાસ્ત્ર જ્યારે યોગ બને, અર્થાત્ ધર્મનો યોગ-વ્યાપાર શાસ્ત્ર-આધારિત બને, ત્યારે તેની શુદ્ધિ થવી જ જોઈએ; તે શી રીતે સંભવે ? તેનું બયાન એટલે આ અધિકાર. આ પ્રથમ અધિકારને આ દૃષ્ટિથી વાંચવામાં - વાગોળવામાં આવે તો કાંઈક જુદું જ તત્ત્વ લાધે.

એ જ રીતે જ્ઞાનને અને ક્રિયાને પણ તેમણે 'યોગ' લેખે જ સ્વીકાર્યાં છે. અધ્યાત્મના માર્ગમાં કોરા જ્ઞાનની કે જડ ક્રિયાની ઝાઝી કિંમત નથી હોતી. વળી તેવાં જ્ઞાન અને ક્રિયા લગભગ પરસ્પર-નિરપેક્ષ અને તેથી વ્યર્થ-વિફળ જ હોય. પણ તે બન્ને 'યોગ' ત્યારે જ બને કે જ્યારે બન્ને પરસ્પર-સાપેક્ષ હોય, એકમેકના પૂરક હોય. અને તે બન્નેનું પરસ્પર-સાપેક્ષ હોવું તે જ તત્ત્વતઃ અધ્યાત્મમાર્ગ છે. આવો મર્મ આપણે તારવીએ તો તેમાં કાંઈ અજુગતું નથી થતું.

છેલ્લે આવે સામ્યયોગશુદ્ધિ. 'યોગબિન્દુ'ને આધારે 'સામ્ય-સમતા' તે એક સ્વતંત્ર યોગ તો છે જ. તે યોગની શુદ્ધિની વાત અથવા પ્રક્રિયા આ અધિકારમાં દર્શાવી છે. 'સમત્વ'ની સાધના જ સાધનાનું આરંભબિન્દુ છે, અને તે જ સાધનાનું શિખર પણ છે, એવો એક અંદાજ છે, અને તે અંદાજમાં જ આ અધિકાર રચાયો હોય એવી કલ્પના કરવી ગમે.

❀

ઉપાધ્યાયજીના આ ત્રણ અધ્યાત્મપરક ગ્રંથો ઉપર, જો પૂર્વના મહર્ષિઓની પદ્ધતિએ વિવરણ/ટીકા લખવામાં આવે, તો પ્રત્યેક ગ્રંથ પર હજારો શ્લોક પ્રમાણ તાત્ત્વિક અને શાસ્ત્રીય વિવરણ થઈ શકે તેમ છે, નિઃશંક. પરંતુ તે માટેની ક્ષમતા અને સજ્જતા, ખાસ કરીને અનુભૂતિના ઘરની સજ્જતા આપણે ત્યાં રહી નથી. છીછરી બાબતોને 'પ્રાણપ્રશ્નો' બનાવીને રાચનારા આપણે, શાસ્ત્રોના નામે સતત લડતા-ઝઘડતા રહીને પોતાનું કાર્ય સાધનારા આપણે, કેવી અદ્ભુત ભૂમિકા ગુમાવી બેઠા છીએ, તેનું હવે જ્ઞાન કે ભાન પણ, કદાચ, આપણને નથી રહ્યું.

આ ગ્રંથો ઉપર કોઈ કોઈ વિવરણ થયેલાં મળે છે અવશ્ય, પરંતુ તે બધાં સ્થૂલ શબ્દાર્થ-વિવેચનથી આગળ જતાં નથી. ગ્રંથના શબ્દના અને ગ્રંથકારના હાર્દ સુધી પહોંચવાની તો તે બધાં પાસે કોઈ ગુંજાઈશ જ નથી. અલબત્ત, તે તે ગ્રંથનો સ્વાધ્યાય કરવા માટે તે જરૂર ઉપયોગી ગણાય. કોઈ કોઈ વિવરણમાં ગ્રંથકારના આશયને જુદી રીતે સમજીને, જે અર્થ ન હોય તેવો અર્થ

પણ, ક્યારેક, તારવવામાં આવેલો જોવા મળે છે. ક્ષયોપશમની મર્યાદા જ તેમાં કારણ હશે. આમ છતાં, તેમણે ગ્રંથનો સ્વાધ્યાય કરવા-કરાવવાનો ઉદ્યમ શુદ્ધ બુદ્ધિએ કર્યો તે માટે તેમને વંદન જ કરીશું. કોઈકે વળી પોતાના વિવરણમાં, પ્રસ્તુત કે અપ્રસ્તુત અને જરૂરી કે બિનજરૂરી, પણ જે - જ્યાંથી જડ્યાં તેવાં અવતરણો જ ઠાલવી દીધાં છે ! શબ્દનું કે કોઈ વાર વિષયનું સામ્ય અન્યત્ર જોવા મળે એટલે ત્યાંથી તે વાક્ય, પંક્તિ, પદ્ય ઉઠાવીને વિવરણમાં ગોઠવી દેવાય ! ભલે પછી તેનો મૂળ રચના સાથે સંદર્ભ કે સંબંધ ન મળતો હોય ! વિવરણનું કદ વધારવાનો આનાથી વધુ સારો ને સહેલો રસ્તો બીજો કયો હોઈ શકે ?

પ્રસ્તુત વિવરણ, ઘણી બધી રીતે, એ બધાં વિવરણો કરતાં જુદું પડે છે. ઉપાધ્યાયજી મહારાજની ખ્યાતિ ન્યાયવિશારદ તરીકેની છે. અને તેમના ગ્રંથોમાં તર્ક અને ન્યાયની વાતો, યુક્તિઓનું હમેશાં પ્રાધાન્ય તથા પ્રાચુર્ય હોય છે; તેથી આ વિવરણ તર્કશાસ્ત્રના દૃષ્ટિકોણથી જ મહદંશે લખાયું છે. પરંતુ તેમ કરવામાં પણ શ્લોકોના અર્થનું સંકલન કે સંગતિ કરવાનું કામ ટીકાકારે સુપેરે કરી બતાવ્યું છે તે અભ્યાસુ જનો અવશ્ય જોઈ શકશે.

વિજયનેમિસૂરિજી મહારાજે વીસમી સદીમાં જૈન મુનિઓમાં પ્રાચીન અને નવીન ન્યાયના ગ્રંથોના અધ્યયનની પ્રથાનો આરંભ કરાવેલો. પોતે ન્યાય ભણ્યા, પોતાના તમામ શિષ્યોને ન્યાય ભણાવ્યો; સાથે સાથે શ્રીહરિભદ્રસૂરિ, હેમચન્દ્રાચાર્ય અને યશોવિજયજીના ન્યાય-વ્યાકરણના અનેક ગ્રંથોનું અધ્યયન-સંપાદન-પ્રકાશન પણ તેમણે તથા તેમના શિષ્યપરિવારે કર્યું. વીસમી સદીમાં આપણે ત્યાં ઠોસ, પદ્ધતિસરના શાસ્ત્રાભ્યાસનો પાયો, આમ, નેમિસૂરિ મહારાજે નાખી આપ્યો.

તેમણે ઘણા ગ્રંથો રચ્યા, ટીકાગ્રંથો સર્જ્યા. તેમના શિષ્યોમાં પણ એ પ્રવૃત્તિ ચાલુ રહી. તેમણે રચેલ વિવિધ ટીકાગ્રંથો પૈકી એક ગ્રંથ તે આ - "અધ્યાત્મોપનિષદ્-વિવરણ". કોઈ પણ કારણસર આ વિવરણ અધૂરું રહી ગયું છે. ત્રણ અધિકારોનું વિવરણ મળ્યું છે, ચોથો અધિકાર બાકી રહી ગયો છે. તે અધિકાર પર શબ્દાર્થ-વિવેચનાત્મક ટીકા લખીને પૂર્તિ કરી શકાય, પણ તેમ કરવું યોગ્ય નથી લાગ્યું. એટલે જેટલું વિવરણ ઉપલબ્ધ છે તેટલું જ અહીં પ્રગટ કરવામાં આવ્યું છે. આ વિવરણની વિશેષતાઓ વિશે કશું લખવું જરૂરી નથી લાગતું. વિવરણને જ બોલવા દેવું છે.

મુનિ શ્રીત્રૈલોક્યમંડનવિજયજીની ગતિ ન્યાયના પદાર્થોમાં સારી છે. તેથી આ વિવરણના સંપાદનનું કાર્ય તેમને સોંપ્યું છે. આ દ્વારા તેમનો શાસ્ત્રબોધ વિશદ થાય છે, અને ગ્રંથકાર તથા વિવરણકાર મહાપુરુષો પ્રત્યેની ભક્તિ પણ સુદૃઢ થાય છે, તે મોટો લાભ છે. અસ્તુ.

**સં. ૨૦૭૧, આસો શુદિ-૨** **-શીલચન્દ્રવિજય**
**વડોદરા**

❋ ❋ ❋

# प्रवेशिका

सर्वत्र सर्वस्य सदा प्रवृत्ति-र्दुःखस्य नाशाय सुखस्य हेतोः ।
तथापि दुःखं न विनाशमेति, सुखं न कस्यापि भजेत् स्थिरत्वम् ॥

सर्वोऽपि जीवलोको दुःखोद्वेगात् क्लेशार्तिहेतून् परिजिहीर्षुः सुखेप्सया चाऽऽनन्दनिमित्तान्युपादित्सुश्च सर्वासु क्रियासु प्रवर्तते । अर्थाद् दुःखमुक्तिः सुखप्राप्तिश्च जीवमात्रस्य निश्चितं शाश्वतं ध्येयम् । परं तस्य ध्येयस्य पूर्तिः प्रयत्नातिशयेनाऽपि न सम्भाव्यते इत्यस्माकमनिराकरणीयोऽनुभवः । दुःखाद् मुक्तिर्भवति चेदपि सा तात्कालिक्येव, न तु शाश्वतिकी । सुखं प्राप्यते चेदपि तत् स्थिरत्वं न भजते एव । किमर्थमेवं भवति ? कथं वाऽस्माकं सर्वोऽपि प्रयत्नो विफलीभवति ? कुतो वयं सर्वदा सर्वत्र सर्वथा दुःखात् सन्त्रस्ता एव भवामः ? किंकारणं वयं सुखाय बद्धस्पृहा अपि ततो वञ्चिता एव तिष्ठामः ?

एतादृशानां गणनातीतानां सर्वेषामपि प्रश्नानामेकमेवोत्तरमाहुर्मनीषिणः "सर्वं परवशं दुःखं सर्वमात्मवशं सुख"मिति । इदमत्र तात्पर्यम् – सुखं हि द्विविधम् – विषयर्द्धिसंयोगसमुत्थसुखं सहजात्मसुखं चेति । तत्र यत् सहजं सुखं तत् प्रकर्षकाष्ठामुपगतं सत् शाश्वतिकत्वादिवैशिष्ट्यभाग् भवति । तथाहि. – शाश्वतिकं तत् कदाप्यप्रतिपातात्, आत्यन्तिकं तद् दुःखलेशासंस्पृष्टत्वात्, अनुत्तरं तत् सर्वातिशायित्वात्, अनाबाधं तद् भूतोपमर्दनजन्यत्वरूपातङ्कविरहितत्वात्, केवलं तत् सर्वद्वन्द्वातीतत्वात्, स्वाधीनं तत् परानपेक्षत्वेनाऽऽत्मतादात्म्याविर्भावात्, सहजं च तदनादिकालादात्मन्येव संस्थितत्वादनागन्तुकत्वाद-प्राप्यमाणत्वाच्च । तच्चैतत् कर्मसंसर्गरूपप्रतिबन्धोपरागविगमात् चैतन्यवीर्यप्रशमादिगुणाविर्भावेन ज्ञानादि-स्वतत्त्वावस्थानेनाऽभिव्यज्यते । यद्यप्येतत् सकलमलह्रासरूपनिःश्रेयसावाप्तेः पूर्वमात्यन्तिकत्वादिवैशिष्ट्योपेतं न भवति, तथाप्यात्मगुणाविर्भावपरिपाट्या क्रमशो वर्धमाने तन्नाम प्रकटीभवति तस्मिन्, यस्मिन् कस्मिंश्चिदपि स्तरे स्वाधीनत्वादिवैशिष्ट्यमक्षुण्णमेव तिष्ठति । इदमेवाऽस्य वैषयिकसुखापेक्षया महनीयतरत्वम् ।

विषयर्द्धिसंयोगसमुत्थं सुखं तु सहजसुखतः सर्वथा विपरीतं भवति । पूर्वं यद् वैशिष्ट्यं दर्शितं सहजसुखस्य, तत् सर्वमप्यत्र विपरिणमते । अशाश्वतिकं तत्, अनात्यन्तिकं तत्, यां कामपि काष्ठामाप्तमपि सहजसुखलेशापेक्षयाऽपि निकृष्टमेव तत्, भूतपीडाजन्यत्वाविनाभावित्वाद् बाधाजनकं तत्, द्वन्द्वग्रस्तं तत्, पौद्गलिकसंयोगवियोगमुखप्रेक्षित्वात् पराधीनं च तत् । किमधिकेन ? वैषयिकसुखं परमार्थदृष्ट्या निरीक्ष्यते चेत् त्रैकालिकदुःखानुविद्धं भवति । यतस्तत्साधनोपायार्जने आयासजन्यक्लेशः, प्राप्ते सति तत्संरक्षणचिन्ता, अचिरस्थायित्वाद् विनाशे सति वियोगपीडा च । एवं च तात्त्विकरीत्या चिन्तयामश्चेद् वैषयिकसुखं नाम दुःखापरपर्याय एव ।

न केवलं तावत्, विषयसंयोगसमुत्थं सुखमन्ततोगत्वा दुःखरूपेणैव विपरिणमते । यतो मोहमूढा जीवा शरीरेन्द्रियादीनामानुकूल्यं प्रातिकूल्यं च प्रधानीकृत्य कल्पनानुसारं तत्तदिष्टसंयोगेऽनिष्टविप्रयोगे च

यथाक्रमं रतिमरतिं चोपयान्ति । ततो रागद्वेषौ, तस्मादार्त्तरौद्रध्याने, तन्निमित्तकः कर्मबन्धः, तज्जन्यश्च क्लेश इत्यशुभपरम्परा प्रवर्तते । इदं सर्वं मनसिकृत्य लोकव्यवहारमज्ञानमूलकमुपेक्ष्य प्रोचुर्ज्ञानिनः "पराधीन सपने सुख नाही" "सर्वं परवशं दुःखम्" चेति । सर्वमपि पौद्‌गलिकं वस्तुजातं यत आत्मनो व्यतिरिक्तं ततस्तत् 'पर'मेव । अतस्तस्मिन् मोहः, तद्वशीभूतं मानसं, तत्पारतन्त्र्येण वर्तनं, तदपेक्षणं च दुःखमेवेति तदाशयः ।

आत्मसुखं तु स्वाधीनम्, पौद्गलिकसंयोगवियोगानपेक्षित्वादानुकूल्य-प्रातिकूल्ययोस्तुल्यवृत्तित्वात् परमुखप्रेक्षित्वाभावात् स्वभावरमणतात्मकत्वाच्च । तदनुभवोऽप्यवर्णनीयो वैषयिकसुखे तुच्छत्वबुद्धि-सम्पादकः । तदुक्तमस्मिन्नेव प्रकरणे -

"ज्ञानमग्नस्य यच्छर्म, तद् वक्तुं नैव पार्यते ।
नोपमेयं प्रियाश्लेषै-र्नाऽपि तच्चन्दनद्रवैः ॥" (२.१३)

स्ववशत्वमेव पारमार्थ्येन सत्यं शिवं सुन्दरमित्यानन्दस्वरूपमितीह नैश्चयिक्यभिसन्धिः । आत्मस्थस्याऽस्य परमानन्दस्याऽऽत्मनि प्रकटीकरणायाऽऽत्मना विधीयमानः पुरुषार्थ एव 'अध्यात्मम्' ।

❁

परमकृपालुभिरर्हद्भिर्जगतः श्रेयोऽर्थमध्यात्मपथप्रकाशक उपदेशः प्रदत्तः । सोऽयमुपदेश आगमेषु सङ्कलितो जातः । तमनुसृत्याऽवलम्ब्य च परमयोगिभिः श्रीहरिभद्रसूरि-श्रीहेमचन्द्राचार्य-श्रीयशोविजयोपाध्यायादिभिरध्यात्मसाधना विहिता । ततश्च तैरागमाभ्यासेन स्वयंस्फूर्तप्रज्ञया स्वानुभूत्या च यदध्यात्मतत्त्वमात्मसात्कृतं तस्याऽधिकारिजीवेषु विनियोगार्थं निष्कारणवत्सलैस्तैस्तत्तद्ग्रन्थेषु तद् विन्यस्तम् । ग्रन्थानामेषां श्रवणमननादिभिरध्यात्मतत्त्वस्य बोधः संपद्यते, तदनुसरणेन च स्वात्मनि यथार्थस्याऽध्यात्मतत्त्वस्य प्रादुर्भावोऽपि । इदमेवैषां ग्रन्थानां माहात्म्यं यदेतेऽध्यात्ममाध्यमेनाऽऽत्मने पारमार्थिकीं शान्तिमविचलितस्वभावां स्वस्थतामनुत्तरां सुखानुभूतिं चोपहारीकुर्वन्ति । अत एवाऽध्यात्मरसिकानां परमप्रीतिसम्पादकं भवत्यध्यात्मशास्त्रश्रवणादि । तदुक्तम् -

"कान्ताधरसुधास्वादाद् यूनां यज्जायते सुखम् ।
बिन्दुः पार्श्वे तदध्यात्मशास्त्रास्वादसुखोदधेः ॥" [अध्यात्मसारः-१/९]

तत्र श्रीमद्भिर्यशोविजयोपाध्यायैरध्यात्मसाधनाया मार्मिकनिरूपणकारि ग्रन्थद्वयं प्रणीतम् - अध्यात्मसारः अध्यात्मोपनिषच्च । प्रस्तुतप्रकाशनेऽध्यात्मोपनिषत्प्रकरणं तदाशयविबोधिनी परमगुरुश्रीविजयनेमिसूरिप्रणीता वृत्तिश्च सम्पादिते स्तः ।

❁

उपनिषच्छब्देन मूलतो गूढान्तिमरहस्यभूतं शास्त्रतत्त्वं तन्नाम व्याचिख्यासितग्रन्थप्रतिपाद्यवस्तुविषया विद्योच्यते । परं कार्यकारणभावमूलकमुपचारमपेक्ष्य 'आयुर्वैघृत'मित्यादिवत् प्रतिपादको ग्रन्थोऽपि 'उपनिषत्'शब्दवाच्यो भवति । ततोऽध्यात्मविषयकगूढचरमरहस्यार्थः प्रकृतग्रन्थे प्रतिपिपादयिषित इत्यवधार्यते ।

ग्रन्थोऽयमधिकारचतुष्के विभक्तः - १. शास्त्रयोगशुद्धिः २. ज्ञानयोगशुद्धिः ३. क्रियायोगशुद्धिः ४. साम्ययोगशुद्धिश्च । सर्वज्ञप्रणीतशुद्धागमाङ्गीकारेण शास्त्रयोगशुद्धिः सम्पद्यते । सैवाऽध्यात्मसाधनाया मूलस्तम्भः । तामाधारीकृत्यैवाऽध्यात्मसाधनायाः प्रारम्भः । ज्ञानयोग-क्रियायोगौ साधनाया एव विकासपथः । साम्ययोगः पुनः साधनाया एव पराकाष्ठा, या साधकाय सिद्धिं प्रददाति । इत्यनेन कारणेन ग्रन्थकृद्भिरयं क्रमश्चित इति स्पष्टं प्रतिभासते ।

तत्राऽऽदावत्राऽध्यात्मपदार्थो वर्णितः । यद्यपि सेयमध्यात्मपदार्थवर्णनाऽध्यात्मसारग्रन्थेऽनेनैव ग्रन्थकारेणैवं विहिताऽस्ति -

"गतमोहाधिकाराणामात्मानमधिकृत्य या ।
प्रवर्तते क्रिया शुद्धा तदध्यात्मं जगुर्जिनाः ॥" [२.२]

इत्यादि । तथापि तत्राऽध्यात्मस्य प्रामाण्यपरिकलितं यल्लक्षणं दर्शितं तदेव नयवादाश्रयणेन रूढ्यर्थ-योगार्थावपेक्ष्य द्विधा विभज्याऽस्मिन् प्रकरण उपवर्णितमस्ति । तदनु महोपाध्यायैरध्यात्माधिकारित्वं केषुचिदेव सत्त्वेषु सम्भवति, न सर्वेषु इति स्पष्टं निगदितम् । अध्यात्मभाजनत्वस्य सम्पत्तये योग्यतात्रयमनिवार्यमिति तेषामभिप्रायः । तत्त्रयमित्थम् - १. दुर्नयविभावनोत्थस्य कदाग्रहस्य निवृत्तिः २. आत्मस्वरूपे विश्रान्तिं प्रति साम्मुख्यम् ३. स्याद्वादप्रकाशोपलब्ध्या स्फुटालोकनक्षमता च । विपरीताभिनिवेशसंमूढो जातितुल्ययुक्तिजाले अटाट्याऽनर्थमेवाऽऽसाद्याऽऽत्मानमवसादयतीत्यत्राऽऽशय उपलक्ष्यते । अतः परं शास्त्रयोगशुद्धिप्ररूपणमारभ्यते ।

अध्यात्ममार्गस्याऽतीन्द्रियत्वादतीन्द्रियज्ञानिनां मार्गदर्शनादृते सामान्यसाधकानां कृतेऽध्यात्ममार्गे प्रवृत्तिः प्रगतिर्वा दुःशकैव । तत्रापि तादृशां ज्ञानवतां सिद्धानामुपस्थितौ तेषां साक्षादुपदेशेनाऽनुगृहीताः साधकाः साधनायै प्रभवन्ति । परं तेषां क्षरदेहेनाऽनुपस्थितौ साधनामार्गे प्रवृत्त्यर्थं तेषामक्षरदेहः अर्थात् तत्प्रणीतशास्त्रकदम्बकमेव साधकानां शरणम् ।

किन्त्वत्रापि बह्व्यः समस्याः समुपतिष्ठन्ति । यतोऽध्यात्मतत्त्वं तु सुतरां गहनम् । तत्रापि तत्प्रतिपादकेषु शास्त्रेषु नैकवाक्यता, प्रत्युत विविधा वचनरचना, विभिन्नानि मन्तव्यानि, सङ्ख्यातीता मतभेदाः, अगण्या विरोधाः, कुरुक्षेत्रस्मारकाणि खण्डनमण्डनानि च । कुत्र विश्वासो निधेय इति निर्णयस्तु दूरे तिष्ठतु, तस्य चिन्तनमपि श्वासमवरुणद्धि । किं कुर्मः ? किं वा वदामः ?

आसां सर्वासां समस्यानां समाधानमेव शास्त्रयोगशुद्ध्यधिकारः । तत्राऽऽदावेव ग्रन्थकृद्भिर्निर्णयवचनं निष्टङ्कितम् -

*"शासनात् त्राणशक्तेश्च बुधैः शास्त्रं निरुच्यते ।*
*वचनं वीतरागस्य तत्तु नाऽन्यस्य कस्यचित् ॥" [१.१२]*

यदात्मानं नियमयति दोषेभ्यश्चाऽऽत्मस्वभावं त्रायते तदेव शास्त्रं बुधाभिमतम् । तत्तु वीतरागस्य सर्वज्ञस्य वचनमेव भवितुमर्हति, नाऽन्यस्याऽसर्वज्ञस्य रागद्वेषकालुष्यग्रस्तस्य वेति ।

कुत एवं निर्णीतिरिति चेत् तैरेव परीक्षकसत्तमैः शास्त्रशुद्धता-परीक्षापद्धतिः शिक्षिता । यथा सुवर्णस्य शुद्ध्यशुद्धिनिर्णयः कष-च्छेद-तापरूपत्रिविधपरीक्षाधीनस्तथैव शास्त्रशुद्धिनिर्णयोऽपि । अतः शास्त्राणां त्रिविधपरीक्षा कथं क्रियते, तत्तद्दर्शनानां तत्तन्मन्तव्यानि कथं तत्परीक्षायामुत्तीर्णानुत्तीर्णानि भवन्ति, तत् तैः सम्यक् प्रदर्शितं वर्ततेऽत्र । अस्याऽऽधारेण मध्यस्थः साधकः शास्त्रशुद्धिं निश्चित्य तदनुसारेण प्रवृत्तिं कृत्वा मोक्षमार्गे प्रगतिं कर्तुं क्षमते एव । अत्राऽवान्तरविषयरूपेण सर्वेष्वपि दर्शनेष्वनेकान्तसत्तां प्रदर्श्य तद्व्यापकतां प्रबोध्याऽध्यात्मसाधनायामनेकान्तदृष्टेरनिवार्यताऽप्याविष्कृता वर्तते ग्रन्थकारेण ।

अस्याऽधिकारस्याऽध्ययनेन साधकानां चित्ते सञ्जायते मिथ्यात्वमलस्य ह्रासः, निवर्तते कुतर्कविषमग्रहः, दूरीभवत्यसत्पक्षपातः, प्रहीयते च कदाग्रहजाड्यम् । न केवलं तावत्, शास्त्राभ्यासस्य फलभूतं माध्यस्थ्यमपि प्ररोहति । द्योतते चेदं सर्वमपि श्रीहरिभद्रसूरीणामेषु वचनेषु -

"पक्षपातो न मे वीरे न द्वेषः कपिलादिषु ।<br>
युक्तिमद् वचनं यस्य तस्य कार्यः परिग्रहः ॥"

अध्यात्ममार्गे प्रवर्तनायाऽऽवश्यकोऽयं मध्यस्थभावः । माध्यस्थ्यभावितान्तःकरणः साधक एवाऽलं भवति प्रत्येकं मतस्याऽपेक्षामवबुध्य, वास्तविकता-ऽवास्तविकते अवगम्य, व्यापकदर्शनेन सर्वकथनानि विमर्शविषयीकृत्य, ताटस्थ्यं पालयित्वा शास्त्रशुद्धिं निर्णेतुमिति ।

यतश्चैवं तत एव महोपाध्यायैरधिकारप्रान्ते माध्यस्थ्यमहिमा गुम्फितः । तैः स्पष्टमुद्घोषितं यद् "माध्यस्थ्यमेवं शास्त्रार्थः" [१.७१], यश्च तदात्मीभूतं विदधाति स एव वास्तवतया शास्त्रवेत्ता । तथाहि -

"तेन स्याद्वादमालम्ब्य सर्वदर्शनतुल्यताम् ।<br>
मोक्षोद्देशाविशेषेण यः पश्यति स शास्त्रवित् ॥" [१.७०]

माध्यस्थ्यप्राप्त आत्मैव द्रष्टुं शक्नोति यत् सर्वेषु दर्शनेषु मोक्षस्वरूपे तदुपायविषये च विभिन्नेषु मन्तव्येषु सत्स्वपि 'मोक्ष' एव परमार्थेनोद्देशीभूतः । अतः स्याद्वादविभावनेन सम्पादितौदार्यो यो मोक्षोद्देशमपेक्षीकृत्य सर्वदर्शनतुल्यत्वं विभावयति तादृशो माध्यस्थ्योपासक एव शास्त्रविदिति परमार्थः ।

❁

शास्त्रबोधो ज्ञानयोगश्च नैकतत्त्वम् । शास्त्रबोधो यद्यपि साधनामार्गस्य प्रदर्शकः प्रकाशकश्च, तत एवाऽनिवार्यश्चाऽपि; तथापि दिग्दर्शनोत्तरं स सहगामी नैव भवति । साधनामार्गे प्रारम्भादाकैवल्यप्राप्ति पार्श्ववर्ती भवति स्वात्मानुभूति-तद्गुणसंवेदनरूपो ज्ञानयोग एव । अयं ज्ञानयोग एव परमब्रह्मगमकः, न तु शास्त्रकोटेरपि परमब्रह्मगमने सामर्थ्यम् । तदुक्तमत्रैव -

"अतीन्द्रियं परं ब्रह्म विशुद्धानुभवं विना ।<br>
शास्त्रयुक्तिशतेनाऽपि नैव गम्यं कदाचन ॥" [२.२१]

तर्हि शास्त्रज्ञानस्य क इहोपयोगः ? अयमेव यत् शास्त्रयोगः साधनायाः पीठिकामारचयति, पीठिकारचनें सत्येव तदुपरि ज्ञानयोगसौधनिर्माणम् । विना पीठिकां न प्रासादनिर्माणं, प्रासादनिर्माणमन्तरा

न पीठिकोपयोग: । तदिदं तत्त्वम् - शास्त्रदर्शितया दिशा गच्छन् शुद्धमति: पथिक एव ज्ञानयोगस्वरूपानुभवज्ञानेनोत्तरोत्तरविकासशीलामवस्थां प्राप्नोति । तदुक्तं श्रीमद्भि: -

"अधिगत्याऽखिलं शब्दब्रह्म शास्त्रदृशा मुनि: ।
स्वसंवेद्यं परं ब्रह्माऽनुभवेनाऽधिगच्छति ॥" [२.२५]

तथा च शास्त्रबोधमधिगत्यैव तदनुरूपप्रवृत्त्या संवेद्यमानानुभवधारात: परमब्रह्मसम्प्राप्तिरिति शास्त्रबोधस्य महत्त्वमव्याहतमिति । ननु किंस्वरूपोऽयं ज्ञानयोग इति चेदयं तत्स्वरूपलेश: - अनुभवज्ञानमेव ज्ञानयोगपदवाच्यम् । आत्मस्वरूपस्य बौद्धिकज्ञप्तिर्नैव ज्ञानयोग:, किन्त्वात्मन: स्वसंवेदनरूपमनुभवज्ञानमेव स: । देहात्मभेदाग्रहे निवर्तिते, कर्मजन्येषु पौद्गलिकभावेषु मामकीनत्वबुद्धे: प्रक्षये, स्वरूपानुसन्धाने च जाते सति जायमानाऽऽत्मन: सुखकर्यनुभूति: प्रसन्नतासम्पादकमात्मगुणसंवेदनं वा ज्ञानयोग: । तस्य तारतम्येनाऽनेकभेदा: सम्भवन्ति । तत्र पारमार्थिकी ज्ञानयोगस्य शुद्धि:- परिपूर्णता केवलज्ञानसम्प्राप्तावेव । अत्र ग्रन्थे प्रवर्तमानस्याऽधिकारस्य क्रमापेक्षया द्वितीयस्य ज्ञानयोगशुद्धिनिमित्तत्वाद् 'ज्ञानयोगशुद्ध्यधिकार' इत्यभिधानम् ।

अधिकारेऽत्र क्रमशो ज्ञानयोगस्य स्वरूपं माहात्म्यं तज्जन्यसुखं च प्रारम्भे वर्णितमस्ति । तत: परं परमोदासीनता, सविकल्प-निर्विकल्पसमाधी, चारित्रशुद्धि:, माध्यस्थ्यं, शास्त्ररसास्वाद:, केवलज्ञानं, निर्लेपता, लीनता, अद्वैतं ब्रह्म, भावनाज्ञानमित्यादयो ज्ञानयोगसम्बन्धिनोऽनेके विषया उपवर्णिता: सन्ति । प्रान्ते ज्ञानयोगश्रवणाधिकारिता, तदर्थमाचारपालनस्याऽऽवश्यकता, ज्ञानयोगिनो ध्येयमित्यादि निरूप्य ज्ञानयोगप्ररूपणमुपसंहृतमस्ति ।

❁

अनादिकालादारभ्य परभावेषु प्रवर्तमानाया वीर्यधाराया ज्ञानबलेन स्वभावे प्रवर्तनं, बाह्यभावेषु व्याप्रियमाणस्याऽऽत्मबलस्याऽन्तरङ्गदिशि प्रेरणम्, अनुचितप्रवृत्तिमवरुध्याऽऽन्तरशक्तेरुचितप्रवृत्तौ च क्रियान्वयनं क्रियायोगशुद्धि: । साऽत्रोपवर्ण्यते इत्यतोऽधिकारोऽयं क्रियायोगशुद्ध्यभिधान: ।

स्याद्वादशैल्या विमृश्यते चेदात्मशुद्धौ ज्ञानयोग-क्रियायोगयो: सायुज्यकार्यकारणभाव: । ज्ञानक्रिययोरेकतरस्यैव साधनामार्गे प्राधान्यमिति चिन्तनं दोषपूर्णमेव । यत आत्मविकासस्य यस्यां कस्यामपि भूमिकायां तदुभयं संवलितमेव तिष्ठति । अध्यात्मसाधनाया आरम्भबिन्दोरवधीकृत्य आ तत्सिद्धेरुभावपि योगौ परस्परं पूरकौ भवत: । यत उभयोर्मध्ये परस्परं जन्यजनकभावसम्बन्ध:, उभावपि परस्परं शुद्धिनिमित्तम् । उत्तरोत्तरोभयशुद्धिसम्पत्त्या चरमपरिपाकावस्थायामुभयोर्भेदच्छेद:, तत्रामैकीभवनमिति कुत एकतरस्याऽभावेऽन्यस्याऽपि स्वभावावस्थानम् ?

अधिकारेऽस्मिन् क्रियाया अध्यात्मत्वं, स्वच्छन्दाचारस्य ज्ञानविरोधित्वम्, एकान्तज्ञाननयस्य खण्डनं, क्रियाया भावशुद्धावुपकारकत्वं, क्रियाया मलनाशकत्वं, ज्ञानमात्रस्य कर्मनाशकत्वमननस्याऽसाङ्गत्यं, कर्मनाशे ज्ञानक्रिययो: समुच्चयवाद इत्यादय: क्रियायोगपुष्टिशुद्धिकारका अनेके विषया निरूपिता: सन्ति । प्रान्ते महोपाध्यायै: समग्राया अपि चर्चाया निष्कर्ष एवं प्रदर्शित: -

"ज्ञाने चैव क्रियायां च युगपद्विहितादरः ।
द्रव्यभावविशुद्धः सन् प्रयात्येव परं पदम् ॥" [३.४२]

आत्मकृतकर्मणां विपाकोदयेनोपस्थितानां शुभाशुभनिमित्तानां विनैव रागद्वेषकालुष्यं निर्द्वन्द्वभावेन सहजतया स्वीकारः साम्यम् । सर्वास्वपि परिस्थितिष्वाकर्षणं विह्लतां वाऽननुभूय स्वस्थतया तद्दर्शनं तत्र यदितिकर्तव्यतारूपेणाऽऽपतितं तस्य सम्पादनं च साम्यम् । परभावानामवशीभूय स्वभावे एव स्ववशतयाऽवस्थानं साम्यम् । एतादृशा साम्येन साकमात्मनो योजनमेव साम्ययोगः । तद्द्वारा सम्पादिताऽऽत्मशुद्धिरेव साम्ययोगशुद्धिः । सा यत्रोपवर्ण्यते स साम्ययोगशुद्ध्यधिकारः ।

वीतरागवचनेऽविचला श्रद्धा, तद्धेतुक आत्मानुभवः, वचनानुरूपा च विशुद्धतमाऽऽचरणा-इत्येतेषामभावे समत्वप्राप्तिर्दुःशकैव । अत एव साम्ययोगसिद्धये शास्त्र-ज्ञान-क्रियात्मकयोगत्रितयस्याऽपि सिद्धिरावश्यकी । अथ च साम्ययोगसम्प्राप्त्यैव तेषां त्रयाणामपि योगानां साफल्यम् ।

वस्तुतः सूक्ष्मदृष्ट्या परिशील्यते चेत् चत्वारोऽपि योगाः परस्परं संवलिता एव । यत्रैकस्याऽपि सद्भावस्तत्राऽन्येषामपि त्रयाणामस्तित्वमवश्यंभावि । किं बहुना ? "को वा संसारमुक्तेरुपायः ?" इति तात्त्विकजिज्ञासाप्रादुर्भावात्मिकायामादिममार्गानुसारितारूपायामपुनर्बन्धकावस्थायामपि चतुर्णामपि योगानामांशिकसत्त्वमभिमतं योगीन्द्रैः । तथैव चाऽऽत्मशुद्धिपराकाष्ठारूपायामयोग्यवस्थायामपि चतुर्णां योगानां परिपाकरूपः प्रकर्षः प्रतिपादितस्तैः । तथा चाऽऽत्मशुद्ध्यर्थं विधीयमानाया अध्यात्मसाधनाया आरम्भतः समाप्तिपर्यन्तं सर्वास्वपि भूमिकासु चत्वारोऽपि योगा अनुस्यूता भवन्ति । तन्नाम साधको यावन्मितं शास्त्रयोगमवलम्ब्य यावन्तौ ज्ञानयोग-क्रियायोगावभ्यस्यति तावत्प्रमाणः साम्ययोगः प्रादुर्भवति, तावत्यात्मानन्दानुभूतिश्च । शास्त्रयोगवृद्धौ ज्ञान-क्रियायोगयोरपि वृद्धिस्तदनुपातेन साम्ययोग-चिदानन्दवृद्धिश्च । परमप्रकर्षमुपगते शास्त्रादियोगत्रितये परमसाम्ययोगप्रादुर्भावः परमानन्दसम्प्राप्तिश्चेति ।

साम्ययोगशुद्ध्यधिकारे महोपाध्यायैर्मुख्यतोऽप्रमत्तसंयमाद्युपरितनगुणस्थानवर्ती साम्ययोगः, तज्जन्या-ऽऽनन्दानुभूतिः, तस्या बलवत्ता, साम्यस्य माहात्म्यं, साम्यादृते ज्ञानादियोगानामसाफल्यमित्यादयो विषयाः सरसपद्यैर्निरूपिताः सन्ति । प्रान्तेऽतुलनीयसमताधारिणां नामग्राहं स्मरणादि विधाय ग्रन्थोऽयमुपसंहृतोऽस्ति ।

ग्रन्थाध्ययनतः सम्पद्यमानस्तात्पर्यबोध एषः -

"दूरे स्वर्गसुखं मुक्तिपदवी सा दवीयसी ।
मनःसंनिहितं दृष्टं स्पष्टं तु समतासुखम् ॥" [अध्यात्मसारः-९.१३]

स्वर्ग-मोक्षसुखे नाऽस्माकं करतलगते, परं साम्यभावसम्प्राप्यं चित्तप्रमोदसुखं नैव दूरं, प्रत्युत मनःसंनिहितम् । स्पष्टं चेदं स्वानुभवसिद्धत्वात् । ततस्तत्प्राप्त्यै सर्वथा सर्वदा सर्वत्र प्रयतनीयमिति ।

सन्त्यध्यात्मोपनिषत्प्रकरणस्य रहस्योद्घाटने समर्था एकाधिकाः संस्कृतवृत्तयः । लोकभाषायामस्य विवेचनानि तु ततोऽप्यधिकानि । तेषु सर्वेषु परमगुरु-श्रीविजयनेमिसूरिभिः (वि.सं. १९२९-२००५) प्रणीतेयं वृत्तिरग्रिमा । न केवलमिदमेवाऽस्या महत्त्वं, प्रत्युत तटस्थतयाऽवलोकयामश्चेद् ग्रन्थग्रन्थिभेदनेऽस्या अनन्यसदृशं सामर्थ्यं स्फुटमवभासते । यद्यपि निश्चितिरस्या विद्वज्जनाधीना, तथाप्येतद्वृत्त्यवलोकनतोऽनेकश एतदधीतिनामपि नूतनोन्मेषदर्शनजन्यः प्रमोदसंस्पर्शस्तत्सूचकरोमोद्गमश्च भविष्यत इति निश्चप्रचम् ।

अद्यतनकाले वृत्तिविरचने द्वौ प्रवाहौ परिदृश्येते । एकतः शब्दार्थमात्रं प्रदर्श्यते, नान्यत् किमपि (यद्यपि तद्रचयितारस्तु स्वेन मर्मोद्घाटनं कृतमित्येवोद्घोषयन्तीत्यन्यदेतत्); अन्यतश्च ग्रन्थकारस्य चिकथयिषितानां सर्वत आच्छादकान्यावश्यकान्यनावश्यकानि वा शतशः सहस्रशो वोद्धरणानि निक्षिप्य, ग्रन्थान्तरस्थान् पदार्थान् यथाकथञ्चित् प्रसङ्गमुद्भाव्य यावच्छक्यमधिकाधिकमुद्धृत्य वा पाण्डित्यप्रदर्शनं विधीयते । वृत्तिरचनायाः प्राचीनपरीपाटी तु ततो भिन्ना । तत्राऽनावश्यकप्रस्तारा-ऽनिच्छनीयसङ्कोचाभ्यामुभाभ्यां वृत्तिः परिरक्ष्यते । ग्रन्थकारेणैवं किमर्थमुक्तं, किमर्थमेवं नेति ग्रन्थकारहृदये संप्रविश्याऽन्विष्यते । शब्दमर्यादामतिक्रम्य वाक्यद्वयमध्ये (between the lines) अन्तर्निहितं ग्रन्थकारमानसं प्रत्यक्षीक्रियते । ग्रन्थकारमहर्षीणां प्रतिपिपादयिषितानां प्रकटीचिकीर्षा, समुपन्यस्तानां भावानामसन्दिग्धं व्याचिख्यासा चैव वृत्तिविरचने चोदिका भवति । परमगुरुभिरस्या वृत्त्या विरचने इयं प्राचीनपरिपाटी सम्पूर्णतयाऽऽत्मसाद् विहिताऽस्ति । अद्यतनवृत्तिकारैरनया दृष्ट्याऽपीयं वृत्तिरवलोकनीयाऽस्तु ।

❁

अथ सम्पादनकथा । परमगुरूणां श्रीविजयनेमिसूरीश्वराणां सूरिपदशताब्दवर्षे (सं. २०६४) गुरुचरणानां श्रीविजयशीलचन्द्रसूरीणां चित्तेऽध्यवसायः सञ्जातो यत् परमगुरूणां तच्छिष्यरत्नानां च प्रकाशितचराणां ग्रन्थानां पुनःप्रकाशनमप्रकाशितानां च प्रकटीकरणं कर्तव्यम्, अनेन परमगुरुभ्यो वास्तविकी कृतज्ञता समर्पिता भवेत् । सोऽयमध्यवसायोऽग्रे सङ्कल्परूपेण परिणतः, देवगुरुधर्मकृपाबलेन शनैः शनैः 'शासनसम्राट्-शताब्दीग्रन्थमाला' रूपेण क्रियान्वितो जातो जायमानश्चाऽस्ति । इदं प्रकाशनमपि तस्यैव सङ्कल्पस्य साकारीकरणस्याऽङ्गभूतम् ।

परं यथा भगवद्गीतायाः प्रारम्भो विषादयोगेन, अस्माकमपि प्रारम्भे तथैव जातम् । योजनाया अङ्गरूपेणाऽस्माभिः परमगुरु-तच्छिष्यवृन्दप्रणीतानां ग्रन्थानां सङ्ग्रहणमारब्धम् । अस्माकं पार्श्वे परमगुरूणां साहित्योपासनायाः सूचिस्त्वासीदेव । परं तत्रोल्लिखिता बहवो ग्रन्था न प्रकाशितचरा, न च तेषां हस्तलिखितप्रतीनामुपलब्धिः । किं कुर्याम ? यत्र यत्र सम्भावना तेषु सर्वेषु स्थानेषु सुसूक्ष्ममन्वेषणेऽपि यदैकस्यैव ग्रन्थस्य हस्तप्रतिर्लब्धा तदा नितरां खिन्ना अतिष्ठाम । कुत्र गतः स महानिधिः ? को वोत्तरदायी ? कुतो वाऽऽयति पुनस्तादृशरचनासम्भवः ? यदासीदस्मत्पार्श्वे तस्य मूल्यवत्तां दृष्ट्वैवाऽनुमातुं शक्यते स्म गतस्य मूल्यम् । हृदयदाही शल्यतुल्यो विपाको नाम किं तत् तदैव ज्ञातम् ।

एवं वत्सरा व्यतीताः । वि.सं. २०६९ वर्षे कार्यान्तरव्याजेनाऽस्माभिरहम्मदाबादनगरस्थ-पांजरापोळस्थ-श्रीविजयनेमिसूरिज्ञानशालायां गन्तव्यमभवत् । तत्र केनचिद् हेतुना पुस्तकेषु सङ्गृह्यमानेषु पूर्वावलोकितायाः कोणस्थाया एकस्याः कपाटिकाया आकस्मिकतया महान् पत्रसङ्ग्रहो लब्धः । दर्शनादनावश्यक-पत्रसङ्ग्रहरूपेण भासमाने तस्मिन् सूक्ष्मनिरीक्षणेनाऽनुपलभ्यमानाः सर्वेऽपि ग्रन्था लब्धाः । कुतस्ते पूर्वमदृष्टास्तत्राऽऽगतास्तद् दैवमेव जानीयात् । देवगुरुधर्मकृपा तत्र कारणमिति मन्यामहे ।

तत्र येऽप्रकाशिता ग्रन्थाः समुपलब्धास्तेष्वयमध्यात्मोपनिषत्प्रकरणवृत्तिग्रन्थः सर्वतो लघुकायः । अत एव नान्दीरूपेण तस्येदं प्रकाशनम् । इतः पूर्वमस्यां मालायां प्रकाशिताः सर्वेऽपि ग्रन्था प्रकाशितपूर्वा आसन् । अयं तु न तथेति प्रकाशनेऽधिक आनन्दः सर्वेषां मनसि । परमगुरूणां प्रतिभया मादृशा बहवो लाभान्विता भविष्यन्तीति वार्ता कथं नाऽऽनन्दं जनयेत् ?

अध्यात्मोपनिषत्प्रकरणस्याऽऽद्यानां त्रयाणामेवाऽधिकाराणामुपरि परमगुरुभिः प्रणीता वृत्तिः सम्प्राप्तेति तावत्येवाऽत्र प्रकाशिता । साम्ययोगशुद्ध्यधिकारस्य सारल्यादिकारणतः परमगुरुभिस्तत्र वृत्तिरेव न रचितेत्यपि सम्भावना ।

परमगुरवः शास्त्रसर्जनकाले स्वयं न लिखन्ति स्म, किन्तु यथा कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्याणां विषये श्रूयते तथैव तेऽपि लेखयन्ति स्मेति लेखकानामनाभोगेन प्रमादेन वा केचिद् दोषा ग्रन्थे आपतेयुरेव । अत्र तादृशसम्भावना यत्र यत्र भासिता तत्र तत्र गुरुचरणानां प्रबोधनमुपलभ्य प्रमार्जनं विहितम् । तथापि यदशुद्धं प्रतिभासेत तस्योत्तरदायित्वं सम्पादकस्यैव भवतीति तदर्थं क्षन्तव्योऽयं जनः, सूचनार्होऽपि ।

ग्रन्थगतानां केषाञ्चित् पदार्थानां विवरणार्थं तुलनार्थं वा टिप्पण्यो विन्यस्ताः सन्ति । श्रीयशोविजयसूरिभिः (श्रीभुवनभानुसूरिसमुदायसत्कैः) विरचितया अध्यात्मोपनिषत्प्रकरणस्याऽध्यात्मवैशारदी-वृत्या सह प्रस्तुतवृत्तेस्तुलनां विधाय यत्र यत्र किञ्चित् चिन्तनीयं प्रतिभातं तदपि तत्र तत्र टिप्पणीरूपेण योजितमस्ति ।

प्रान्ते मूलग्रन्थः, श्लोकार्द्धानामकाराद्यनुक्रमः, उद्धरणसूचिः, वृत्तिगतविशिष्टविषयसूचिः - इत्यादि परिशिष्टरूपेण योजितमस्ति ।

परमगुरूणामनुग्रहेण गुरुचरणानां प्रसादेन च सञ्जातस्य कार्यस्य कृते स्वं निमित्तीकर्तुं कार्तज्ञ्यमावहत्ययं तेषां वशंवदः ।

**श्रीविजयशीलचन्द्रसूरि-शिष्यः**
**मुनि-त्रैलोक्यमण्डनविजयः**

# अध्यात्मोपनिषत्प्रकरणस्य विषयानुक्रमः


| | श्लोकक्र. | पृष्ठक्र. |
|---|---|---|

## १. शास्त्रयोगशुद्धिनामाऽधिकारः

| | श्लोकक्र. | पृष्ठक्र. |
|---|---|---|
| अध्यात्मपदस्य यौगिकोऽर्थः | १.२ | १-२ |
| अध्यात्मपदस्य रूढ्यर्थः | १.३ | २-३ |
| अर्थद्वयेषु नयसङ्गतिः | १.४ | ३-४ |
| अध्यात्मभाजनत्वम् | १.५ | ४-५ |
| युक्त्याभासानां निष्फलत्वम् | १.६-८ | ६-७ |
| अतीन्द्रियार्थावबोधोपायः | १.९ | ७-८ |
| शास्त्रज्ञानस्योपयोगित्वम् | १.१०-१२ | ८-९ |
| वीतरागपुरस्कारः | १.१३-१५ | ९-१० |
| शास्त्रपरीक्षा | १.१७ | १० |
| कषशुद्धिः | १.१८-२० | १०-११ |
| छेदशुद्धिः | १.२१-२३ | ११ |
| वेदे छेदशुद्ध्यभावः | १.२४-२८ | १२-१३ |
| तापशुद्धिः | १.२९-३१ | १३-१४ |
| नयस्वरूपम् | १.३२-३५ | १४-१५ |
| नयानां परस्परमविरोधः | १.३६-३८ | १५-१६ |
| अनेकान्ते दोषोद्धारः | १.३९-४३ | १६-१८ |
| अनेकान्तस्य सर्वतन्त्रसम्मतत्वम् | १.४४-५२ | १८-२३ |
| तापशुद्धिनिर्णयः | १.५३ | २३ |
| नित्यैकान्तवादे हिंसाद्यभावः | १.५४-५५ | २३-२४ |
| अनित्यैकान्तवादे हिंसाद्यसङ्गतिः | १.५६-५९ | २५-२६ |
| अनेकान्तवादे एव माध्यस्थ्यसम्भवः | १.६०-६४ | २६-२७ |
| श्रुतादि त्रिविधं ज्ञानम् | १.६५-६९ | २८-२९ |
| माध्यस्थ्यमहिमा | १.७०-७७ | ३०-३२ |

## २. ज्ञानयोगशुद्धिनामाऽधिकारः

| | श्लोकक्र. | पृष्ठक्र. |
|---|---|---|
| ज्ञानयोगस्वरूपम् | २.१-३ | ३३-३४ |
| शास्त्रयोगाद् ज्ञानयोगस्य महनीयतरत्वम् | २.४-५ | ३४-३५ |
| ज्ञानयोगिनः सुखातिशयः | २.६-१४ | ३५-३८ |
| ज्ञानस्योत्तमत्वम् | २.१५ | ३९ |
| सविकल्पक-निर्विकल्पकसमाधी | २.१६-१७ | ३९-४० |
| *शुद्धात्मस्वरूपम्* | २.१८-२० | ४०-४१ |
| शुद्धात्मस्वरूपस्य विशुद्धानुभवगम्यता | २.२१-२५ | ४१-४३ |
| आत्मनः सर्वथाशुद्धता | २.२६-३२ | ४३-४५ |
| ज्ञानयोगिनो लोकव्यवहारः | २.३३-३४ | ४५-४६ |
| ज्ञानयोगिनो निर्लिप्तत्वम् | २.३५-३९ | ४६-४८ |
| अद्वैतं ब्रह्म | २.४०-४२ | ४८-५० |
| ब्रह्मणः सच्चिदानन्दमयत्वम् | २.४३ | ५० |
| ब्रह्मणो निर्विकल्पकता | २.४४-४७ | ५१-५२ |
| ब्रह्मण उपदेशविधिः | २.४८-५० | ५३-५४ |
| विकल्पानां विकल्पनाश्यत्वम् | २.५१-५५ | ५४-५६ |
| शुभसङ्कल्पस्य स्वनाश्यत्वम् | २.५६-५८ | ५७-५८ |
| ज्ञानयोगिनः स्तुतिः | २.५९-६५ | ५८-६२ |

## ३. क्रियायोगशुद्धिनामाऽधिकारः

| | श्लोकक्र. | पृष्ठक्र. |
|---|---|---|
| क्रियायोगस्याऽऽवश्यकता | ३.१-७ | ६३-६५ |
| ज्ञानयोगिनः क्रियाया आनर्थक्यस्य शङ्का | ३.८-१० | ६६ |
| तत्समाधानम् | ३.११-१५ | ६७-६८ |
| क्रियाया माहात्म्यम् | ३.१६-१८ | ६८-६९ |
| क्रियायाः सञ्चितादृष्टनाशकत्वम् | ३.१९-२३ | ६९-७० |
| ज्ञानिनोऽदृष्टस्याऽस्तित्व-नास्तित्वचर्चा | ३.२४-३१ | ७०-७३ |
| सर्वकर्मक्षये ज्ञान-कर्मणोः समुच्चयः | ३.३२-३५ | ७३-७५ |
| केवलज्ञानिनोऽपि क्रियाया आवश्यकत्वम् | ३.३६-३७ | ७५ |
| अक्रियावादिनो दोषाः | ३.३८-३९ | ७५-७६ |
| ज्ञानयोगिनः क्रियायोग्यभिन्नत्वम् | ३.४०-४२ | ७६-७७ |
| क्रियाज्ञानयोगिनः स्तुतिः | ३.४३-४४ | ७७-७९ |

## ४. साम्ययोगशुद्धिनामाऽधिकारः

| | श्लोकक्र. | पृष्ठक्र. |
|---|---|---|
| समत्वस्य माहात्म्यम् | ४.१-१४ | |
| समत्वभाजां लोकोत्तराणां दृष्टान्ताः | ४.१५-२२ | |
| *समत्वस्य फलम्* | ४.२३ | |

महोपाध्याय–श्रीयशोविजयगणि–प्रणीतम्

# अध्यात्मोपनिषत्प्रकरणम्

## १

## शास्त्रयोगशुद्धिनामाऽधिकारः

ऐन्द्रवृन्दनतं नत्वा, वीतरागं स्वयम्भुवम् ।
अध्यात्मोपनिषन्नामा, ग्रन्थोऽस्माभिर्विधीयते ॥१.१॥

आत्मानमधिकृत्य स्याद्, यः पञ्चाचारचारिमा ।
शब्दयोगार्थनिपुणा-स्तदध्यात्मं प्रचक्षते ॥१.२॥

## शासनसम्राट्–श्रीविजयनेमिसूरि–विरचिता वृत्तिः

श्रेयःश्रियं नो दिशताज्जिनेन्द्रः, सम्यक्क्रियाज्ञानविधानदक्षः ।
अध्यात्मसद्योगपथप्रदर्शी, तदीयसद्वृत्तिविधिप्रवृत्तौ ॥

आत्मानमधिकृत्य यद् भवति यत् तिष्ठति यज्ज्ञायते यच्चाऽऽत्मानमेव व्याप्नोति तस्य सर्वस्याऽप्यध्यात्मपदावयवशक्तिग्रहजन्योपस्थितिविषयत्वेनाऽध्यात्मत्वप्राप्तौ कथं पञ्चाचारचारिमैवाऽध्यात्ममिति शङ्काशङ्कून्मूलनायोक्तं **शब्दयोगार्थनिपुणा** इति । शक्नोतीति शक्रः, चेष्टते इति घटः, गच्छतीति गौरित्येवंदिशा निरुच्यमानस्य शक्रादिशब्दस्याऽवयवशक्तितः प्रतीतशक्रादिव्यक्तिभिन्नव्यक्तिष्वपि तत्तत्क्रियायोगतः प्रवृत्तौ सत्यां, य एवाऽर्थः सहस्राक्षप्रमुखो लोके शक्रादिसंज्ञया प्रतीतस्तस्यैवाऽर्थस्य योगतोऽप्यधिगतयेऽमरावतीं रक्षितुं शक्नोति, जलाहरणधारणाद्यर्थं चेष्टते इत्यादिरीत्या व्युत्पत्तिमाश्रित्य प्रतिनियतार्थबोधकत्वं यथा शक्रादिशब्दानां; तथैव प्रकृतेऽन्यार्थप्रवृत्तेः सम्भवेऽपि तत्परिहारेण पञ्चाचारचारिमेति विशिष्य विशेष्योपादानतोऽध्यात्मपदं तत्रैव योजयितुं ये समर्थास्ते शब्दयोगार्थनिपुणाः पञ्चाचारचारिमस्वरूपमध्यात्मं प्रचक्षत इति नाऽन्यत्र तच्छब्दप्रवृत्तिर्व्युत्पत्तिनिमित्तस्य प्रवृत्तिनिमित्तत्वेऽपीत्याशयः ॥१.२॥

अवयवशक्तिरूपयोगादेव[१] सर्वशब्दानामर्थावबोधकत्वे शक्तिग्राहकोपदेशातिदेशादितः शक्तिग्रहो दुर्घट एव प्रसज्येत । येन येन वाक्येन पदसन्दर्भविशेषरूपेण शक्तिः प्रतिनियतार्थगोचरा ग्राहयितव्या, तत्र सर्वत्र घटकीभूततत्तत्पदस्य निर्वचनमन्तरेण न शक्तिग्रहस्तमन्तरेण च नाऽर्थावबोधकत्वमित्यवश्यं प्रकृति-प्रत्ययविभजनेन निर्वचनं विधेयम् । तत्रापि प्रकृतिप्रत्ययादीनां नाऽवयवशक्तिग्रहमन्तरेणाऽर्थावबोधकत्वमित्या-वश्यकावयवशक्तिग्रहार्थं तत्रापि यत्किञ्चिन्निर्वचनमाश्रयणीयमित्येवमनवस्थालताऽनिरुद्धप्रसरा प्रकृतार्थ-विबोधबाधायैव स्यादतस्तदपोहाय कस्यचित् पदस्य रूढ्याऽर्थावबोधकत्वमवश्यमभ्युपगन्तव्यम् । एव'म-वयवानां प्रत्येकं रूढिरेव समुदायापेक्षया योग इत्याख्यायते' इत्यवयवशक्त्याऽर्थप्रतिपादकत्ववादिनाऽपि रूढिरादृतैव ।

केवलमवयवस्यैव सा, न तु समुदायस्येति तत्राऽवयवशक्तेः क्लृप्त्वेन तथैव निर्वाहे, न समुदाये शक्तिरतिरिक्ता कल्पनीया गौरवादिति भवति तेषां मतिः । सा न युक्ता । अनेकावयवशक्तिग्रह-तज्जन्यानेकोपस्थितिकारणत्वकल्पनापेक्षयाऽतिरिक्तां समुदायशक्तिं प्रकल्प्य तद्ग्रह-तज्जन्योपस्थितिकारण-त्वकल्पन एव लाघवादित्यादियुक्तिशतोपबृंहितात् 'योगाद्रूढिर्बलीयसी'ति न्यायाद् यदि अध्यात्मपदं रूढमेवाऽभ्युपगम्यते, तदा लौकिकानां परीक्षकाणां च स्वस्वाभिमतमतसमुत्थवासनाप्रभाविता रूढिरध्यात्म-पदस्य बहुविधा समस्तीति तद्ग्रहजन्योपस्थितिविषयत्वेनाऽध्यात्मत्वं प्रत्येकं विभिन्नस्वभावेषु बहुषु प्राप्तम् । तत्र किमादरणीयं किन्नाऽऽदरणीयं, विनिगमनाविरहात् सर्वमेवाऽऽदरणीयमनादरणीयं वेति शङ्कासमुन्मेषोन्मूलनायाऽऽह –

**[२]रूढ्यर्थनिपुणास्त्वाहु-श्चित्तं मैत्र्यादिवासितम् ।**
**अध्यात्मं निर्मलं बाह्य-व्यवहारोपबृंहितम् ॥१.३॥**

**एवम्भूतनये ज्ञेयः, प्रथमोऽर्थोऽत्र कोविदैः ।**
**यथायथं द्वितीयोऽर्थो, व्यवहारर्जुसूत्रयोः ॥१.४॥**

अयमभिप्रायः – विभिन्नमार्गविप्रधाविता बहवः सन्ति लौकिकाः परीक्षकाश्च । परं सर्वेषां तेषां स्वात्मनि प्रामाण्यमनुशीलयतां सङ्ग्रहादिसप्तविधनयान्यतमनयाभ्युपगममर्यादयैवाऽवस्थानं युक्तं, सर्वस्याऽपि

---

१. पदं चतुर्विधम् – १. यौगिकम् २. रूढम् ३. योगरूढम् ४. यौगिकरूढम् च । तत्र यत्राऽवयवार्थ एव बुध्यते तद् यौगिकं यथा पाचकादिपदम् । यत्राऽवयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेणाऽर्थो बुध्यते तद् रूढं यथाऽऽखण्डलादि-पदम् । यत्र तु समुदायशक्तिविषयेऽवयवार्थान्वयोऽप्यस्ति तद् योगरूढं यथा पङ्कजादिपदम् । तत्र कमल-कीटकादीनां पङ्कोद्भवत्वाविशेषेऽपि कमलस्यैव पङ्कजपदजन्यशाब्दबोधविषयत्वस्य सर्वसम्मतत्वात्, अवयवार्थस्य समुदायशक्तिनियम्यत्वात् । यत्राऽवयवार्थ-रूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद् यौगिकरूढं यथा उद्भिदादिपदम् । तत्राऽवयवशक्त्योद्भेदनकर्ता वृक्षादिर्बुध्यते समुदायशक्त्या यागविशेषश्चेति । २. बाह्यव्यवहारोपबृंहितं- सद्धर्माचरणात्मकक्रियापरिकर्मितं मैत्र्यादिवासितं- मैत्री-प्रमोद-कारुण्य-माध्यस्थ्यभावनाभिर्भावितं निर्मलं- विगतक्लेशं चित्तमन्तःकरणं रूढ्यर्थनिपुणाः- लोकप्रसिद्धत्वादिरूपरूढ्यर्थ-प्रतिपादने निपुणा अध्यात्मम्- अध्यात्मपदवाच्यमाहुः- कथितवन्तः ।

समीचीनविचारप्रकारस्य सङ्ग्रहादिनयान्यतम एवाऽन्तर्भावात् । तद्व्युत्क्रान्तस्वतन्त्रविचारपरिशीलनैकशेमुषीणां तु विचाराः सद्युक्तिमार्गबहिर्भूता न स्थेमानमास्तिघ्नुत इति तद्विचारभाजो दुर्नयैकतानहृदया न वस्तुतो लौकिका नाऽपि परीक्षका इति न तेषामध्यात्मचिन्तायामधिकार इति. तत्परिशीलिता रूढिर्नाऽत्रोपयोगिनीति वस्तुस्थितौ; शुद्धसङ्ग्रहे सत्त्वेन महासामान्येनाऽशेषस्य जगत ऐक्यमेव प्रधानतयोररीकुर्वति बाह्याध्यात्मविभागे गजनिमीलिकामातन्वति, अध्यात्मपदरूढ्यर्थघटना न वस्तुतः समञ्जसा । अशुद्धसङ्ग्रहे तु यन्नयविषयावलम्बनेनाऽशुद्धता तन्नयत एव तथाविभागादध्यात्मप्ररूपणा कृतार्थेति न तत्र स्वातन्त्र्यमस्य । नैगमस्तु सामान्यात्मकविषये सङ्ग्रहमुखं विशेषात्मकविषये च व्यवहारमुखमवलोकयन् ताभ्यामेव स्वस्वरूपसिद्धिमातन्वानो नाऽस्मिन्नर्थे तथा प्रागल्भ्यमञ्चति । व्यवहारस्तु विभजनपरो भवत्यत्र कुशलः । तथा ऋजुसूत्रोऽपि क्षणिकतया बाह्याभ्यन्तरभेदभिन्नं जगदेवाऽभ्युपगच्छन्नध्यात्मपदरूढ्यर्थप्रतिपादने कुशल इति व्यवहारर्जुसूत्रनयाभिज्ञा एवाऽत्र रूढ्यर्थनिपुणा ज्ञेयाः ।

शब्दनयस्तु साम्प्रताभिधानो वचनलिङ्गकालपुरुषादिभेदेनाऽर्थभेदमभ्युपगच्छन्नप्यन्यत्र विषये ऋजुसूत्रविचारसमानविचारक एव प्रायः । समभिरूढस्तु व्युत्पत्तिबलेनाऽर्थं शब्दस्योपगच्छन्नप्यत्र विषये एवम्भूतनयादपकृष्ट एव । एवम्भूतनयेन च योगार्थमवलम्ब्याऽध्यात्मस्वरूपं प्ररूपितमेवेति ।

बाह्यव्यवहारोपबृंहितं मैत्र्यादिवासितं चित्तमध्यात्ममेवं निर्मलं चित्तमध्यात्ममिति योगः । तत्र पूर्वमध्यात्मं व्यवहारनयमतेन, द्वितीयमृजुसूत्रनयेन । बाह्यव्यवहारोपबृंहितं बाह्यव्यवहारपरिपुष्टं, न तु बाह्यव्यवहारापहारकृत् । एतेन – 'आत्मैवेदं सर्व'मित्यादिवादाश्रयणेन ब्रह्माद्वैतादेरध्यात्मस्वरूपत्वेऽभ्युपगम्यमाने तत्त्वतो बाह्यव्यवहारोच्छेद एव कृतो भवतीत्यावेदितं भवति ।

[१] यथास्थितासत्तिसमाश्रयणेन मैत्र्यादिवासितं चित्तमध्यात्मं, बाह्यव्यवहारोपबृंहितं चित्तमध्यात्ममित्येवं निरुच्यमाने व्यवहारनयाभिमतस्याऽध्यात्मस्य बाह्यव्यवहारपराङ्मुखत्वम्, ऋजुसूत्रनयाभिमतस्य तस्य वा बाह्यव्यवहारसमनुगतत्वमावेदितं स्यात् । न चैतद् युक्तम् । यतो यद् बाह्यव्यवहारपराङ्मुखं तद् व्यवहारनयाभिप्रेतमेव न भवति, तस्य व्यवहारैकप्राणत्वात् । यच्च बाह्यव्यवहारोपबृंहितं तद् ऋजुसूत्रसम्मतमेव न भवति, तस्य बाह्यप्रथोच्छेदैकप्राणत्वात् । यतः तन्मतावलम्बिनां –

> "चित्तमेव हि संसारो, रागादिक्लेशवासितम् ।
> तदेव तैर्विनिर्मुक्तं, भवान्त इति कथ्यते ॥"

इति वचनमुज्जृम्भते । एतद्वचनेन चित्तस्यैव क्लिष्टत्वेन संसारत्वमक्लिष्टत्वेन भवान्तत्वं– संसाराभावत्वं मुक्तित्वमिति यावदिति प्रतिपाद्यते । तदेतद् बाह्यपदार्थसत्ताधीनसत्ताके बाह्यव्यवहारे जागर्ति सति कथं घटेत ? यत एव यथास्थितासत्तिसमाश्रयणं नाऽभिप्रेतं ग्रन्थकृतः, अत एवाऽग्रे यथाक्रममित्यनुक्त्वा **यथायथ**मित्युक्तम् ।

---

१. "रूढ्यर्थ०" इति श्लोकस्थपदावल्यपेक्षयेदं कथनम् । पूर्वपरिच्छेदे टीकाकृता यथास्थितासत्तिमसमाश्रित्य नयद्वयेनाऽर्थसङ्गतिर्दर्शिता । किमर्थमेवं विहितमित्यस्य कारणचर्चैषा ।

यदि च यथास्थितासत्तितः कथञ्चिदपि निर्वचने सम्भवत्यासत्त्यन्तरकल्पनमनुचितमित्याग्रहः, तदा मैत्र्यादिवासितं चित्तमित्युक्त्यैव बाह्यव्यवहारोपबृंहणमागतमेव । नहि बाह्याभावे तद्व्यवहाराभावे च मैत्र्यादिभावना आत्मानमासादयन्ति; यतश्चित्तव्यतिरिक्तं किञ्चिद् वस्तु न स्यात्, कुत्र मैत्र्यादि भाव्येत? चित्तमलस्य तु चित्तविक्षेपादेर्बाह्याभावेऽपि वासनाद्यान्तरदोषमात्रेण सम्भवितया, तद्राहित्यरूपनिर्मलत्वस्याऽपि दोषापगमतस्सम्भवेन, तादृशस्याऽध्यात्मस्य भक्ष्याभक्ष्य-पेयापेय-गम्यागम्यादि-बाह्यव्यवहारोन्मूलकत्वेन न सन्नयभूतर्जुसूत्रसम्मतत्वम्, किन्तु ऋजुसूत्रनिर्गतनयाभासकल्पितत्वमेवेत्यावेदनायाऽतिनिर्मलचित्तस्यर्जुसूत्र-सम्मतस्य बाह्यव्यवहारोपबृंहितत्वविशेषणं युक्तमेवेति ।

अथवा यथाश्रुतासत्तिसमाश्रयणे निर्मलमित्यत्र विशेष्यतया चित्तं न समन्वियात्, मैत्र्यादिवासितमित्यादिना व्यवहितत्वात् । किन्तु तथाश्रयणे अध्यात्ममिति लक्ष्यनिर्देशः, मैत्र्यादिवासितं चित्तमिति लक्ष्यपदरूढ्यर्थ-स्वरूपं लक्षणम् । तच्च लक्षणं निर्मलं दोषरूपमलविकलं यतः बाह्यव्यवहारोपबृंहितमिति तदेकमेव रूढ्यर्थस्वरूपं यथायथं विशेषणांश-विशेष्यांशभागसमाश्रयणेन व्यवहारर्जुसूत्रयोर्नययोर्मिलितयोर्ज्ञेयो द्वितीयोऽर्थ इत्येवं चतुर्थश्लोकोत्तरार्धं व्याख्यानतः सङ्गमनीयम् । अत एव चाऽर्थस्य द्वितीयत्वविशेषणं सङ्गतिमङ्गति । अन्यथा अध्यात्मपदस्यैको योगार्थः प्रथममुपदर्शितः, रूढ्यर्थौ च द्वौ व्यवहारर्जुसूत्रसमाश्रिताविति त्रयोऽर्थाः स्युरिति तृतीयश्लोकप्रतिपाद्ययोरर्थयोरेकीकृत्य द्वितीयत्वाभिधानं रूढ्यर्थत्वैकोपाधितो लाक्षणिकं स्यादिति विचारणीयं सुधीभिः ॥१.३-४॥

रागद्वेषराहित्येन सद्युक्तिसमाश्रयणतः पक्षपातरहितस्यौदासीन्यं भजतो मध्यस्थस्य स्याद्वादप्रमाण-राजपरिकर्मितमतेः स्याद्वादिन एव यौगिकार्थ-रूढ्यर्थभेदसन्दर्शिताध्यात्मस्वरूपावधानकुशलत्वेनाऽध्यात्म-स्वामित्वं, नाऽन्यस्य वादिन इत्युपदर्शनायाऽऽह –

**गलन्नयकृतभ्रान्ति-र्यः स्याद् विश्रान्तिसम्मुखः ।**
**स्याद्वादविशदालोकः, स एवाऽध्यात्मभाजनम् ॥१.५॥**

अत्र **नय**पदेन नयाभास एव विवक्षितः । सुनयस्य तु प्रमाणोपदर्शितवस्त्वंशविषयकत्वेन तज्जनित-ज्ञानस्य यथा न प्रमात्वं तथाऽप्रमात्वमपि नैव । यतोऽवस्तुविषयकस्यैव ज्ञानस्य भ्रान्तित्वम् । नय-विषयस्य वस्त्वंशस्य नाऽवस्तुत्वम्,

"नाऽयं वस्तु, ना चाऽवस्तु, वस्त्वंशः कथ्यते बुधैः ।
नाऽसमुद्रः समुद्रो वा, समुद्रांशो यथैव हि ॥" [ ]

इति वचनात् । तथा च स्याद्वादविशदालोकस्य स्याद्वादिनः स्याद्वादसंस्कृतनयोपनीताध्यात्मपरिशीलनेऽपि न नयकृतभ्रान्त्यवसरः ।

अतिमूढस्याऽध्यात्मा-ऽनध्यात्मकथाबहिष्कृतस्याऽपि नयकृतभ्रान्तिरहितत्वं स्वरूपतः समस्ति, न त्वध्यात्मभाजत्वमित्यत उक्तं **विश्रान्तिसम्मुख** इति । अत्र विश्रान्तिपदेन भवभ्रमणविरामः चिदानन्दस्वरूपे स्वात्मन्यवस्थानलक्षणो मोक्षो वाऽभिप्रेतः । तत्सम्मुखत्वं च यथाशक्ति तदुपायभूतज्ञानदर्शनचारित्रादि-समाचरणम् ।

**स्यादि**ति च क्रियापदम् । अनेकान्तद्योतक'स्यादि'तिक्रियाप्रतिरूपकनिपातनरूप-स्यात्पदघटितमेव 'स्याद्विश्रान्तिसम्मुख' इति विशेषणपदमित्यपि कस्यचिद् विदुषोऽभिमतम् । तत्र-अनेकान्तत्वस्य वस्तुमात्रसमाश्रितत्वेऽनेकान्तेऽप्यनेकान्तत्वमभ्युपेयम्, अन्यथाऽनेकान्तस्यैकान्तत्वेन यथा भावस्तथा पदार्थान्तराणामपीत्येकान्तवाद एव कान्तः स्यात् । तथा चाऽनेकान्तेऽनेकान्तत्वमेकान्तत्वा-ऽनेकान्तत्वाभ्यामिति प्राप्तम् । तत्रैकान्तत्वमिति स्वीकृते तत्र यथैकान्तत्वं तथाऽन्यत्राऽप्येकान्तत्वं किमिति नाऽभ्युपेयम् ? । एवमनेकान्ते यदपरमनेकान्तत्वं तत्राऽप्यपरमनेकान्तत्वमेवं तत्राऽप्यनेकान्तत्वमित्यविश्राम एवेत्येवमनेकान्तवादिनः प्रति दोषमुपक्षिपत एकान्तवादिनः प्रति स्यादित्यनेकान्तप्रतिपादकेन या विश्रान्तिः अनेकान्तेऽपि स्यादनेकान्तत्वम् । सर्वथाऽनेकान्तत्वाभ्युपगमे स्यादेकान्तत्वापत्तिः । न चाऽनवस्था, तृतीयानेकान्तत्वस्य प्रथमानेकान्तत्वरूपत्वात्, तुर्यानेकान्तत्वस्य द्वितीयानेकान्तत्वरूपत्वात् इत्येवमविश्रान्तिरूपाऽनवस्थापरिहृतिः । पाक्षिकैकान्तत्वप्राप्तावपि तस्य स्यादर्थकिंवृत्तचिदर्थसमन्वितत्वेनैव व्यवस्थितिश्च । तया सम्मुखः प्रतिबोधनाप्रतिघसामर्थ्यवानित्यर्थः ।

यथावत्तत्त्वावबोधविकलस्याऽसमग्रवस्तुविदुषो वा परवादिकृतपराजयभयाद् यथावत्तत्त्वासमर्थनभयाद् वा पराङ्मुखता भवति । नाऽयमेतादृश इत्यावेदनायाऽऽह – **स्याद्वादविशदालोक** इति । स्याद्वादेन विशदालोको विस्पष्टबोधो यस्य स तथेत्यर्थः ।

यद्यपि केवलज्ञानातिरिक्तज्ञानमात्रस्य क्षायोपशमिकत्वेन सावरणतया स्याद्वादजन्यस्याऽपि ज्ञानस्य सर्वथास्पष्टत्वलक्षणं विशदत्वं नाऽस्ति; तथापि "स्याद्वाद-केवलज्ञाने सकलार्थावभासने"[ ] इति वचनात् स्याद्वादजन्यस्य ज्ञानस्य सकलार्थावभासित्वलक्षणं वैशद्यं समस्त्येवेति ।

अथवा एवम्भूतनयेन योगार्थविशेषस्याऽध्यात्मत्वं व्यवहारर्जुसूत्रनयाभ्यां रूढ्यर्थविशेषस्याऽध्यात्मत्वं प्रतिपाद्य प्रमाणेनाऽध्यात्मस्वरूपं प्रतिपादयति – **गलन्नयकृतभ्रान्ति**रिति । अत्र **स्याद्वादविशदालोक** इत्यस्य स्याद्वादेन विशदालोक इति विग्रहश्रयणात् स्याद्वादजन्यो विशदावबोध इत्यर्थः । **स एवे**त्येवकारेण पूर्वोपदर्शितयोर्योगार्थ-रूढ्यर्थयोर्व्यवच्छेदः । **अध्यात्मभाजन**मित्यस्याऽध्यात्मपदप्रतिपाद्यमित्यर्थः । स्याद्वादविशदालोकस्य गलन्नयकृतभ्रान्तित्वं विश्रान्तिसम्मुखत्वं च विशेषणं तीर्थान्तरीयशास्त्रजन्यविज्ञानाद् युक्तिमात्रप्रभविताद् ज्ञानाच्च वैलक्षण्यप्रतिपत्तये । तीर्थान्तरीयशास्त्रस्य नयप्रकृतिकत्वेन तज्जन्यज्ञाने नयकृतभ्रान्तित्वस्याऽवश्यंभावात् । युक्तीनां स्वस्वकल्पनाकोषसमुत्थितानां प्रमाणनिरपेक्षाणां जातिप्रायत्वेन तज्जनितज्ञानस्य विश्रान्तिसम्मुखत्वाभावात् । स्याद्वादविशदालोकस्य तु प्रतिनियतस्वस्वनिमित्तापेक्ष्यतत्तद्धर्मावगाहित्वेन, अन्यापादितदोषसमूहापोहप्रगल्भ-स्यादर्थसङ्घटितार्थविषयकत्वेन च नयकृतभ्रान्तिराहित्यस्य विश्रान्तिसम्मुखत्वस्य चाऽवश्यंभावात् ॥१.५॥

पक्षपातरहितैः स्याद्वादिभिराद्रियमाणा युक्तय एव सद्युक्तयः, तासां च प्रमाणोपष्टम्भकत्वेन तज्जनितज्ञानस्याऽध्यात्मत्वम् । अन्यतीर्थिकैश्च स्वस्वमतकदाग्रहाविष्टचित्तैर्बलवता संरम्भेण येन केन प्रकारेणाऽऽकृष्यमाणाश्च युक्तयः प्रमाणोपष्टम्भविकला युक्त्याभासा एव । तैश्च वस्तुतो नाऽर्थनिश्चय इति तज्जनितज्ञानस्य भ्रान्तिरूपत्वेन नाऽध्यात्मत्वमित्येतदेव प्रपञ्चत उपदर्शयति –

**मनोवत्सो युक्तिगवीं, मध्यस्थस्याऽनुधावति ।**
**तामाकर्षति पुच्छेन, तुच्छाग्रहमनःकपिः ॥१.६॥**

अयं च –

"आग्रही बत निनीषति युक्तिं, तत्र यत्र मतिरस्य निविष्टा ।
पक्षपातरहितस्य च युक्ति–र्यत्र तत्र मतिरेति निवेशम् ॥"[ ] इति प्राचीनपद्यानुवादी।

एतदभिसन्धानेनैवोक्तं हरिभद्रसूरिभिः –

"पक्षपातो न मे वीरे, न द्वेषः कपिलादिषु ।
युक्तिमद् वचनं यस्य, तस्य कार्यः परिग्रहः ॥"[ ]

अत्र कषच्छेदतापनिमित्ता एव युक्तयो युक्तिपदेन ग्राह्या, न तु तीर्थान्तरीयाणां परस्परोपमर्दप्रवृत्ता इति बोध्यम् ॥१.६॥

कदाग्रहाकृष्टयुक्तीनामनर्थजनकत्वेन अर्थाप्रापकत्वेन च न विश्रान्तिसम्मुखत्वमित्युपदर्शयति –

**अनर्थायैव नाऽर्थाय, जातिप्रायाश्च युक्तयः ।**
**'हस्ती हन्ती'ति वचने, प्राप्ताप्राप्तविकल्पवत् ॥१.७॥**

एवकारेणैव 'नाऽर्थाये'ति सिद्धे यत् पृथगुपादानं, तत् कासांचिद् युक्तीनां नाऽनर्थकारित्वं नाऽप्यर्थकारित्वं, तासामपि न विश्रान्तिसम्मुखत्वमित्युपदर्शनाय ।'

किं सर्वा एव युक्तय एवंविधा एव ? नेत्याह – **जातिप्रायाश्चे**ति । असदुत्तरं जातिः, तत्प्रायास्तदात्मानस्तत्सदृशा वा युक्तयोऽनर्थकारिण्योऽर्थाप्रापिकाश्च । नाऽन्याः प्रमाणबलोपबृंहिता इत्यर्थः ।

यथा केनचिन्निष्कपटहृदयेन नवीनार्थक'नव'पदसङ्घटितं "नेपालादागतोऽयं नवकम्बलवा"नित्युक्तम् । अन्यश्च तस्याऽसत्यभाषित्वख्यापनाय वक्ति – "अस्य दरिद्रस्य कम्बलद्वयमपि न समस्ति, कुतो नवसङ्ख्यकाः कम्बला" इति वक्त्रनभिप्रेत–नवसङ्ख्यार्थकत्वं 'नव'पदस्य प्रकल्प्य सोल्लुण्ठवचनमित्याद्या वचनयुक्तयो जातिप्राया ग्राह्याः ।

तत्राऽनर्थमात्रकारित्वे दृष्टान्तमाह – **हस्तीति** । **प्राप्ताप्राप्तविकल्पवदि**ति आगच्छन्तं हस्तिनमवलोक्य तत्पथोपसर्पन्तं व्यवहारानभिज्ञं तार्किकं प्रति 'नैतन्मार्गेण त्वं गच्छे'रित्यभिप्रायेण कुशलाभिसन्धिना केनचिदुक्तं "हस्ती हन्ती"ति । पण्डितम्मन्यस्तु तार्किकः 'कथमेतद्वचनमात्रेणैवाऽहमपसरामी'त्यभिमानेन तद्वचनं यावद् विकल्पयति – "किं हस्ती प्राप्तं हन्ति अप्राप्तं वा ? प्राप्तस्य हनने स्वस्कन्धारूढं पालकमेव प्रथमं हन्यात्, अप्राप्तस्य हनने अप्राप्तमशेष"मिति; तावदेव समीपागतकरिकराक्रान्तचरणो यमसदनमुपगत इत्येतादृशविकल्पयुक्तेरनर्थमात्रकारित्वं सुप्रसिद्धमित्यर्थः ॥१.७॥

ननु तीर्थान्तरशास्त्रोपनीतसाधनज्ञानतोऽतीन्द्रियपरमाण्वाद्यर्थावबोधलक्षणफलस्य दर्शनेन तद्युक्तीनामर्थकारित्वमेव, न तदभाव इत्याक्षेपप्रतिविधानाय तत्रैवाऽर्थकारित्वाभावमुपपादयन् तत्र तद्युक्तीनामेव दृष्टान्तत्वमर्थत उपदर्शयति –

**ज्ञायेरन् हेतुवादेन, पदार्था यद्यतीन्द्रियाः ।**
**कालेनैतावता प्राज्ञैः, कृतः स्यात् तेषु निश्चयः ॥१.८॥**

**तेषु**- अतीन्द्रियार्थेषु ॥१.८॥

स्याद्वादविशदालोकस्यैव यथावदतीन्द्रियार्थप्रतिपादकत्वेनाऽर्थकारित्वं सयुक्तिकत्वेन च सम्पूर्णदृष्टि-स्वभावत्वेन नयकृतभ्रान्तिराहित्यतो विश्रान्तिसम्मुखत्वतोऽनर्थाजनकत्वं चेत्यतोऽध्यात्मभाजनत्वमित्यावेदनाया-ऽऽह —

**आगमश्चोपपत्तिश्च, सम्पूर्णं दृष्टिलक्षणम् ।**
**अतीन्द्रियाणामर्थानां, सद्भावप्रतिपत्तये ॥१.९॥**

न च पूर्वं स्याद्वादावगमजन्यबोधस्याऽध्यात्मभाजनत्वमुपवर्णितम्, इदानीमागमोपपत्त्युभयजन्यावगमस्य तत्त्वमुपवर्ण्यत इति स्यात् सन्दर्भविरोध इति साम्प्रतम् । नयकृतभ्रान्तिराहित्य-विश्रान्तिसम्मुखत्वविशिष्टस्यैव तस्याऽध्यात्मभाजनत्वेन प्रतिपादितत्वात् तादृशविशेषणद्वयसाम्राज्यस्योपपत्त्युपेतागमजन्यज्ञान एव भावात् ।

ननु चतुर्दशरज्जुप्रमाणलोको धर्माधर्मद्वयपरिच्छिन्नशरीर इत्यादिरर्थः केवलागमगम्य एव । श्रुताविषयो[१]ऽप्यर्थः समस्ति, स चोपपत्तिमात्रनिर्णयक इति तत्र सम्पूर्णदृष्टित्वाभावप्रसङ्ग इति चेद्[२];

नैवम्, ऊर्ध्वगमनैकस्वभावस्य जीवस्य मुक्तिदशायां यन्निबन्धनं सिद्धिशिलोपलक्षितप्रतिनियतदेश-पर्यन्तमेव गमनं, तत्रैव स्थितिश्च, तत्परतश्च गमनाभाव-स्थित्यभावौ यदभावनिबन्धनौ, तयोर्गत्युपष्टम्भक-स्थित्युपष्टम्भकव्यवस्थात एव लोकव्यवस्था । तत्र चोपपत्तिरपि प्रभवत्येव । क्वचिद् विशेषतस्तदस्फुरणं चर्मचक्षुषां तथाविधक्षयोपशमविशेषाभावादेव, नतूपपत्त्यभावात् । स्याद्वादोपदर्शितेषु बहुषु पदार्थेषु यथोपदर्शनं तथैवोपपत्तिसद्भावे, यत्रापि विशेषत उपपत्तिर्न परिस्फुरति, तत्रा'प्ययमर्थोऽनेन प्रकारेणोपपन्न एव, अनेनैव प्रकारेण प्रमाणभूतेन स्याद्वादेन दर्शितत्वात्, तथोभयसम्प्रतिपन्नपदार्थव'दित्येवं सामान्यत उपपत्तेस्तत्राप्युन्नयनात् । श्रुताविषयोऽप्यर्थः श्रुताविषयत्वेन रूपेणाऽऽगमप्रतिपाद्य एवेति प्रभवति तत्राप्यागम इति बोध्यम् ।

**सद्भावे**ति यद्यप्यतीन्द्रियार्थप्रतिपत्तिः केवलेनाऽऽगमेन केवलया चोपपत्त्या सम्भाव्यते; तथाप्युत्पाद-व्ययध्रौव्यलक्षणं यत् सत्त्वं सद्भावः, तस्य प्रतिपत्तिरवधारणमतीन्द्रियाणामर्थानां प्रत्यक्षगोचरातिक्रान्ता-नामागमयुक्तिभ्यामेव सम्भवति ।

न चैवमतीन्द्रियार्थेषु आगमोपपत्त्योः सम्पूर्णदृष्टित्वाभ्युपगतौ सत्यामैन्द्रियकेष्वर्थेषु सांव्यवहारिक-प्रत्यक्षादेरपि संपूर्णदृष्टिताऽभ्युपगता स्यादिति तस्याऽप्यध्यात्मभाजनत्वं प्रसक्तमिति वाच्यम्;

---

१. श्रुतज्ञानाविषयीभूतः । २. जैनदर्शने इयं व्यवस्था- अतीन्द्रियपदार्थानां छद्मस्थबुद्ध्यविषयत्वादागमप्रामाण्यात्मक-सर्वज्ञवचनग्राह्यत्वमेव, अतस्ते आगमवादान्तर्गताः । इन्द्रियग्राह्यपदार्थानां पुनः प्रत्यक्षानुमानादिविषयत्वाद् हेतुवादान्त-र्गतत्वम् । आगमवादे आगमप्रामाण्यमेव प्रधानं, हेतुवादे तु युक्तिप्रचारस्यैव स्वीकरणीयत्वमिति प्रामाणिकी व्यवस्था । परमिदं तु ध्येयं यदियं पदार्थानामाद्यनिश्चयापेक्षयैव । यत आगमवादेऽपि तत्तत्पदार्थानां स्वरूपसमी-चीनत्वनिर्णयार्थं युक्तिप्रचारावकाशोऽस्त्येव । एवं युक्तिवादेऽपि चरमनिर्णयमुद्रा तु आगमप्रामाण्याधीनैवेति ।

यत अर्थानामिति विशेषोक्त्याऽर्यन्ते ज्ञानेन परिच्छिद्यन्त इत्यर्था अनन्तधर्मात्मकवस्तुस्वभावा एव विवक्ष्यन्ते, ते च सर्वेऽनन्तधर्मेषु मध्ये केषाञ्चिदैन्द्रियकत्वेऽपि केषाञ्चिदतीन्द्रियत्वेन तदात्मनाऽतीन्द्रिया एवेति न सांव्यवहारिकप्रत्यक्षादेस्तदवगाहकत्वमिति न तस्य कुत्राप्यनन्तधर्मात्मके वस्तुनि सम्पूर्णदृष्टित्वेनाऽध्यात्मभाजनत्वमित्याशयः ॥१.९॥

ननु स्पष्टज्ञानस्यैव विशेषतस्तत्त्वसाक्षात्कारितया दृष्टित्वं घटते इति सम्पूर्णदृष्टित्वं केवलस्यैव नाऽन्यस्य कस्यचित्, केवलज्ञानातिरिक्तज्ञानमात्रस्याऽनन्तधर्मात्मना विशेषतस्तत्त्वसाक्षात्कारित्वाभावादितीदानीं केवलमेव केवलमध्यात्मभाजनं, नाऽन्यदिति सर्वाऽपि पूर्वा प्रक्रिया व्युच्छिन्ना स्यादित्यत आह –

**अन्तरा केवलज्ञानं, छद्मस्थाः खल्वचक्षुषः ।**
**हस्तस्पर्शसमं शास्त्र-ज्ञानं तद्व्यवहारकृत् ॥१.१०॥**

सत्यं, केवलज्ञानमेव परमार्थदृष्ट्याऽध्यात्मम् । 'उपयोगलक्षणो जीव' [तत्त्वार्थ० -, २.७] इत्यात्मलक्षणस्योपयोगस्य सर्वस्य वस्तुस्थित्या सर्वविषयकत्वस्वभावस्य केवलज्ञानरूपतैव । परं छद्मस्थावस्थानां सर्वथावरणक्षयाभावान्न तथा तत् प्रकटमित्यप्रकटावस्थितं तदेव क्षयोपशमविशेषतः केनचिदंशेन प्रकटितं मत्यादिज्ञानपर्यायमश्नुते ।

तत्र योऽस्य स्याद्वादविशदावलोकाख्यः पर्यायः तस्य सामान्यतोऽनन्तधर्मात्मकवस्त्ववभासित्वेन यथा केवलज्ञानसादृश्यं, तथा नाऽन्यस्य कस्यचिज्ज्ञानस्येति छद्मस्थावस्थायां तस्य सम्पूर्णदृष्टित्वेनाऽध्यात्मभाजनत्वमभिमतमिति न कश्चिद् दोषः ।

श्लोकार्थस्तु - **अन्तरा केवलज्ञानं**- केवलज्ञानं विना, केवलज्ञानरूपचक्षुर्विकलत्वेनेत्यर्थः । **छद्मस्थाः खल्वचक्षुषः**- खलु- निश्चयेन पारमार्थिकदृष्ट्या, अवधारणार्थो वा खलुः, अचक्षुष एव अन्धा एव छद्मस्थाः । तथापि प्रतीतानामन्धानां यथा **हस्तस्पर्शेन** पदार्थपरिज्ञानाद् व्यवहारः, तथा **शास्त्रज्ञानं** हस्तस्पर्शकल्पं छद्मस्थ**व्यवहारकृद्** भवतीति ॥१.१०॥

यतश्च शास्त्रज्ञानस्यैव छद्मस्थावस्थायां सम्पूर्णदृष्टित्वं तत एव तद्विकलस्य स्वकल्पनबुद्ध्या सम्यगीहमानस्याऽप्याचरणमनर्थायैवेति समयोक्तदृष्टान्ततः प्रकटयति –

**शुद्धोञ्छाद्यपि[१] शास्त्राज्ञा-निरपेक्षस्य नो हितम् ।**
**भौतहन्तुर्यथा तस्य, पदस्पर्शनिषेधनम् ॥१.११॥**

ननु परकीयमपि शास्त्रं शास्त्रमेव । उपपत्तयश्च सूक्ष्मार्थधीनिधानैः परैराधीयमानास्तत्सहकारिण्यो वर्तन्त एव । अतस्तज्जनितज्ञानमपि शास्त्रज्ञानत्वात् कुतो नाऽध्यात्मभाजनमित्यत आह –

**शासनात् त्राणशक्तेश्च, बुधैः शास्त्रं निरुच्यते ।**
**वचनं वीतरागस्य, तच्च नाऽन्यस्य कस्यचित् ॥१.१२॥**

१. शुद्धोञ्छादि- दोषमुक्तान्नपानाद्यासेवनम् । तद् गुणवदपि शास्त्राज्ञानिरपेक्षस्य तादृशशुद्धबोधविकलस्य जिनवचनोपेक्षारूपमहादोषोपहतत्वादहितकार्येव भवति ।

तथा च बुधाभिमतशास्त्रपदव्युत्पत्तिनिमित्तस्य वीतरागोक्तस्याद्वादागमे एव भावात् तदेव शास्त्रमतस्तज्जनितज्ञानस्यैवाऽध्यात्मत्वमिति भावः ॥१.१२॥

ननु स्वस्वमन्तव्यानुसारेण शासनं विधिनिषेधप्रपञ्चनेन त्राणशक्तिश्च परागमेष्वपि दृश्यत एव । तच्च शासनं परप्रतारणमेव, विधिनिषेधप्रपञ्चनमपि विसंस्थुलमेव, परीक्षकाणां तत्राऽनाश्वासादिति यदि तदेतत् सर्वं जिनवचनेऽपि समानमित्यत आह –

**वीतरागोऽनृतं नैव, ब्रूयात् तद्धेत्वभावतः ।**
**यस्तद्वाक्येष्वनाश्वास-स्तन्महामोहजृम्भितम् ॥१.१३॥**

अन्येषामागमप्रणेतृणां रागोपकरणसद्भावस्य परैरेव प्रपञ्चनान्न वीतरागत्वमतस्तद्वचने भवत्यन्यथाभावसम्भावनयाऽनाश्वासः । अत एव परप्रतारणादिकमपि तत्र सम्भाव्यते । कषच्छेदतापशुद्ध्यादिविचारणायां नोपपद्यते कषशुद्ध्यादिस्तत्रेति परीक्षकाणामप्यनाश्वासस्तत्र सम्भवति । स्याद्वादागमप्रणेतुस्तु वीतरागत्वादेव नाऽनृतभाषित्वमिति युक्तं तत्र सम्यगनुशासनं, त्राणशक्तिश्च समीचीना, कषशुद्ध्यादयश्चाऽत्र समनुगताः । अतो न परीक्षकाणां मनागप्यनाश्वासः । कस्यचित्तु दुर्विदग्धस्याऽनाश्वासो महामोहविजृम्भितो भवन्नपि न प्राज्ञैरादरणीय इति ।

**तद्धेत्वभावतः**:- अनृतवचनहेतो रागद्वेषमोहादेरभावात् । एवं सत्यपि **तद्वाक्येषु**- वीतरागवचनेषु यो**ऽनाश्वासः**:- अश्रद्धानम् ॥१.१३॥

ननु तदेवाऽध्यात्मं भवितुमर्हति यदवाप्त्याऽभीष्टं प्रकृष्टं किञ्चित् स्यान्निर्वाणसुखं वा । स्याद्वादविशदावलोकात्तु न किञ्चित् तथाविधमात्मनो भवति । तथापि तस्याऽध्यात्मत्वप्रकल्पनमाग्रहविजृम्भितमेवेत्यत आह –

**शास्त्रे पुरस्कृते तस्माद्, वीतरागः पुरस्कृतः ।**
**पुरस्कृते पुनस्तस्मिन्, नियमात् सर्वसिद्धयः ॥१.१४॥**

शास्त्रपुरस्कारस्तु – "शास्त्रमिदमेतदर्थसाक्षात्कारिरागद्वेषरहितपुरुषविशेषप्रणीतत्वेन प्रमाणम्, अर्थश्चाऽस्य प्रत्यक्षादिप्रमाणैरबाधित" इत्येवमवबुद्ध्याऽभ्युपेत्य च तद्विधिबोधितहिताचरणं तन्निषिद्धाहितानाचरणं च । एवंरूपेण पुरस्कृतं शास्त्रं तदैव स्याद्, यदि तत्प्रणेता वीतरागस्तदर्थानुष्ठानसमये हृदये स्मृत्या यथावदधिरूढः स्यात् । एवं च वीतरागपुरस्कारस्तस्य स्वात्मनि सर्वथैक्यभावनया व्यवस्थापनम् । अस्य च पौनःपुन्येन प्रवृत्तौ प्रान्ते केवलज्ञानाविर्भावान्निखिलकर्मक्षयतोऽवश्यंभाविनी निराबाधानन्दमयी मुक्तिरानुषङ्गिन्यश्च सर्वसिद्धयः पुरस्तादाविर्भवन्तीति भवत्यभीष्टफलप्रत्यलत्वेनाऽध्यात्मत्वं स्याद्वादविशदालोकस्येति ।

अन्वयार्थस्तु – **शास्त्रे पुरस्कृते** सति **तस्मा**च्छास्त्रपुरस्काराद् **वीतराग**स्तत्प्रणेता जिनः **पुरस्कृतो** भवति । तस्मिन् वीतरागे **पुरस्कृते पुनर्नियमाद**वश्यम्भावतः **सर्वसिद्धयो** भवन्तीति ॥१.१४॥

अमुमेव पुरस्कारं परमप्रकर्षमुपगतं योगस्य चरमसीम्नि व्यवस्थितं सिद्धिसाधनधौरेयतामाबिभ्राणं संज्ञाभेदेन परे योगस्वरूपावधारणकुशलाः परिकीर्तयन्ति । नाऽतोऽस्य सिद्धिं प्रति पृथक्कारणताकल्पनगौरवबिभीषिकावकाश इत्याशयेनाऽऽह –

**एनं[1] केचित् समापत्तिं, वदन्त्यन्ये ध्रुवं पदम् ।**
**प्रशान्तवाहितामन्ये, विसभागक्षयं परे ॥१.१५॥**

अत एव च शास्त्रचक्षुष्टं योगिनामुपपत्तिपद्धतिमियर्तीत्याह –

**चर्मचक्षुर्भृतः सर्वे, देवाश्चाऽवधिचक्षुषः ।**
**सर्वतश्चक्षुषः सिद्धा, योगिनः शास्त्रचक्षुषः[2] ॥१.१६॥**

**सर्वे**- देव-सिद्ध-योगिभिन्नाः प्राणिनः । देवादीनां चर्मचक्षुषः सद्भावेऽपि नाऽतो विशिष्टाऽर्थदृष्टिः, किन्त्ववध्यादित एवेति तस्याऽसत्कल्पत्वमभिप्रेत्यैवमुक्तिः । **सर्वतश्चक्षुषः**:- सर्वविषयनिरीक्षणप्रवणकेवल-नयनभाजः ॥१.१६॥

जैनागमे कषशुद्ध्यादयो विद्यन्तेऽन्यत्र न विद्यन्तेऽतोऽस्यैव शास्त्रत्वं, तज्जनितज्ञानस्यैवाऽध्यात्म-भाजनत्वमित्युपपादयति –

**परीक्षन्ते कषच्छेद-तापैः स्वर्णं यथा जनाः ।**
**शास्त्रेऽपि वर्णिकाशुद्धिं, परीक्षन्तां तथा बुधाः ॥१.१७॥**

**वर्णिकाशुद्धिं**- विधिनिषेधोपवर्णनं वर्णिका, तस्याः शुद्धिं कषच्छेदतापशुद्धिलक्षणाम् । **बुधा** इति पक्षपातरहिताः स्वपरसिद्धान्ताभिज्ञा मध्यस्था एव गृह्यन्ते, तेन कदाग्रहग्रहिल-पक्षपातपरायण-पण्डितम्मन्याभिनिवेशसमुत्था-ऽयथावत्परीक्षया कषशुद्ध्यादेर्विनिमयेऽपि न क्षतिः ॥१.१७॥

तत्र कषशुद्धिं स्वरूपतो लक्षयति –

**विधयः प्रतिषेधाश्च, भूयांसो यत्र वर्णिताः ।**
**एकाधिकारा दृश्यन्ते, कषशुद्धिं वदन्ति ताम् ॥१.१८॥**

**यत्र**- यस्मिन् शास्त्रे । **एकाधिकारा**- एकोद्देशेन प्रवृत्ताः ॥१.१८॥

इयं च कषशुद्धिर्जैनागमे समस्तीत्याह –

**सिद्धान्तेषु यथा ध्याना-ध्ययनादिविधिव्रजाः ।**
**हिंसादीनां निषेधाश्च, भूयांसो मोक्षगोचराः ॥१.१९॥**

**सिद्धान्तेष्विति** जैनागमेष्वित्यर्थः । **मोक्षगोचरा** इत्यनेन विधि-निषेधयोरेकगोचरत्वं स्पष्टीकृतम् ॥१.१९॥

---

१. एनं- शास्त्रपुरस्काराक्षिप्तवीतरागपुरस्कारं पातञ्जलयोगदर्शनानुसारिणः समापत्तिं (तद्रूपं परिणामं) वदन्ति (योगसूत्र-१.४१) । महाव्रतिकास्तु ध्रुवं पदं (अविनाश्याशयस्थानं) कथयन्ति । साङ्ख्याः पुनः प्रशान्तवाहितां (-विशुद्धचित्तसंस्कारात्मिकां) वर्णयन्ति । बौद्धमते त्वेष 'विसभागक्षय' (-निर्विकल्पाध्यक्षसन्तति) पदेनोच्यते । दृश्यतां योगदृष्टिसमुच्चयकारिका - १७६ । २. योगिनां चर्मचक्षुषोः सत्त्वेऽपि हेयोपादेयविवेके विधिनिषेधसाध्ये कार्ये वा न प्राधान्येन तदुपयोगः, शास्त्रज्ञानमेव तत्र प्रभवतीति योगिनां शास्त्रचक्षुष्ट्वम् ।

गौणीकृतमोक्ष-प्रधानीकृतार्थकामाधिकारा-ऽनल्पकल्पनोपनीतकथोद्बोधप्रवणविधिनिषेधगुम्फितस्य त्वन्यशास्त्रस्योक्तकषशुद्धिलक्षणविकलत्वेन न कषशुद्धिमत्त्वमित्यर्थतः प्रकटयति –

**अर्थकामविमिश्रं यद्, यच्च क्लृप्तकथाविलम् ।**
**आनुषङ्गिकमोक्षार्थं, यन्न तत् कषशुद्धिमत्[१] ॥१.२०॥**

छेदशुद्धिस्वरूपं लक्षयति –

**विधीनां च निषेधानां, योगक्षेमकरी क्रिया ।**
**वर्ण्यते यत्र सर्वत्र, तच्छास्त्रं छेदशुद्धिमत् ॥१.२१॥**

**योगक्षेमकरी**ति विहितानुष्ठानमङ्गोपाङ्गक्रियाकलापोपेततया तद्विधीनां योगः, उत्तरोत्तरमपि भूयस्तथैवाऽनुगमनं न तु विपरीततया तत्तत्संरक्षणपर्यवसितं क्षेमः; प्रतिषिद्धस्याऽननुष्ठानमकरणाकारितानुमत्यादिभिः तन्निषेधानां योगः, तथैवोत्तरोत्तरकालं कदाचिदप्यनाचरणं क्षेमः, तत्करी- तत्सम्पादनप्रवणा ॥१.२१॥

इयं च छेदशुद्धिः जैनागमे समस्तीत्युपदर्शयति –

**कायिकाद्यपि कुर्वीत, गुप्तश्च समितो मुनिः ।**
**कृत्ये ज्यायसि किं वाच्य-मित्युक्तं समये यथा ॥१.२२॥**

**कायिकाद्यपी**ति मूत्रविसर्जनाद्यपीत्यर्थः ॥१.२२॥

यत्र चोत्सर्गस्य सामान्यशास्त्रस्य विषयोऽन्यार्थकः, अपवादस्य विशेषस्य विषयस्तदन्यार्थकः, तच्छास्त्रं न च्छेदशुद्धिमदित्याह –

**अन्यार्थं किञ्चिदुत्सृष्टं, यत्राऽन्यार्थमपोह्यते ।**
**दुर्विधिप्रतिषेधं तद्, न शास्त्रं छेदशुद्धिमत्[२] ॥१.२३॥**

यथा "मा हिंस्यात् सर्वभूतानी"ति [ ] सामान्यशास्त्रविषयः सर्वप्राणिहिंसानिषेधोऽनिष्टनिवृत्त्यर्थकः; "वायव्यं श्वेतं छागमालभेत भूतिकाम" इति [ ]विशेषशास्त्रविषयो वायुदेवतोद्देश्यक-श्वेतछागालम्भनरूपप्राणिहिंसनं भूत्यर्थकमिति **उत्सृष्टम्**- उत्सर्गविषयः, **अपोह्यते**- अपोद्यते उत्सर्गविषयत्वात् प्रच्याव्यत इति यावत् ॥१.२३॥

विधायकशास्त्रेण निषिद्धस्येष्टसाधनत्वप्राप्तावपि निषेधशास्त्रबोधितमनिष्टसाधनत्वं ततो न परावर्तते, भिन्नापेक्षयैकत्रेष्टसाधनत्वा-ऽनिष्टसाधनत्वयोरुभयोरपि सम्भवेन सामान्यस्य निषेधशास्त्रस्य विशेषविधिशास्त्रविषयातिरिक्तविषयनिषेधपरत्वेन सङ्कोचनस्य युक्तिमार्गातीतत्वादित्याशयेनाऽऽह –

---

१. पञ्चवस्तुकादौ मोक्षोद्देशकानामपि रागादिक्षयाक्षमविधानपरायणानां सावद्यकार्यविषयकस्थूलाव्यापक-निषेधपराणां शास्त्राणां कषशुद्धिविरहितत्वमावेदितमस्ति । एतदप्यत्रोपलक्षणेनाऽन्तर्भाव्यम् । २. यत्र शास्त्रे यत्किञ्चित् प्रयोजनमुद्दिश्योत्सर्गतया प्रकाशितं विधेयादि प्रयोजनान्तरमुद्दिश्याऽपवादविषयीक्रियते तद् भिन्नाधिकारविधिनिषेधगुम्फितं शास्त्रं छेदशुद्धिविरहितं भवति इति भावः ।

**निषिद्धस्य विधानेऽपि, हिंसादेर्भूतिकामिभिः ।**
**दाहस्येव न सद्वैद्यै-र्याति प्रकृतिदुष्टता ॥१.२४॥**

**प्रकृतिदुष्टता**- हिंसात्वस्वभावप्रयोज्यानिष्टसाधनता, **न याति**- नाऽपगच्छति, निषेधशास्त्रस्याऽसङ्कुचितत्वादिति भावः ॥१.२४॥

स्वभावतो हिंसाया न दुष्टत्वं, किन्तु दुष्टाध्यवसायजनितत्वेनैव, यज्ञे तु शुद्धाध्यवसायजनितत्वात् सा न दुष्टेति शङ्कते –

**हिंसा भावकृतो दोषो, दाहस्तु न तथेति चेत् ।**
**भूत्यर्थं तद्विधानेऽपि, भावदोषः कथं गतः? ॥१.२५॥**

**न तथा**- न भावकृतो दोषः, किन्तु स्वभावत एव दुष्टः ।

भूत्यर्थं हिंसा भवत्वन्यार्थं वा, तया हिंस्यस्य प्राणिनोऽसह्यवेदना सम्भवत्येवेति परपीडाजनकत्वेन हिंसामात्रस्यैव भावदोषत्वम् । न तस्या यज्ञोपकारकत्वेऽपि भावदोषत्वविलयनमिति समाधत्ते - **भूत्यर्थ**मिति । **तद्विधानेऽपि**- हिंसाविधानेऽपि । यज्ञकर्तुरपि दुष्टाध्यवसायस्तदानीं समस्त्येव, तमन्तरेण हिंसाफलकप्रवृत्तेरेवाऽसम्भवादिति भावः ॥१.२५॥

"ब्रह्मविचाराधिकारितासम्पत्तयेऽपेक्षिताया मनःशुद्धेः कर्मयज्ञादेव भावेन, कर्मयज्ञस्य मनःशुद्धिद्वारा ब्रह्मज्ञानोपयोगित्वेन ब्रह्मयज्ञत्वमेव । ततश्चाऽस्य ब्रह्मज्ञानफलमुक्तिफलकत्वमेव । नाऽतः कर्मयज्ञसन्निविष्टहिंसाया अनर्थसाधनत्वमतस्तदतिरिक्तहिंसानिषेध एव निषेधशास्त्रविषयः । हिंसायास्तस्याः परपीडाजनकत्वेऽपि वेदोक्तत्वादेव न तत्कर्तुर्मनागपि मनोऽविशुद्धि"रिति **वेदान्तिमत**मपि न युक्तम् । तथा सति श्येनयागस्याऽपि मनःशुद्धिद्वारा ब्रह्मज्ञानाङ्गत्वेन ब्रह्मयज्ञत्वे तत्करणमप्यनाकुलं स्यादिति तत्कर्तुः प्रायश्चित्तोपदेशोऽसमुपदेशः प्रसज्येतेत्याह –

**वेदोक्तत्वान्मनःशुद्ध्या, कर्मयज्ञोऽपि योगिनः ।**
**ब्रह्मयज्ञ इतीच्छन्तः, श्येनयागं त्यजन्ति किम्? ॥१.२६॥**

यदा च कर्मयज्ञो ब्रह्मज्ञानाङ्गं न भवति, तदा कर्मविधेर्वेदान्तविधिशेषत्वं दूरापेतमेवेत्याह –

**वेदान्तविधिशेषत्व-मतः कर्मविधेर्हतम् ।**
**भिन्नात्मदर्शकाः शेषा, वेदान्ता एव कर्मणः ॥१.२७॥**

प्रत्युत भिन्नात्मप्रतिपादकानामुपनिषद्वाक्यानामेव यज्ञाधिकारिपुरुषविशेषसमर्पकत्वेन कर्मविधिशेषत्वमित्याह - **भिन्नात्मे**ति[१] ॥१.२७॥

१. ब्रह्मज्ञानस्य फलं मुक्तिः । यज्ञादिरूपस्य कर्मयज्ञस्य मनःशुद्ध्या ब्रह्मज्ञानोपयोगित्वेन ब्रह्मयज्ञत्वम् । ततश्चाऽस्य ब्रह्मज्ञानफलभूतमुक्तिफलकत्वमेव । ततश्च कर्मयज्ञ-ब्रह्मज्ञानयोरेकार्थसाधकत्वेन कर्मयज्ञस्य उपनिषत्-प्रणीतविधिवाक्याङ्गत्वमेवेति तस्य हिंसादिजन्या दुष्टताऽपाकृता भवति । अतस्तत्प्रतिपादकस्य वेदस्य छेदशुद्धिमत्त्वं प्रमाणितं भवतीति वेदान्तिनां

सावद्यस्य कर्मणो न चित्तशोधकत्वमपि तु निरवद्यस्यैव कर्मण इति हिंसायज्ञस्य चित्तशोधकत्वाभावाद् ब्रह्मयज्ञत्वं सम्भावनास्पदमपि नेत्याशयेनाऽऽह –

**कर्मणां निरवद्यानां, चित्तशोधकता परम् ।**
**[1]साङ्ख्याचार्या अपीच्छन्ती-त्यास्तामेषोऽत्र विस्तरः ॥१.२८॥**

तापशुद्धिं लक्षयति –

**यत्र सर्वनयालम्बि-विचारप्रबलाग्निना ।**
**तात्पर्यश्यामिका न स्यात्, तच्छास्त्रं तापशुद्धिमत् ॥१.२९॥**

**तात्पर्यश्यामिका**- तात्पर्यापरिशुद्धिः । उपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गैर्यत्रार्थे तात्पर्यमुन्नीयते, तद्विषयकत्वेन तात्पर्यव्यवस्थापने यद्यपसिद्धान्तादिदोषोपनिपातः स्यात्, तदा तात्पर्यापरिशुद्धिर्भवेत् । सा यत्र सर्वनयावलम्बिविचारप्रबलाग्निना न भवति, तच्छास्त्रं तात्पर्यपरिशुद्धं तापशुद्धिमदित्यर्थः ॥१.२९॥

उक्ता तापशुद्धिरपि जैनागमे समस्तीत्याह –

**यथाऽऽह सोमिलप्रश्ने, जिनः स्याद्वादसिद्धये[2] ।**
**द्रव्यार्थादहमेकोऽस्मि, दृग्ज्ञानार्थादुभावपि ॥१.३०॥**

**दृग्ज्ञानार्थादि**ति । उपयोगलक्षणो जीवः । उपयोगश्च सामान्योपयोगो विशेषोपयोगश्च । सामान्योपयोगश्च दर्शनं, विशेषोपयोगश्च ज्ञानमित्येवमुपयोगद्वैविध्येन तद्रूपस्य जीवस्य द्विरूपत्वमवगाहयतः पर्यायार्थिकान्नया-दित्यर्थः । **उभावपि**- द्वावप्यहम् ।

तथा च विरुद्धयोरप्येकत्व-द्वित्वयोरपेक्षाभेदेनैकत्राऽऽत्मनि समावेशात् 'स्यादेक आत्मा, स्यादनेक आत्मे'ति भङ्गद्वयनिष्पत्तौ तयोः क्रम-युगपद्विवक्षया तृतीय-चतुर्थभङ्गनिष्पत्तौ तत्संयोजनया पञ्चम-षष्ठ-सप्तमभङ्गानां निष्पत्तौ सप्तभङ्गीस्वरूपः स्याद्वादः सिद्ध्यत्येवेति भावः ॥१.३०॥

---

मतं न युक्तम् । यतः शत्रुवधानुकूलपापव्यापारफलकस्य श्येनयागस्य वेदोक्तत्वेऽपि प्रायश्चित्तोपदेशयोग्यमनर्थहेतुत्वं समस्त्येव । अतो वेदविहितत्वं हिंसादिदोषजन्यदुष्टतानिवारकं न भवति । ततः कर्मयज्ञस्य वेदोक्तत्वेऽपि नैव मनःशुद्धिद्वारा ब्रह्म-ज्ञानोपयोगित्वं तन्मूलकं वेदान्तविधिवाक्याङ्गत्वं च । प्रत्युत कर्मविधिषु तत्तत्कर्माधिकारिपुरुषविशेषसमर्पकत्वेन वेदान्तवाक्यानां भिन्नात्मप्रतिपादकानां कर्मविधिशेषत्वमेवेति कर्मयज्ञस्य ब्रह्मयज्ञत्वप्रतिपादनं निरर्थकमेव । ततश्च तादृशदोषदुष्टकर्मयज्ञविधायकस्य वेदस्य च्छेदशुद्ध्यभाव एव ।

वृत्त्यन्तरे "भिन्नात्मदर्शकाः शेषा वेदान्ता एव कर्मण" इति वाक्यस्य द्विधाऽर्थसङ्गतिर्दर्शिता - १. कर्मणो भिन्ना आत्मदर्शका वेदान्ता शेषाः- वेदान्तविध्यङ्गभूताः २. कर्मविधेः सकाशात् शेषाः- अवशिष्टा वेदान्ता भिन्नात्मदर्शकाः- कर्म-विधिप्राप्यस्वर्गादिभिन्नात्मतत्त्वप्रदर्शकाः इति । प्रथमेऽर्थे वेदान्ता एव वेदान्तविधिशेषा इति ग्राह्यत्वापत्तिः, 'भिन्ना' इत्यस्य 'कर्मण' इतिसापेक्षत्वेऽपि समासे 'सापेक्षमसमर्थम्' इति नियमभङ्गापत्तिश्च । द्वितीयस्याऽर्थस्य प्रकरणासाङ्गत्यं स्पष्टमेव । तदुभयापेक्षयाऽत्र दर्शितः "भिन्नात्मप्रतिपादकानि उपनिषद्वाक्यान्येव कर्मविधेः शेषाः" इत्यर्थः समीचीनतरः प्रतिभाति ।

१. जपादिनिरवद्यानुष्ठानेनैव मनःशुद्धिसम्भवे तदर्थं हिंसाबहुलयज्ञस्याऽनभिप्रेतत्वात् साङ्ख्यानाम् ।

२. भगवतीसूत्रम् - १८.१०.६४८

अविनाशित्व-विनाशित्वाभ्यामविकृतत्व-विकृतत्वाभ्यां च स्याद्वादः सिद्ध्यतीत्याह –

**अक्षयश्चाऽव्ययश्चाऽस्मि, प्रदेशार्थविचारतः ।**
**अनेकभूतभावात्मा, पर्यायार्थपरिग्रहात् ॥१.३१॥**

यद्यप्यक्षया-ऽव्ययौ समानार्थकावेव, तथाप्येकस्याऽविनाश्यर्थकत्वं द्वितीयस्याऽविकारार्थकत्वं चाऽऽश्रित्य भेदेनोपन्यासः ।

कथं देवमनुष्यादिभवभावे तत्तत्पूर्वपूर्वरूपेण विनाशस्योत्तरोत्तररूपेण परिणामलक्षणविकारस्य सद्भावेऽप्यक्षयत्वमव्ययत्वं तत्र घटत इत्यत आह - **प्रदेशार्थविचारत** इति । आत्मनो यावन्तः प्रदेशास्तेऽन्यूनाधिकभावेनैव सर्वदाऽवतिष्ठन्ते इति तद्रूपात्मविचारतोऽक्षयत्वा-ऽव्ययत्वे आत्मनि स्त इति द्रव्यार्थिक एवाऽयं विचारः ।

तिर्यग्मनुष्यदेवनारकरूपेण बालाद्यवस्थाभेदलक्षणेन च पर्यायेण पूर्वपूर्वमुपमृद्योत्तरोत्तरभावतापत्तिलक्षणभवनयोगिना क्षयित्व-व्ययित्वे अपि स्त इत्याह - **अनेके**ति । **पर्यायार्थपरिग्रहात्**- पर्यायार्थनयाश्रयात् ॥१.३१॥

ननु सङ्ग्रहनये आत्मन एकत्वमेव, नैगमादिनये चाऽनेकत्वमेवेति तत्तन्नयाश्रितविचारपराभूताऽनेकान्तदृष्टिर्न वस्तुव्यवस्थापनायाऽलमित्युपेक्ष्य एवाऽयं स्याद्वाद इत्यत आह –

**द्वयोरेकत्वबुद्ध्याऽपि, यथा द्वित्वं न गच्छति ।**
**नयैकान्तधियाऽप्येव-मनेकान्तो न गच्छति ॥१.३२॥**

तथा च दृष्टान्ते यथैकत्वबुद्धिर्भ्रमात्मिका न वस्तुव्यवस्थितद्वित्वप्रतिक्षेपिका, तथा दार्ष्टान्तिकेऽपि एकान्तबुद्धिरवस्तुविषयकत्वेन प्रमानात्मिका सती न प्रमात्मकज्ञानविषयीकृतस्याऽनेकान्तस्य प्रतिक्षेपिकेति नैकान्तबुद्ध्याऽनेकान्तबुद्धेः परिभव इत्याशयः[१] ॥१.३२॥

एकत्वबुद्धि-नयबुद्ध्योः प्रमात्वाभावेन साम्यमुपदर्शयति –

**सामग्र्येण न मानं स्याद्, द्वयोरेकत्वधीर्यथा ।**
**तथा वस्तुनि वस्त्वंश-बुद्धिर्ज्ञेया नयात्मिका ॥१.३३॥**

**सामग्र्येणे**ति द्वित्वावच्छेदेनेत्यर्थः । तेन द्वयोः प्रत्येकमेकत्वेन प्रत्येकावच्छेदेनैकत्वबुद्धेः प्रमात्वेऽपि न क्षतिः । एतच्चाऽग्रिमपद्येन व्यक्तीभविष्यति ॥१.३३॥

यथा च द्वयोः प्रत्येकमेकत्वेनैकत्वबुद्धेर्न विषयालाभः, तथा वस्तुन्यप्येकत्वा-ऽनेकत्वाद्यनन्तधर्मात्मकेंऽशतया व्यवस्थितस्यैकत्वादेर्भावेन न तद्बुद्धेर्विषयालाभः । परं 'तद्वति तत्प्रकारकत्व'लक्षणसद्भावाद्

---

१. यथा द्वयोर्वस्तुनोः 'अयमेकः अयं चैक' इत्येवमेकत्वबुद्ध्याऽपि अपेक्षाबुद्धिजनितं द्वित्वं न गच्छति, तादृशैकत्वबुद्ध्यास्तदविरोधित्वात्; तथैव एकान्तगोचरसुनयमत्याऽपि प्रमाणसम्पादितोऽनेकान्तो न गच्छति, आपेक्षिकैकान्तगोचरनयधियः प्रमाणाबाधकत्वादित्थमप्यस्य श्लोकस्याऽर्थसङ्गतिः शक्या ।

द्वयोः प्रत्येकमेकत्वबुद्धेर्व्यावहारिकं प्रामाण्यं सम्भवति । वस्तुनि वस्त्वंशबुद्धेस्तु वस्तुविषयत्वलक्षण-पारमार्थिकप्रामाण्यलक्षणवैकल्यान्न प्रामाण्यं, किन्तु वस्त्वंशविषयकत्वलक्षणनयत्वमेवेत्याह –

**एकदेशेन चैकत्व-धीर्द्वयोः स्याद् यथा प्रमा ।**
**तथा वस्तुनि वस्त्वंश-बुद्धिर्ज्ञेया नयात्मिका ॥१.३४॥**

यथा चैको नय एकमेव वस्त्वंशमेकत्वमनेकत्वं वा नित्यत्वमनित्यत्वं वा सत्त्वमसत्त्वं वाऽवगाहते, न तु विरुद्धद्वयं; तदैकस्मिन् विरुद्धनानाधर्मावगाहिज्ञानत्वलक्षणस्य तत्राऽभावान्नाऽस्त्येव संशयत्वम् । तथा च तत्र संशयत्वोक्तिः परेषामज्ञानमूलिकैवेत्याह –

**इत्थं च संशयत्वं य-न्नयानां भाषते परः ।**
**तदपास्तं द्वयालम्बः, प्रत्येकं न नयेषु यत् ॥१.३५॥**

**इत्थं चे**ति एकदेशबुद्धेर्नयत्वे चेत्यर्थः । **द्वयालम्ब** इति । नहि नयाः सर्वेऽप्येकीभूताः, किन्त्वेकनयज्ञानानन्तरं विलम्बेनाऽन्यनयज्ञानम् । किञ्च प्रत्येकं नयेषु द्वयालम्बः– मिथोविरुद्धधर्मद्वयग्राहिताऽपि न । तथा च यत्रैकत्वविषयकत्वं, न तत्राऽनेकत्वविषयकत्वम् । न च नयसमुदायलक्षण एको नयः समस्ति, यत्रोभयविषयकत्वसम्भवतः संशयलक्षणघटना संभाव्येताऽपि । प्रत्येकं तु नयेषु प्रतिनियतविषयकत्वमेव, न तु विरुद्धधर्मद्वयविषयकत्वमित्याह – प्रत्येकमिति ॥१.३५॥

ननु परो यथावन्नयस्वरूपानभिज्ञो दीधितिकारादिः "सप्तभङ्गीनयो न प्रमाण"मित्येवमवोचत् । तथा च तेन सप्तभङ्गीवाक्यजन्यबोधस्यैव नयत्वमभ्युपगम्य तस्य संशयत्वमापादितम् । तत्र च विरुद्ध-धर्मद्वयविषयकत्वेन संशयलक्षणमादधात्येव पदमित्यत आह –

**सामग्र्येण द्वयालम्बे-ऽप्यविरोधे समुच्चयः ।**
**विरोधे दुर्नयव्राताः, स्वशस्त्रेण स्वयं हताः ॥१.३६॥**

**अविरोधे**– स्यात्पदेनाऽपेक्षाभेदाश्रयणेन कृतविरोधपरीहारे सति, तज्ज्ञानं **समुच्चयः**– समूहालम्बनमेव । विरोधाप्रतिभासनात्तु संशयत्वं तस्य न सम्भवतीत्यर्थः । संशये विरोधभानपक्षे – संशयेऽपि प्रकारताद्वय-निरूपितं विशेष्यताद्वयं समुच्चयेऽपि च, परं संशये प्रकारविशेषणतया विरोधोऽधिको भासते, समुच्चये तु न तथा । विरोधाभानपक्षे तु – संशयनिरूपितविशेष्यत्वयोरवच्छेद्यावच्छेदकभावः, समुच्चये तु नैवम्, एकत्र द्वयमिति रीत्या ज्ञाने तु प्रकारताद्वयनिरूपिता विशेष्यता एकैवेति विवेकः ।

स्यात्पदेन चाऽविरोधद्योतनेऽवच्छेदकभेदेन धर्माणां वृत्त्यवद्योतने वा, तज्जनितज्ञानस्य न विरोधाव-गाहित्वं नवा प्रकारद्वयनिरूपितविशेष्यत्वयोरवच्छेद्यावच्छेदकभाव इति कुतः संशयत्वमिति भावः ।

स्यादर्थानुल्लेखे तु विरोधभानावश्यम्भावे'ऽस्त्येव नाऽस्त्येवे'त्येवंप्रकारेण जायमानानां ज्ञानानां नैकत्वमिति दुर्नयव्राता एव ते स्वस्वशस्त्रप्रतिहन्यमाना नाऽत्राऽधिकृता इति ते बोधाः संशयरूपा अपि न भवन्ति, न वा भिन्नाः सन्तः समुच्चयरूपाः, किन्तु विपर्यया एवेत्याह – **विरोध** इति ॥१.३६॥

स्यादर्थाप्रतिसन्धानेन सप्तभङ्गीजन्यसमुच्चयबोधे विरोधभानावश्यम्भावेन संशयत्वमावश्यकमिति पराकूतमाशङ्क्य विरोधपरीहारार्थं स्यादर्थसङ्कुटितमूर्तय एव धर्माः सप्तभङ्गीजन्यबोधे भासन्त इति कुतः संशयत्वावकाश इति समाधत्ते –

**कथं विप्रतिषिद्धानां, न विरोधः समुच्चये? ।**
**अपेक्षाभेदतो हन्त!, कैव विप्रतिषिद्धता? ॥१.३७॥**

**विप्रतिषिद्धानाम्**- अन्योन्यप्रतिपक्षरूपाणाम् । अवच्छेदकभेदमन्तरेण विरोधेऽपि, अवच्छेदकभेदेनैकत्र समावेशसम्भवान्न विरोधः । अवच्छेदकभेदश्चाऽत्र भासत एवेत्याह - **अपेक्षाभेदत** इति ॥१.३७॥

अपेक्षाभेदेनैकत्र विरुद्धानेकसमावेशोऽन्यत्र दृष्टस्तथा प्रकृतेऽपीति नाऽदृष्टचरीयं स्याद्वादकल्पनेत्याह –

**भिन्नापेक्षा यथैकत्र, पितृपुत्रादिकल्पना ।**
**नित्यानित्याद्यनेकान्त-स्तथैव न विरोत्स्यते ॥१.३८॥**

एकस्यैव पुरुषस्य 'पुत्रापेक्षया पितृत्वं, पित्रपेक्षया पुत्रत्वं, मातुलापेक्षया भागिनेयत्वं, भागिनेयापेक्षया मातुलत्व'मित्येवं नानाधर्मसमावेशो दृष्टस्तथा प्रकृतेऽप्यपेक्षाभेदेनैकत्र नित्यत्वानित्यत्वादिसमावेशसम्भवान्न विरोध इति । **तथैव**- भिन्नापेक्षात एव ॥१.३८॥

ननु भवतोऽभिप्रायेणाऽनेकान्तत्वस्य व्यापकत्वेन 'यदपि यस्य स्वरूपतयाऽभिमतं तदपि तस्य पररूपं, यदपि च यस्य पररूपं तदपि तस्य स्वरूप'मिति 'स्वरूपापेक्षया सत्त्व'मित्युक्तौ पररूपस्याऽपि स्वरूपत्वात् तदपेक्षयाऽपि सत्त्वं प्राप्तम् । एवं 'पररूपापेक्षयाऽसत्त्व'मित्युक्तौ स्वरूपस्याऽपि पररूपत्वात् तदपेक्षयाऽप्यसत्त्वं प्राप्तम् । एवं चा'ऽमुकापेक्षयाऽसत्त्वमेव, अमुकापेक्षया सत्त्वमेवे'ति निर्णयः स्याद्वादे न स्यात् । 'स्वरूपस्य स्वरूपत्वमेव, पररूपस्य पररूपत्वमेवे'त्यभ्युपगमे तु तत्रैवैकान्तस्य लब्धपदत्वेनाऽनेकान्तस्य सर्वव्यापकत्वं हीयेतेति शङ्कते –

**व्यापके सत्यनेकान्ते, स्वरूप-पररूपयोः ।**
**आनेकान्त्यान्न कुत्रापि, निर्णीतिरिति चेन्मतिः ॥१.३९॥**

**अनेकान्त** इति भावप्रधाननिर्देशादनेकान्तत्वे व्यापके सतीत्यर्थः । तादात्म्येन वा व्यापकत्वमभिमतम् । **आनेकान्त्यात्**- अनेकान्तत्वात् ॥१.३९॥

कस्यचित् स्वरूपत्वं कस्यचित् पररूपत्वमित्यप्यपेक्षयैवोच्यते । यस्य यदपेक्षया स्वरूपत्वं तस्य तदपेक्षया स्वरूपत्वमेव । यस्य यदपेक्षया पररूपत्वं तस्य तदपेक्षया पररूपत्वमेव । न चैवमेकान्तप्रवेशः । स्वरूपस्याऽप्यन्यापेक्षया पररूपत्वस्य, पररूपस्याऽपि चाऽन्यापेक्षया स्वरूपत्वाभ्युपगमात् । न चैवमनिर्णयः । यदपेक्षया स्वरूपत्वं तदपेक्षयैव स्वरूपस्य सत्त्वावच्छेदकतयाऽभ्युपगमाद्, यदपेक्षया पररूपत्वं तदपेक्षयैव पररूपस्याऽसत्त्वावच्छेदकतयाऽभ्युपगमादिति न पररूपस्य सत्त्वावच्छेदकत्वप्राप्तिर्नाऽपि स्वरूपस्याऽसत्त्वावच्छेदकत्वप्राप्तिरित्याशयेन समाधत्ते –

**अव्याप्यवृत्तिधर्माणां, यथाऽवच्छेदकाश्रया ।**
**नाऽपि ततः परावृत्ति-स्तत् किं नाऽत्र तथेक्ष्यते? ॥१.४०॥**

**अवच्छेदकाश्रया** इत्यनन्तरं पूर्वपद्याकृष्टा **निर्णीतिः** सम्बध्यते । यथाऽव्याप्यवृत्तिधर्माणां कपि-संयोग-तदभावादीनामेकत्र वृक्षादौ अवच्छेदकाश्रया स्वस्वावच्छेदकनिबन्धना निर्णीतिः, 'शाखायां वृक्षे कपिसंयोग एव, मूले वृक्षे कपिसंयोगाभाव' इत्येवं निर्णयो भवति; **नाऽपि ततः परावृत्तिः**- निर्णीतितः परावृत्तिरनिर्णयो न भवति, नाऽपि 'मूले वृक्षः कपिसंयोगी, शाखायां वृक्षे कपिसंयोगाभाव' इत्येवमवच्छेदक-परिवर्तनेन निर्णयो भवति; **तत्**- तस्मात्, **अत्र**- नित्यानित्याद्यनेकान्ते **तथा**- नियतस्वरूप-पररूपावच्छेदक-निबन्धना निर्णीतिः स्वस्वानुभवभासमानवपुः **किं नेक्ष्यते** ? अपि तु ईक्ष्यते एवेत्यर्थः ॥१.४०॥

ननु 'शाखायां वृक्षे कपिसंयोगो वर्तते' इति प्रथमतो निर्णयेऽपि तस्य परावृत्तिर्दृश्यते 'न शाखायां किन्तु प्राचीदिक्व्यवस्थिततदेकदेशे', 'तत्राऽप्यमुकविभागे' इत्येवमवच्छेदकसङ्कोचनेन पूर्वपूर्वनिर्णयोपमर्दनेना-ऽपरोऽपरो निर्णयः प्रादुर्भवन्नवलोक्यते । एवं जम्बूद्वीपे, तदेकदेशे भारते, पाटलिपुत्रेऽमुकस्मिन् प्रासादे, यावत् तत्कोणे देवदत्तो वर्तते इत्येवमवच्छेदकविकाससङ्कोचतो निर्णयपरावर्तनमनेकविधमुपलभ्यते इति रिक्तमिदमुच्यते **नाऽपि ततः परावृत्तिरि**त्यत आह –

**आनैगमान्त्यभेदं त-त्परावृत्तावपि स्फुटम्[१] ।**
**अभिप्रेताश्रयेणैव, निर्णयो व्यवहारकः ॥१.४१॥**

**आनैगमान्त्यभेद**मिति नैगमस्याऽन्त्यविशेषं यावदित्यर्थः । **तत्परावृत्तावपि**- निर्णयपरावृत्तावपि । **व्यवहारकः**- व्यवहारकारी व्यवहारप्रयोज्यो **निर्णयोऽभिप्रेताश्रयेणैव** भवति, न तु तस्य परावर्तनम् । तादृशनिर्णीतिरेवाऽत्र दृष्टान्ततयोपनिबद्धेति न कश्चिद् दोषः ॥१.४१॥

यावत्पर्यन्तमनेकान्ताश्रयणेन व्यवहार उपपद्यते तावदेवाऽनेकान्तोऽपेक्षणीयः, तत ऊर्ध्वमनेकान्तस्य भावेऽपि न तदुद्भावनं प्रयोजनाभावादादरणीयमित्यनेकान्तेऽनेकान्तस्तत्राऽप्यनेकान्त एवं तत्र तत्राऽपीत्येव-मनेकान्तपरम्पराया अविश्रान्तावपि वस्तुस्थित्या तथाभावो बीजाङ्कुरवत् प्रामाणिकत्वान्न क्षतिकरः । ज्ञानानवस्था तु नाऽस्त्येव, यावताऽपेक्षितसिद्धिस्ततः परं ज्ञानपरम्परानुसरणेनैव विश्रान्तेः सुलभत्वा-दित्याशयेनाऽऽह –

**अनेकान्तेऽप्यनेकान्ता-दनिष्ठैवमपाकृता ।**
**नयसूक्ष्मेक्षिकाप्रान्ते, विश्रान्तेः सुलभत्वतः ॥१.४२॥**

---

१. वृत्त्यन्तरे श्लोकस्याऽस्य पूर्वार्द्धस्य "आनैगमान्त्यभेदं- नैगमनयादारभ्यैवम्भूतनयपर्यन्तं परावृत्तावपि- प्रतिनयं प्रतिनियतवस्तुस्वरूपधीपरिवर्तने सत्यपि तद्- वस्तुस्वरूपं स्फुटं- स्पष्टमेव" इत्यर्थो दृश्यते । स च चिन्त्यः; "यथावच्छेदकाश्रयाऽव्याप्यवृत्तिधर्माणां निर्णीति"रिति सन्दर्भस्याऽस्मिन् श्लोकेऽनुवृत्तत्वात्, "नाऽपि ततः परावृत्तिः", "तत्परावृत्तावपि स्फुटम्" इति पङ्क्तिद्वयस्याऽन्योन्यापेक्षत्वात्, 'आनैगमान्त्यभेद'मितिपदस्य तादृशार्थपरकत्वस्य दुःशकत्वात्, वस्तुस्वरूपस्य पूर्वमनुपादानात् 'तत्'पदेन तदुल्लेखस्याऽसङ्गतत्वाच्च ।

**अनिष्ठा**- अविश्रान्तिः । **एवं**- व्यावहारिकनिर्णयानुसरणेन । **नयसूक्ष्मेक्षिकाप्रान्ते**- दर्शितदिशा सूक्ष्मविचारकाष्ठायाम् ॥१.४२॥

दर्शितानवस्थादोषमोषायाऽनेकान्ते अनेकान्त यद्याश्रयीभूतानेकान्तरूपस्तदाऽऽत्माश्रयः । यदि तत्परिहाराया-ऽनेकान्तोऽन्यस्तदा तत्राऽप्यनेकान्तस्तद्व्यापकत्वोपपत्तयेऽभ्युपगमनीयः । स यदि प्रथमानेकान्तरूपोऽनवस्थो-च्छेदायाऽभिमतस्तदाऽन्योन्याश्रयः । तत्परीहारायाऽन्यस्य तृतीयानेकान्तस्याऽभ्युपगमे तत्राऽप्यनेकान्तः । स यदि प्रथमानेकान्तादिरूपस्तदा चक्रकमेवं तु तुर्यपञ्चमषष्ठाद्यनेकान्ताभ्युपगमे, यत्रैव प्रथमानेकान्ताद्य-भ्युपगमे नाऽनवस्थोत्त्रासनं, तत्र चक्रकं संलग्नमेव । अपरापराभ्युपगमेऽनवस्था दुष्परिहरेति परोपदर्शित-दोषकदम्बप्रतिक्षेपायाऽऽह –

**[१]आत्माश्रयादयोऽप्यत्र, सावकाशा न कर्हिचित् ।**
**ते हि प्रमाणसिद्धार्थात्, प्रकृत्यैव पराङ्मुखाः ॥१.४३॥**

**अत्र**- अनेकान्ते । यथा घटाभावे घटाभावोऽधिकरणीभूतस्वात्मक एव, प्रामाणिकश्चाऽऽत्माश्रयो न दोषावहः । अतिरिक्तातिरिक्तानन्तघटाभावकल्पनापेक्षया स्वस्य स्ववृत्तिकल्पनं लाघवाय । एवमनेकान्तस्या-ऽनेकान्तवृत्तित्वग्राहकप्रमाणं लाघवानुगृहीतं स्वस्य स्ववृत्तित्वं विषयीकरोति । प्रामाणिकश्चाऽयमप्यात्माश्रयो न दोषायेति । एवं घटाभावे पटाभावः, तत्र च घटाभाव इत्येवमन्योन्याश्रयो न दोषावह इत्येवमनेकान्तद्वया-भ्युपगमेऽन्योन्याश्रयः प्रामाणिकत्वान्न दोषावह इत्याशयेनाऽऽह – **ते हीति** आत्माश्रयादयो यतः **प्रमाण-सिद्धार्थात्**- प्रमाणसिद्धानेकान्ताद्यर्थात्, **प्रकृत्यैव**- स्वभावत एव **पराङ्मुखा** इति ।

यद्यपि अनेकान्ते स्वात्मकानेकान्ताभ्युपगमे स्वस्य स्वापेक्षत्वलक्षण आत्माश्रयोऽस्त्येव, प्रामाणिकत्वे सत्यपि । तथा च तस्य कथं ततः पराङ्मुखत्वम् ? तथाप्यात्माश्रयादीनां दोषत्वमेव प्रकृतिः, प्रमाणेन तत्र दोषत्वस्याऽपाकरणे सन्तोऽप्यात्माश्रयादयो नाऽऽश्रयस्य दुष्टतामाधातुं समर्था इति तेषां सत्त्व-मकिञ्चित्करमिति दोषतया ते तत्र न विद्यन्ते इति प्रकृत्या पराङ्मुखत्वं भवत्येवेत्याशयः ॥१.४३॥

लोका अपि स्याद्वादमनुभूतिपदमानयन्तो न स्याद्वादद्वेषिणः । परीक्षकाणां तु कथैव का ? इति लोकतोऽबाधितत्वं स्याद्वादस्य दर्शयति –

**उत्पन्नं दधिभावेन, नष्टं दुग्धतया पयः ।**
**गोरसत्वात् स्थिरं जातं, स्याद्वादद्विड् जनोऽपि कः? ॥१.४४॥**

एकस्मिन् वस्तुन्यपेक्षाभेदेनोत्पादव्ययध्रौव्याणि परस्परभिन्नस्वभावानि वर्तन्ते इति स्याद्वादस्यैष महिमा लोकस्याऽप्यनुभवगोचर इति न साधारणजनोऽपि स्याद्वादद्विडित्यर्थः ।

अनेन चोत्पादव्ययध्रौव्यलक्षणं सत्त्वमेकत्र लक्ष्ये सङ्घटितमन्यत्राऽप्येतद्दृष्टान्तेनाऽनुगमनीयमिति सूचितं भवति । ततश्चैतल्लक्षणसत्त्वानुरोधात् सर्वत्र स्याद्वादोऽस्खलितप्रचार एवाऽवतिष्ठत इत्यप्यावेदितं भवतीति बोध्यम् ॥१.४४॥

---

१. वृत्त्यन्तरे इह एकस्मिन् धर्मिणि भेदाभेदादीनाश्रित्याऽऽत्माश्रयादयो दोषा तदपाकरणं च प्रदर्शितम् । तच्चिन्त्यं भवति, पूर्वतनश्लोके अनवस्थादोषनिराकरणस्याऽनेकान्तेऽनेकान्तस्य स्वीकरणापेक्षया दर्शितत्वात् । तस्मिन्नेव प्रकरणे श्लोकस्याऽस्य निरूपितत्वात् ।

सङ्ख्यावतामग्रणीः **साङ्ख्यो**ऽपि यदा स्याद्वादं भङ्ग्यन्तरेणाऽभ्युपगच्छत्येव, न तु प्रतिक्षेप्तुं समर्थः, तदाऽन्येषां विदुषां का कथेत्याशयेनाऽऽह –

**इच्छन् प्रधानं सत्त्वाद्यै-र्विरुद्धैर्गुम्फितं गुणैः ।**
**साङ्ख्यः सङ्ख्यावतां[1] मुख्यो, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.४५॥**

**प्रधानं**- प्रकृतिं सत्त्वरजस्तमसां साम्यावस्थालक्षणाम् । **सत्त्वाद्यैः**- सत्त्वरजस्तमोभिः । **विरुद्धैः**-

"सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरुवरणकमेव तमः प्रदीपवच्चाऽर्थतो वृत्तिः ॥" [साङ्ख्यकारिका-१३]

**इतीश्वरकृष्ण**कारिकया विरुद्धस्वभावत्वेन विरुद्धत्वं तेषां स्पष्टमेव । **गुणै**[2]रन्यार्थैः । सत्त्वादीनां सङ्घातरूपत्वेनाऽसङ्घातरूपपुरुषार्थत्वं सङ्घातपरार्थत्वादित्यादिना साङ्ख्येनाऽनुमतम् । तेन द्रव्यरूपाणां तेषां द्रव्याश्रितत्वलक्षणगुणत्वाभावेऽपि न क्षतिः । **गुम्फित**मित्यनेन तादात्म्यमापन्नमित्यर्थो विवक्षितः ।

तथा च प्रधानस्य प्रधानत्वेन रूपेणैकत्वं, सत्त्वादिगुणरूपेणाऽनेकत्वमित्येवं स्याद्वादस्तत्र पदमादधात्येव। न च - प्रधानत्वं सत्त्वरजस्तमोमयत्वमेवेत्यनेकत्वमेव तद्रूपेणाऽपि, न त्वेकत्वमिति कुतस्तत्र स्याद्वादप्रवृत्तिरिति - वाच्यम्; पञ्चविंशतितत्त्वपरिगणने प्रकृतेरेकतत्त्वतया परिगणनस्यैकत्वमन्तरेणाऽनुपपत्तेः ।

यद्यपि साङ्ख्यमते पुरुषभिन्नस्य सर्वस्याऽपि तत्त्वस्य सत्त्वरजस्तमोगुणयोगित्वमिति तत्र सर्वत्र स्याद्वादोऽस्खलितप्रचार एव; तथापि तत्त्वान्तरस्याऽन्यदपि स्वरूपं, तत्र नाऽऽयासमन्तरा स्याद्वादप्रतिपत्तिः सुकरा, प्रधानस्य तु तदेव रूपमिति तत्राऽयत्नोपनत एव स्याद्वाद इति हृदयम् ॥१.४५॥

आकाराकारिणोरभेदमुपगच्छन्ननेकाकारमेकं चित्रज्ञानं स्वीकुर्वन् **बौद्धो**ऽपि तत्र स्याद्वादमभ्युपगच्छत्येवेति सोऽपि कथं स्याद्वादापलापे प्रभुरित्याह –

**विज्ञानस्यैकमाकारं, नानाकारकरम्बितम् ।**
**इच्छंस्ताथागतः प्राज्ञो, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.४६॥**

**विज्ञानस्येति** 'नीलपीते' इत्यादिसमूहालम्बनज्ञानस्येत्यर्थः । **एकमाकारं**- स्वस्वरूपाश्रयणेनैकं स्वरूपम् । **नानाकारे**ति नीलपीताद्यनेकाकारेत्यर्थः, तेन **करम्बितं**- तादात्म्येन तद्युक्तम् । तन्मते आकारस्यैव ज्ञानग्राह्यत्वं, तादात्म्यमेव च ग्राह्य-ग्राहकयोः सम्बन्धः । तथा चाऽऽकारनानात्वाज्ज्ञानस्य नानात्वमपीत्यर्थः[3]।

**ताथागतः**- बौद्धः । स चाऽत्र सौत्रान्तिको योगाचारश्च । वैभाषिकस्य तु निराकारज्ञानवाद एव । माध्यमिकस्य तु शून्यत्वमेव तत्त्वकाष्ठेति बोध्यम् । **प्राज्ञ** इत्यनेन प्रेक्षाकारित्वं तस्योट्टङ्कितम् । स

---

१. सङ्ख्यावतां- परीक्षकाणाम् । २. एतत्कथनस्य तात्पर्यावगमनार्थं दृश्यतां जैनतर्कभाषागता-ऽनुमानप्रकरणस्थ-साध्यस्वरूपनिरूपणम् । ३. बौद्धमते बाह्यपदार्थमात्रस्याऽसत्त्वेन जायमानप्रतिभासस्योपपत्तये वासनोद्बोधितधीविशेषः तन्नाम ज्ञानाद्वैतं स्वीक्रियते । तत्र समूहालम्बनादिस्थले ज्ञानं ग्राहकतयैकस्वभावमपि ग्राह्यतयाऽनेकीभवतः स्वांशान् गृह्णदनेकमपीति ।

इत्थमापतन्तमपि स्याद्वादं यदि नाऽभ्युपगच्छेत्, प्रेक्षाकारित्वमेव तस्य हीयेत । तद्रक्षणार्थं तेन स्याद्वादोऽवश्यमेवाऽभ्युपेतव्यो, न तु प्रतिक्षेप्तव्य इति ॥१.४६॥

**नैयायिको वैशेषिकश्च** भुवि चित्ररूपमेकमनेकं चाऽभ्युपगच्छन्तौ स्याद्वादाभ्युपगन्तारावेव, न तु तत्प्रतिक्षेपकावित्याह –

**चित्रमेकमनेकं च, रूपं प्रामाणिकं वदन् ।**
**योगो वैशेषिको वाऽपि, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.४७॥**

**योगो**- नैयायिकः । यद्यपि प्राचीननैयायिक-वैशेषिकाभ्यामेकमेव सप्तमं चित्ररूपमभ्युपगम्यते, न तु नाना; नवीननैयायिकैस्तु चित्ररूपमभ्युपगम्यत एव न, व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तिविरोध[१] इति प्राचीननियममनङ्गीकृत्य तैश्चित्रप्रतीतेर्नानारूपविषयकत्वस्यैवोररीकारात् । तथा चैकानेकस्वभावचित्ररूपाभ्युपगमस्तेषां नाऽस्त्येवेति कथं तदारोपणेन स्याद्वादावतारस्तत्र कान्तः ? तथापि अनुभवमुखप्रेक्षिणौ यदि तौ स्यातां, तदा चित्ररूपस्यैकत्वमनेकत्वं च ताभ्यामवश्यमभ्युपेयम् ।

तत्र प्राचीनैरेकत्वं तस्य स्वत एवाऽभ्युपगतमिति तत्साधनायासो न विधेयः । अनेकत्वं च तत्र नीलत्वादिजातिसमावेशादभ्युपेयम् । एकमेव चित्रं यथा नीलपीताद्यनेकावयवोपलम्भे सति चित्रतयाऽनुभूयते, तथा नीलावयवाद्येकैकोपलम्भे नीलत्वादिनाऽप्यनुभूयते । न च तत्राऽवयवरूपस्यैव तथाऽनुभवो, नाऽवयविरूपस्येति वाच्यम्; तथा सत्यवयविरूपाग्रहेऽवयविनश्चाक्षुषप्रत्यक्षं न स्यात् । न चाऽन्यदीयरूपेणैवाऽवयविनो ग्रहणं, तथा सति बाधकमन्तरेणैव तथाविधप्रतीतेर्भ्रान्तत्वाभ्युपगमो निर्निबन्धनः प्रसज्येत । न चाऽवयविप्रत्यक्षं तत्र न भवत्येवेति वाच्यम्; 'नीलः पट' इत्यनुभवस्य स्वसाक्षिकस्य कदर्थनापत्तेस्तस्मान्नीलत्वादिजातिसमावेशादनेकत्वमपि चित्रस्याऽभ्युपगन्तव्यमेव; अन्यथा प्रमाणविषयत्वमेव तस्य न स्यादित्यभिसन्धानेनैव **प्रामाणिक**मिति विशेषणमुपात्तमिति बोध्यम् ॥१.४७॥

**मीमांसकास्त्रयोऽपि गुरु-भट्ट-मुरारिमिश्राः** स्याद्वादं न प्रतिक्षेप्तुं समर्थास्तेषां मतेऽपि स्याद्वादस्य प्रविष्टत्वात् । तत्र **प्रभाकरस्य** न स्याद्वादप्रतिक्षेप्तृत्वसम्भव इत्याह –

**प्रत्यक्षं मितिमात्रंशे, मेयांशे तद्विलक्षणम् ।**
**गुरुर्ज्ञानं वदन्नेकं, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.४८॥**

**गुरुः**- प्रभाकरः, **ज्ञानं**- ज्ञानसामान्यम्, **एकं**- एकस्वरूपम् । **मितिमात्रंशे**- मित्यंशे प्रमांशे स्वस्वरूपे, मात्रंशे प्रमात्रंशे, **प्रत्यक्षं**- प्रत्यक्षमेव, न तु परोक्षं, तेन प्रत्यक्षात्मकज्ञानस्य मेयांशे प्रत्यक्षत्वेऽपि न क्षतिः । **मेयांशे**- विषयांशे, **तद्विलक्षणं**- न प्रत्यक्षमेव, किन्तु किञ्चित् प्रत्यक्षं किञ्चिच्च परोक्षम् । इत्थं वदन् **अनेकान्तं न प्रतिक्षिपेत्** । यतः एकस्यैवाऽनुमित्यादिरूपज्ञानस्य मितिमात्रंशे

१. व्याप्यवृत्तित्वं सकलवृत्तित्वं तन्नाम स्वसमानाधिकरणाभावाप्रतियोगित्वम् ।

प्रत्यक्षत्वस्य विषयांशे च परोक्षत्वस्याऽभ्युपगमेन 'स्यात् प्रत्यक्षं, स्यात् परोक्ष'मित्येवं प्रत्यक्षत्व-परोक्षत्वाभ्यां स्याद्वादस्याऽवतारात् ।

यद्यपि प्राचीनप्राभाकरमते ज्ञानस्य स्वप्रकाशत्वं न स्वविषयकत्वं, स्वस्य स्वविषयत्वासम्भवात् । किन्तु यथा द्रव्यगुणकर्मस्वपरसत्तासम्बन्धात् सत्त्वं, तथा सत्तायामपरसत्ताभ्युपगमेऽविश्रान्तावनवस्था, क्वचिद् गत्वा विश्रान्तौ पूर्वसत्तया सत्त्वोपपादने चक्रकं, प्रथमसत्तायां द्वितीयसत्तया सत्त्वं, द्वितीयस्यां प्रथमसत्तया च सत्त्वमित्येवमभ्युपगमेऽन्योन्याश्रयः, स्वस्मिन् स्वसत्त्वाभ्युपगमेन सत्त्वोपपादने आत्माश्रय इति सत्ता स्वत एव सद्रूपा, न तु सत्तासम्बन्धात् । तथा ज्ञानातिरिक्तस्य सर्वस्य व्यवहारः स्वातिरिक्तज्ञानविषयत्वात्, ज्ञानस्य तु स्वातिरिक्तज्ञानविषयत्वेन व्यवहाराभ्युपगमे पूर्वदिशा चक्रकानवस्थान्योन्याश्रयापत्तिः, स्वविषयत्वेन तथाभ्युपगमे आत्माश्रय इति ज्ञानाविषयोऽपि ज्ञानं स्वत एव व्यवहारभाजनमित्येतावतैव परप्रकाशानपेक्षत्वात् स्वप्रकाशतया व्यवह्रियते; तथापि नवीनप्राभाकरैरात्माश्रयस्य प्रामाणिकत्वेन दोषानावहत्वमुररीकृत्य स्वस्याऽपि स्वविषयत्वमुररीकृतम् ।

अत एव च त्रिपुटीप्रत्यक्षवादस्तत्र घटते । विषयांशे प्रत्यक्षत्वस्येन्द्रियसन्निकर्षप्रयोज्यताकत्वेन सम्भवेऽपि, ज्ञानांशे मात्रंशे च प्रत्यक्षत्वस्य न तथा सम्भवः । ज्ञानविषयत्वस्य प्रमातृविषयत्वस्य च सर्वज्ञानसाधारणत्वेन तत्रेन्द्रियसन्निकर्षप्रयोज्यत्वस्य व्यतिरेकव्यभिचारेणाऽसम्भवात् । किन्तु ज्ञानसामान्य-सामग्रीप्रयोज्यविषयतावत्त्वेनैव तदुभयांशे सर्वस्य ज्ञानस्य प्रत्यक्षत्वं परोक्षज्ञानान्यतमसामग्र्यप्रयोज्य-विषयताकत्वेन विषयांशसाधारणेन तथोपपद्यत इति ध्येयम् ॥१.४८॥

**भट्ट-मुरारिमिश्र**योरपि न स्याद्वादप्रतिक्षेप्तृत्वमित्याह –

**जातिव्यक्त्यात्मकं वस्तु, वदन्ननुभवोचितम् ।**
**भट्टो वाऽपि मुरारिर्वा, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.४९॥**

अभावस्याऽधिकरणात्मकतयैवाऽभ्युपगमेनाऽभावात्मा पदार्थो नाऽस्त्येव । ययोश्चाऽयुतसिद्धयो-रवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योः समवायो नैयायिक-वैशेषिकाभ्यामनुमत-स्तयोर्भेदाभेदात्मकस्वरूपसम्बन्ध एव मीमांसकाभिमत इति समवायोऽपि तन्मते नाऽस्ति । द्रव्याणां जातिमत्पदार्थस्य किञ्चिद्रूपेणैव व्यावृत्तिरिति नियमानङ्गीकारेण नित्यद्रव्याणां स्वत एव व्यावृत्तिसम्भवेन नित्यद्रव्यव्यावर्तकतया स्वतोव्यावृत्तस्वभावस्य विशेषस्याऽपि तन्मतेऽस्वीकारः । जातिश्च व्यक्त्या सह कथञ्चित्तादात्म्यलक्षणाऽविष्वग्भावसम्बन्धानुरोधात् भिन्ना भिन्नैवेत्यभिसन्धायोक्तं **जातिव्यक्त्यात्मक**मिति ।

वस्तुनो जातिव्यक्त्यात्मकत्वाभ्युपगमे किं मानमित्यपेक्षायामाह – **अनुभवोचित**मिति । अनुभूयत एव 'घटो घट' इत्यनुगतात्मना 'घटोऽयं न पट' इति व्यावृत्तात्मना च घटः । एवं पटादिरपीति अनुभव एव तथाभ्युपगमे परमं प्रमाणमित्याशयः । तथा च जात्यात्मना घटादिकं वस्त्वेकं व्यक्त्यात्मना त्वनेकमित्येवं स्याद्वादस्तत्र प्रविशन् कथं निरोद्धुं शक्य इति ॥१.४९॥

शुद्धचैतन्यरूपस्य ब्रह्मणो बद्धत्वा-ऽबद्धत्वाभ्यामभ्युपगन्ता **वेदान्त्य**पि स्याद्वादकृतादर एव, न तु तत्प्रतिक्षेप्तेत्याह –

**अबद्धं परमार्थेन, बद्धं च व्यवहारतः ।**
**ब्रुवाणो ब्रह्म वेदान्ती, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.५०॥**

'ब्रह्म परमार्थेनाऽबद्धं व्यवहारतश्चाऽबद्ध'मित्येवं ब्रुवाणो वेदान्त्यनेकान्तं न प्रतिक्षिपेदित्यन्वयः । तन्मते "एकमेवाऽद्वितीयं ब्रह्म नेह नानाऽस्ति किञ्चन, सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि श्रुत्या सच्चिदानन्दस्वरूपस्य ब्रह्मण एव त्रिकालाबाध्यत्वलक्षणं पारमार्थिकसत्त्वं; पारमार्थिकदृष्ट्याऽविद्यादेर्बन्धकस्याऽभावादेव न तस्य बद्धत्वमित्यबद्धं परमार्थेन ब्रह्म ।

संसारकालाबाधालक्षण-व्यावहारिकसत्त्वस्याऽविद्यादौ भावाद् व्यवहारदशायामन्तःकरणावच्छिन्नचैतन्यादिलक्षणजीवरूपतया ब्रह्मणः सद्वितीयत्वभावाद् व्यवहारतो बद्धं ब्रह्म इत्येवं बद्धत्वा-ऽबद्धत्वाभ्यां ब्रह्मण्यपि स्याद्वादः पदं निधत्त इति *कथं तथाऽभ्युपगन्ता वेदान्ती स्याद्वादप्रतिक्षेपक* इति *भावः ॥१.५०॥*

"सदेव सौम्येदमग्र आसीत्, असदेवेदमासीत्, नो सदासीत्, नो असदासीत्" इत्येवं नयभेदेनाऽर्थभेदान् यथास्थानं प्रतिपादयन् वेदोऽप्यखिलः स्याद्वादव्यवस्थितावेव सम्मुखीभवन् कथं स्याद्वादप्रतिक्षेपक इत्याह –

**ब्रुवाणा भिन्नभिन्नार्थान्, नयभेदव्यपेक्षया ।**
**प्रतिक्षिपेयुर्नो वेदाः, स्याद्वादं सार्वतान्त्रिकम् ॥१.५१॥**

**ब्रुवाणा** इति सम्पूर्णस्याऽपि वेदस्य स्याद्वादसाम्मुख्यं, न तु तदेकदेशस्येत्यधिगतये बहुवचनम् । **नयभेदव्यपेक्षये**ति स्याद्वादप्रमाणराजसाहाय्येनैवाऽमिथ्यार्थत्वेन वेदप्रामाण्योपपत्तिः, अन्यथा पूर्वापरविरुद्धार्थतयैकत्र मिथ्यात्वसम्भवेन प्रामाण्यमेव न स्यादित्यर्थस्याऽवगतये ।

ननु नयभेदव्यपेक्षयैव भिन्नभिन्नार्थप्रतिपादकत्वेऽपि वेदानां प्रामाण्योपपत्तिसम्भवात् स्याद्वादस्य क इहोपयोग इति स्याद्वादस्य **सार्वतान्त्रिक**मिति विशेषणम् । न हि स्याद्वादः कञ्चिदपूर्वमर्थमनुशास्ति । किन्त्वपेक्षावचनात्मकनयभेदाश्रयणमेव स्याद्वादः । अपेक्षावचनात्मकनयभेदाश्रयणमस्ति चेद् वेदे स स्याद्वादस्यैवोद्गारः । न तु प्रत्येकं तन्त्राणां, तेषां स्वस्वविषयमात्रप्ररूपणव्यग्रत्वेन विरोधोपपादने कुण्ठत्वात् । स्याद्वादस्य तु सर्वनयसमूहमयस्य तत्तन्नयव्यपेक्षया तत्तदर्थसंयोजनापरत्वेन तत्तदर्थभेदानामविरोधोपदर्शनेन यथास्थानमुपपादनप्रवणत्वात् । अत एव न तस्य कुत्रापि पक्षपातः, माध्यस्थ्यमेव सर्वत्रेति सर्वतन्त्रमध्यस्थत्वात् सार्वतान्त्रिकत्वं तस्य घटते, नाऽन्यस्य कस्यचित् । अथवा सर्वहितत्वात् सार्वो जिनः, तत्तन्त्रत्वात् तदधीनत्वान्मूकत्वेन तदपेक्षत्वात् सार्वतान्त्रिकत्वं तस्येति बोध्यम् ॥१.५१॥

ननु प्रत्यक्षमात्रस्य प्रमाणतयाऽभ्युपगन्ता भूतचतुष्टयतत्त्ववादी चार्वाक आगममात्रस्य प्रामाण्यमपलपन् स्याद्वादं प्रतिक्षिपत्येवेति कथं तं वादीकृत्य स्याद्वादस्य तदभ्युपगमनप्रयोज्यबाधपरिहारलक्षणतापशुद्धिरुपपादयितुं भवता शक्येत्यत आह –

**विमतिः सम्मतिर्वाऽपि, चार्वाकस्य न मृग्यते ।**
***परलोकात्ममोक्षेषु, यस्य मुह्यति शेमुषी ॥१.५२॥***

**विमति**रिति स्याद्वादस्य प्रामाण्यानभ्युपगमोऽप्रामाण्यप्रतिपत्तिर्वेत्यर्थः । **सम्मतिः** स्याद्वादस्य प्रमाणतयोपगमः । **चार्वाकस्य**- **बृहस्पति**मतानुसारिणो लोकायतिकस्य । **न मृग्यते**- नाऽन्विष्यते । चार्वाकस्य स्याद्वादाभ्युपगमोऽस्ति तदनभ्युपगमो वेति न विचार्यते इत्यर्थः ।

कुत एवमुपेक्षा चार्वाकं प्रति भवत इत्यत आह - **परलोके**ति । **यस्य**- चार्वाकस्य **शेमुषी**- बुद्धिः, **परलोकात्ममोक्षेषु मुह्यति**- मोहमनवगाहित्वलक्षणमुपगच्छति । यो हि सर्वतान्त्रिकप्रमाणप्रसाधितान्यपि परलोकादीन्यत्यन्तबुद्धिमान्द्यान्न श्रद्धत्ते, तस्य प्रामाणिकपरिषदि प्रवेश एव नाऽस्तीति वादित्वाभावात् तं प्रति स्याद्वादाभ्युपगमोपपादनमरण्यरुदितकल्पमेवेति भावः ॥१.५२॥

स्याद्वादागमस्य तदनुगमनशीलनयस्य तापपरिशुद्धत्वं नाऽन्यस्येत्युपसंहरति —

**तेनाऽनेकान्तसूत्रं यद्, यद्वा सूत्रं नयात्मकम् ।**
**तदेव तापशुद्धं स्याद्, न तु दुर्नयसज्ञितम् ॥१.५३॥**

**तेने**ति । सर्ववादिसम्मतत्वेन सद्युक्तित उपपद्यमानार्थकत्वेन चेत्यर्थः । **अनेकान्तसूत्रम्**- अनन्तधर्मात्मकवस्तुप्रतिपादकस्याद्वादागमः । **यद्वा**- यच्च, **नयात्मकं सूत्रं**- स्वाभिमतधर्मातिरिक्तधर्मावबोधने गजनिमीलिकामवलम्बमानं सत् स्याद्वादप्रतिपन्नानन्तधर्मात्मकवस्त्वेकदेशावबोधनप्रवणं सूत्रम् । **तदेवे**त्येवकारेण तदुभयव्यतिरिक्तस्य तीर्थान्तरीयवचनस्य तापशुद्धत्वव्यवच्छेदः ।

कथं न तीर्थान्तरीयवचनं तापशुद्धं येनैवकारेण तद्व्यवच्छेदः क्रियत इत्यत आह - **न तु दुर्नयसङ्गत**मिति । अन्यदर्शनानां परस्पराभ्युपगमोपमर्दप्रवृत्तानां सुन्दोपसुन्दन्यायेन दृढावस्थानमेव नाऽस्ति दुर्नयसङ्गतत्वात् । तत् कथं तेषां तापशुद्धत्वम् ? त्रिचतुःकक्षाधावित्वेऽप्युत्तरकालं बाधादिति ॥१.५३॥

सामान्यत एकान्तवादे दुर्नयसङ्गतत्वेन तापशुद्धिमपाकृत्य विशेषतस्तदपाकरणाय नित्यैकान्तवादमधिकृत्य तापाशुद्धिं तदभ्युपगमानुसारेण हिंसाद्यनुपपत्त्या प्रकटयति —

**नित्यैकान्ते न हिंसादि, तत्पर्यायापरिक्षयात् ।**
**मनःसंयोगनाशादौ, व्यापारानुपलम्भतः ॥१.५४॥**

**नित्यैकान्त** इति एकान्तनित्यतयाऽभ्युपगते वस्तुनीत्यर्थः । तेन नित्यैकान्तस्य वस्तुतोऽभावेन निषेधानधिकरणत्वेऽपि[१] न क्षतिः । **न हिंसादि**- हिंसादि न घटते इत्यर्थः । आदिपदादहिंसादिपरिग्रहः ।

घात्यजीवानां पूर्वपर्यायविनाशनमेव हिंसा । एकान्तनित्यस्य तु पर्याय एव नाऽस्ति । यदि सहभावी पर्यायोऽभ्युपगम्येत सोऽपि नित्य एव स्यादिति तन्नाशासम्भवेन हिंसार्थाघटनादित्याह - **तत्पर्यायापरिक्षया**दिति । नित्ये क्रमिकपर्यायो नाऽस्त्येव, तत्सहभाविपर्यायस्य त्वभ्युपगम्यमानस्य नित्यस्याऽपरिक्षयादित्यर्थः ।

ननु तत्तच्छरीरावच्छेदेनाऽऽत्मनो यो मनःसंयोगस्तन्नाश एव तस्य जीवस्य हिंसा, न तु स्वरूपप्रच्युतिस्तत्पर्यायच्युतिर्वेत्यत आह - **मनःसंयोगनाशादा**विति आध्यात्मिकवायुसंयोगनाशाद्युपग्रहः ।

---

१. "असतो नत्थि निसेहो" इति वचनात् ।

यद्यपि मनःसंयोगनाशोऽपि नित्यैकान्तवादे न घटते । आत्मनो मनःसंयुक्तत्वस्वभावत्वे सर्वदा मनः-संयुक्तेनैवाऽऽत्मना भवितव्यम् । अन्यथा मनःसंयोगनाशे तद्रूपेणाऽऽत्मनोऽपि नाशापत्त्या कुत एकान्त-नित्यात्मवादः ? आत्मनस्तदस्वभावत्वे कदापि मनःसंयोग आत्मनि नाऽस्ति, कस्य नाशः स्यात् ? तथाप्यङ्गीकृत्याऽपि मनःसंयोगं तन्नाशं च तदुद्देशेन हिंसकस्य व्यापारानुपलक्षणे न तस्य हिंसात्व-मित्याशयेनाऽऽह – **व्यापारानुपलम्भत** इति ।

अथवाऽनुपलम्भशब्दस्योपलम्भविषयाभावपरत्वेन व्यापारानुपलम्भत इत्यस्य व्यापाराभावाद् व्यापारा-सम्भवादिति यावत् । यच्चाऽलीकं, तत्र कोऽपि व्यापारो न सम्भवतीति सुप्रतीतमेव । एकान्तनित्यवादे तु मनःसंयोगनाशोऽप्यलीक एवेति कथं तत्र व्यापारसम्भवः ?

अथवा हिंसकस्य व्यापारोऽपि दुर्घटः । तज्जन्यत्वे सति तज्जन्यजनकत्वं हि व्यापारत्वम् । तच्च क्रियमाणस्य सम्भवति । नित्यैकान्तवादे तु न किञ्चित् क्रियमाणम् । तदभ्युपगमे नित्यैकान्तवादव्याहतेः । आत्मन एकान्तनित्यत्वं तदन्यस्य तु व्यापारादेरनित्यत्वमपीत्यर्द्धजरतीयमपि न सम्भवति । हिंसकात्मनो नित्यत्वेन कर्तृत्वाद्यसम्भवेन तद्व्यापारत्वस्य तथाप्यघटनादित्यादि सूक्ष्ममीक्षणीयम् ॥१.५४॥

हिंसानुपपत्तौ तदभावरूपाऽहिंसाऽपि नित्यैकान्ते न घटते इत्यायातमेव । क्वचित् प्रमितस्यैव निषेधो भवति, नाऽप्रमितस्य । हिंसा तु तन्मते स्वरूपतोऽभावादेव न क्वचित् प्रमितेति कथं तन्निषेधरूपाऽहिंसाऽपि स्वरूपतो युज्येत ? एवमादिपदग्राह्यौ बन्ध-मोक्षावपि नित्यैकान्त आत्मनि न सङ्गतौ । निर्लिप्तस्याऽऽत्मनो महत्तत्त्वलक्षण-बुद्धिप्रतिबिम्बनादिलक्षण-बुद्धिलेपात्मकबन्धस्याऽभावे तदभावलक्षणमोक्षस्याऽप्यभावात् । 'यस्यैव बन्धस्तस्यैव मोक्ष' इत्येवं बन्धमोक्षसामानाधिकरण्यस्य निगडबद्धमुक्तपुरुषे पूर्वोत्तरकालभेदावच्छेदेन दर्शनादित्याशयेनाऽऽह –

**बुद्धिलेपोऽपि को नित्य-निर्लेपात्मव्यवस्थितौ? ।**
**सामानाधिकरण्येन, बन्ध-मोक्षौ हि सङ्गतौ ॥१.५५॥**

**बुद्धिलेपोऽपीति** । सत्त्वरजस्तमस्साम्यावस्थालक्षण-मूलप्रकृतिविकारभूत-महत्तत्त्वलक्षणबुद्ध्या भेदाग्रहनिबन्धन-तत्प्रतिबिम्बताप्रयुक्त-तद्धर्मकर्तृत्वाद्यभिमानलक्षणलेपोऽपीत्यर्थः । **कः** किम आक्षेपार्थकत्वात्र कश्चिदित्यर्थः । तत्र हेतुः **नित्यनिर्लेपात्मव्यवस्थिता**विति । कदाचित्सलेपस्याऽपि कदाचिन्निर्लेपता भवतीत्यत आह – **नित्ये**ति । एवं च सलेपत्वाभ्युपगमे कुतो नित्यनिर्लेपत्वम् ?

बुद्धिलेपात्मकबन्धाभावे नित्यनिर्लेपतालक्षण-नित्यमुक्तत्वमपि तस्य वक्तुं न युज्यते । पूर्वं बन्धसद्भावे उत्तरकालं तदभावस्यैव मुक्तित्वादित्याशयेनाऽऽह – **सामानाधिकरण्ये**नेति । साङ्ख्यमते बुद्धिगतात्मप्रतिबिम्बस्य तत्कर्तृत्वाद्यभिमानलक्षणो बन्धः । मुक्तिस्तु बुद्धेः स्वपरिणामिनि प्रधाने तिरोभावलक्षणविनाशे सति शुद्धचैतन्यरूपस्याऽऽत्मन इति न तयोः सामानाधिकरण्यमिति बोध्यम् ॥१.५५॥

**साङ्ख्या**दिनित्यैकान्तवादे हिंसादेरघटनात् तापशुद्धत्वाभावमुपपाद्य **ताथागता**भिप्रेतानित्यैकान्तवादेऽपि हिंसादेरघटनात् तापशुद्धत्वाभावमुपपादयति –

**अनित्यैकान्तपक्षेऽपि, हिंसादिकमसङ्गतम् ।**
**स्वतो विनाशशीलानां, क्षणानां नाशकोऽस्तु कः? ॥१.५६॥**

हिंसकेन पुरुषेण हिंस्यस्य पुरुषस्य विनाशनमेव हिंसा, न तु स्वतो विनाशः । तथा सति विनाशं प्रति स्वस्य प्रतियोगिविधया कारणत्वेन हिंस्यस्याऽपि हिंसकत्वापत्तेः । क्षणिकवादे स्वतो विनशनशीलानां पदार्थानामुत्पत्त्यनन्तरं स्वत एव विनाशेन न हिंसोपपन्नेत्याह - **स्वतो विनाशशीलाना**मिति । परेण विनाशे, परसन्निधाने विलम्बाद् विनाशविलम्बोऽपि स्यादित्थं च कतिपयक्षणस्थायित्वे न क्षणिकत्वं स्यादित्यत उक्तं **स्वत** इति ।

अथवा विनाशिनां पदार्थानां स्वतो विनाशशीलत्वमस्ति न वा ? अन्त्ये विनाशककारणसहस्रोपनिपातेऽपि ते न विनश्येरन्, अविनश्वरस्वभावस्य विनाशायोगात् । आद्ये स्वभावबलादेव ते विनश्येरन्, तत्र कारण-व्यापारणं व्यर्थमेवेति **बौद्ध**स्यैषोऽभिप्रायस्तदाश्रयेणाऽऽह - **स्वत** इति ॥१.५६॥

विनाशक्षणस्याऽव्यवहितपूर्वक्षणो विनाशकः, तेन विनाशरूपहिंसाऽव्यवहितपूर्वक्षणो हिंसक इत्येवं हिंसकत्वोपपत्तिस्तन्मतेऽपि सम्भवतीत्याह —

**आनन्तर्यं क्षणानां तु, न हिंसादिनियामकम् ।**
**विशेषादर्शनात् तस्य, बुद्ध-लुब्धकयोर्मिथः ॥१.५७॥**

**आनन्तर्य**मित्यव्यवहितपूर्ववर्तित्वमित्यर्थः । यत्किञ्चिन्मृगविनाशाव्यवहितपूर्वक्षणे व्याधक्षणोऽप्यस्ति सुगतक्षणोऽप्यस्ति । तथा च व्याधक्षणस्येव सुगतक्षणस्याऽपि तन्मृगहिंसकत्वमनिष्टमापतितमेवमभ्युपगमे बौद्धस्य । न च **सुगत**क्षणाद् व्याधक्षणस्याऽऽनन्तर्यमन्तरेण कोऽपि विशेषो दृश्यते, येन तादृशविशेषबलाद् व्याधस्यैव हिंसकत्वं न बुद्धस्येति वक्तुं शक्येताऽपीत्याह - **विशेषे**ति । **तस्य**- मृगनाशाव्यवहितपूर्वक्षण-वृत्तित्वस्य । **मिथः**- परस्परं बुद्ध-लुब्धयोर्विशेषादर्शनादित्यर्थः ॥१.५७॥

नन्वव्यवहितपूर्ववर्तित्वाविशेषेऽपि, बुद्धस्य न सङ्क्लिष्टं चित्तं, लुब्धकस्य तु सङ्क्लिष्टं चित्त'मेनं व्यापादयामी'त्यध्यवसायात् । अतो विशेषाल्लुब्धक एव व्यापादको, न तु बुद्ध इत्यत आह —

**सङ्क्लेशेन विशेषश्चे-दानन्तर्यमपार्थकम् ।**
**न हि तेनाऽपि सङ्क्लिष्ट-मध्ये भेदो विधीयते ॥१.५८॥**

**सङ्क्लेशेने**ति अध्यवसायविशेषेणेत्यर्थः । **विशेषश्चेत्**- अक्लिष्टचित्तबुद्धक्षणात् सङ्क्लिष्टचित्तलुब्ध-कक्षणस्य भेदश्चेत् । तर्हि यस्य परपीडादिविषयोऽध्यवसायः स हिंसकस्तदितरस्तु न तथेत्येव हिंसका-हिंसकविभागोऽस्तु; अव्यवहितपूर्ववर्तित्वस्य तत्र प्रवेशोऽपार्थकस्तत्सत्त्वेऽपि बुद्धस्य सङ्क्लेशाभावादेवा-ऽहिंसकत्वादित्याह - **आनन्तर्यमपार्थक**मिति । तत्र हेतुः **न ही**ति । **हि**- यतः, **तेनाऽपि**- आनन्तर्येणाऽपि । **सङ्क्लिष्टमध्ये**- सङ्क्लिष्टचित्तस्वरूपस्याऽन्तः, **भेदो**- विशेषो, **न विधीयते**- न क्रियते । यस्य सङ्क्लिष्टस्याऽऽनन्तर्यं यस्य च नाऽऽनन्तर्यं तयोः स्वरूपतोऽविशेष एवेत्यर्थः ॥१.५८॥

अस्तु स्वरूपोपरञ्जकमेवाऽऽनन्तर्यं, न तु हिंसकलक्षणे तस्य प्रवेशः । सङ्क्लेश एव तु हिंसकलक्षणम् । तथा च यस्य सङ्क्लिष्टं चित्त'मेनं व्यापादयामी'त्यध्यवसायकलुषितं स हिंसकस्तदितरस्तु अहिंसक इति विभागः कान्तः, किं नश्छिन्नमित्यत आह –

**मनोवाक्काययोगानां, भेदादेवं क्रियाभिदा ।**
**समग्रैव विशीर्येते-त्येतदन्यत्र चर्चितम् ॥१.५९॥**

**मनोवाक्काययोगाना**मिति । मनआदीनां प्रत्येकं योगपदेनाऽन्वये मनोयोग-वाग्योग-काययोगानामित्यर्थः । तेषां **भेदाद्**- विशेषात्, **समग्रैव**- यावत्यपि, **क्रियाभिदा**- हिंसाक्रियावैलक्षण्यम्, **एवं**[१]- सङ्क्लेशमात्रस्य हिंसकलक्षणत्वाभ्युपगमे सति, **विशीर्येत**- नोपपद्येत ।

मनोवाक्काययोगानां हिंसां प्रत्यकारणत्वेन तद्वैलक्षण्याद् हिंसारूपक्रियावैलक्षण्यस्याऽसम्भवात्, कारणवैलक्षण्यस्यैव कार्यवैलक्षण्यप्रयोजकत्वात् । तथा च विलक्षणहिंसोपपत्तये विलक्षणकायादिव्यापारस्य लोकप्रतीतस्य विलोपे लोकयात्राविप्लव इत्याशयः ।

अत्र बहु वक्तव्यं, ग्रन्थगौरवभयात्तु नोच्यते, ग्रन्थान्तरात् तदवसेयमतो न न्यूनतादोषावकाश इत्यावेदनायोक्तम् **एतदन्यत्र चर्चित**मिति ॥१.५९॥

नित्याद्येकान्तवादे उक्तदिशा हिंसाद्यघटनाद् दोषभूयस्त्वेन न तापशुद्धत्वम् । किन्तु नित्यानित्याद्यनेकान्तवादे एव हिंसादेः सर्वस्योपपत्तेः, पक्षपाताद्याग्रहविलासाभावाद् दोषलेशासंस्पृष्टत्वेन, सर्वत्र माध्यस्थ्यस्य सम्भवेन तापपरिशुद्धत्वम् । अतस्तज्ज्ञानमेवाऽध्यात्मभावभाजनमित्याशयेनाऽऽह –

**नित्यानित्याद्यनेकान्त-शास्त्रं तस्माद् विशिष्यते ।**
**तद्दृष्ट्यैव हि माध्यस्थ्यं, गरिष्ठमुपपद्यते ॥१.६०॥**

**नित्यानित्ये**ति । नित्यानित्याद्यनेकान्तप्रतिपादकस्याद्वादागम इत्यर्थः । **तस्मात्**- एकान्तवादगतोपदर्शितदोषाभावात् । **विशिष्यते**- शास्त्रान्तरतो विशिष्टम् । **तद्दृष्ट्यैव**- अनेकान्तशास्त्रदृष्ट्यैव ॥१.६०॥

तस्याऽनेकान्तवादस्य नयान्यतमेषु पक्षपाताभावेन सर्वनयोपपादकत्वतः 'अयं नय एतस्मान्नयाद् गरीयानित्युपादेयः, अयं च नय एतस्मान्नयाद् दुर्बल इति परित्याज्य' इति विचारणकलङ्कोऽपि नाऽस्त्यतः सर्वैरपि वादिभिर्मोक्षमार्गदर्शकत्वेनाऽऽश्रयणं युक्तमित्याशयेनाऽऽह –

**यस्य सर्वेषु समता, नयेषु तनयेष्विव ।**
**तस्याऽनेकान्तवादस्य, क्व न्यूनाधिकशेमुषी? ॥१.६१॥**

यस्याऽधिकृतस्याद्वादस्य सर्वत्र नयेषु स्वप्रसूतत्वेन, **तनयेष्विवे**त्यत्रोत्प्रेक्षायामिवशब्दो ज्ञेयः । **समता**- पक्षपातराहित्येन माध्यस्थ्यम् । **क्वे**ति काक्वा न कुत्रापि नये इत्यर्थः । **न्यूनाधिकशेमुषी**- न्यूनाधिकविचारणा ।

---

१. वृत्त्यन्तरे 'एवं' पदस्य 'सर्वत्राऽनन्तरक्षणवृत्तित्वस्यैव भेदकत्वाभ्युपगमे' इत्यर्थो वर्णितः । आनन्तर्येण मनोवाक्काययोगभेदोपक्षयात् तदपेक्षायाः क्रियाभिदाया असम्भवादिति तस्य तात्पर्यम् । एतदपि नाऽनुचितं प्रतिभाति ।

'अस्य नयस्याऽनेन नयेन बाधा भव'त्वित्यभिसन्धाय तन्नयप्रस्तावे तद्विचारणा- तदुपपादकयुक्ति-विरचनाऽल्पीयसी; 'अस्य च नयस्य केनाऽपि नयेन बाधो मा जायता'मित्यभिसन्धाय तन्नयप्रस्तावे तद्विचारणा- तदुपपादकयुक्तिप्ररूपणा महतीत्येवं न; किन्तु यस्य नयस्य यदा प्रस्तावस्तस्य नयस्य यावद्भिः प्रमाणैः प्ररूपणाऽकुण्ठिता निष्पन्ना भवति तावद्भिरपि प्रमाणैस्तस्य प्ररूपणैवाऽऽदृतेति भावः ॥१.६१॥

यथा च सन्नयेषु स्वप्रसूतेष्वविशेषेण तत्तदपेक्षयोपपादनलक्षणं माध्यस्थ्यमस्य, तथा दुर्नयेषु परस्परयुक्तिव्रातकदर्थितेषु स्वांशताभावावलोकनत उपेक्षालक्षणं माध्यस्थ्यं निराबाधमेव । एको दुर्नयः स्वप्रतिपक्षभूतं दुर्नयं दूषयतु, स्वानुकूलं च दुर्नयं भूषयतु वा । नैतावता स्याद्वादस्य काऽपि क्षतिः । तेषां दुर्नयत्वेन स्वप्रसूतत्वाभावादित्याह –

**स्वतन्त्रास्तु नयास्तस्य, नांऽशाः किन्तु प्रकल्पिताः ।**
**रागद्वेषौ कथं तस्य, दूषणेऽपि च भूषणे ॥१.६२॥**

**स्वतन्त्रास्त्व**ति स्याद्वाददर्शितापेक्षाविकला इत्यर्थः । अत एव च दोषगणोपनिपातस्तेष्वित्यभिसन्धिः । **तस्य**- अनेकान्तवादस्य । तेषां नयानां **दूषणे भूषणेऽपि च तस्य**- स्याद्वादस्य **रागद्वेषौ कथं**- न कथञ्चित् । तथा च रागद्वेषराहित्यलक्षणमाध्यस्थ्यं दुर्नयापेक्षयाऽप्यस्य निर्वहतीत्याशयः ॥१.६२॥

अमुमेवाऽर्थं दृष्टान्ततो द्रढयति –

**अर्थे महेन्द्रजालस्य, दूषितेऽपि च भूषिते ।**
**यथा जनानां माध्यस्थ्यं, दुर्नयार्थे तथा मुनेः ॥१.६३॥**

**मुने**रिति स्याद्वादिनस्तत्रोपेक्षादृष्ट्या मूकत्वान्मुनित्वम् । निगदार्थमन्यत् ॥१.६३॥

ननु स्याद्वादी दुर्नयानां परस्परदूषणभूषणयो रागद्वेषाभावान्माध्यस्थ्यमवलम्ब्यताम् । यदा तु वादिन एव स्वाभिमतदुर्नयाभिनिवेशात् स्याद्वादमेव दूषयितुं प्रवृत्तास्तदा तदनिराकरणे स्याद्वाद एव तदाग्रहोपबद्धानेक-दोषदुःस्थः स्यात् । तन्निराकरणे तु स्वाभीष्टे स्याद्वादे रागः परत्र च द्वेषः प्रकटितः स्यात् । एवं सति राग-द्वेषाचान्तस्वान्तः स्याद्वादी कथं मध्यस्थतया स्वस्थः ? तमन्तरेण कथमध्यात्मभाजनत्वमस्येत्यत आह –

**दूषयेदज्ञ एवोच्चैः, स्याद्वादं न तु पण्डितः ।**
**अज्ञप्रलापे सुज्ञानां, न द्वेषः करुणैव तु ॥१.६४॥**

स्याद्वाददूषणप्रवृत्तस्य पुरुषस्य स्याद्वादस्वरूपानभिज्ञत्वेन तत्प्रयुक्तदोषस्य वस्तुतः स्याद्वादेऽभावेन दूषणाभासतया च तेन स्याद्वादो दूषितो न भवतीति तादृशदूषणसहस्रमपि स्याद्वादिनो न क्षतिमावहति । सोऽपि च वादी अज्ञत्वादेव न तत्राऽपराध्यति । अज्ञत्वेन तस्य बालकल्पतया तत्र करुणैव स्याद्वादिनो, न तु द्वेष इति न माध्यस्थ्यहानिरिति भावः । पद्यं तूत्तानार्थमेव ॥१.६४॥

यादृशज्ञानवतो नैकदर्शनाग्रहेण पक्षपातस्तादृशज्ञानवत एव स्याद्वादिनः शास्त्रवित्त्वेन मोक्षोद्देशप्रवृत्ततया सर्वदर्शनानां साम्यालोचनेन मध्यस्थभावादध्यात्मभाजनत्वमित्युपपादयितुं ज्ञानत्रैविध्यमुपदर्शयति –

**त्रिविधं ज्ञानमाख्यातं, श्रुतं चिन्ता च भावना ।**
**आद्यं कोष्ठगबीजाभं, वाक्यार्थविषयं मतम् ॥१.६५॥**

**आद्यं**- श्रुतज्ञानम् । **कोष्ठगबीजाभ**मिति । कोष्ठस्थितबीजस्योत्तरकाले क्षेत्रवपने सलिल-धरणि-घामादिसहकारसमवधानाद् यादृशाङ्कुरादिकार्यनिष्पादकत्वलक्षणं फलोपधानं तस्य पूर्वमभावेऽपि, अङ्कुरजनन-योग्यतालक्षणं सामर्थ्यं शिलाशकलादिव्यावृत्तं समस्ति । तथाऽस्याऽपि ज्ञानस्य सूक्ष्मयुक्त्यादिसहकारि-सम्पत्तितो यादृशार्थावगाहनद्वाराऽज्ञानादिविशेषोन्मूलकत्वलक्षणं फलोपधानं तस्य पूर्वमभावेऽपि, तज्जन-नयोग्यतालक्षणं तत्सामर्थ्यं तीर्थान्तरीयशास्त्रजज्ञानव्यावृत्तं समस्तीति कोष्ठगबीजसदृशं तदित्यर्थः । तच्च **वाक्यार्थविषयं**- यथाश्रुतपदकदम्बोपस्थिता-ऽर्थसमूहयोग्यान्वयविषयकं **मतं**- पूर्वाचार्यैः स्वीकृतम् ॥१.६५॥

चिन्ताज्ञानस्वरूपमुपदर्शयति —

**महावाक्यार्थजं यत्तु, सूक्ष्मयुक्तिशतान्वितम् ।**
**तद् द्वितीयं जले तैल-बिन्दुरीत्या प्रसृत्वरम् ॥१.६६॥**

**महावाक्यार्थज**मिति । तदेव वाक्यं येन येन वाक्येन तदर्थान्वययोग्यार्थकेन समभिव्याहारमालम्ब्य निराकाङ्क्षप्रतिपत्तिमाधातुमलं, तत्तद्वाक्यैकवाक्यतापन्नं सन्महावाक्यमुच्यते । निराकाङ्क्षबोधजनकवाक्यं महावाक्यमिति यावत् । तदर्थजन्यमित्यर्थः ।

यद्यपि शाब्दबोधं प्रति नाऽर्थस्य कारणत्वं, वर्तमानार्थविषयकसांव्यवहारिकप्रत्यक्षं प्रत्येव विषयस्य कारणत्वात् । तथापि तादृशार्थसद्भावे एव तद्बोधजननं, न तु सोऽर्थो बुद्धिपरिकल्पित इत्यावेदनाय तदर्थ-मालम्ब्योपायान्तरतो जायमानस्याऽपि निराकाङ्क्षज्ञानस्य तज्जन्यत्वं क्षैमिकमवलम्ब्य तथोक्तिस्तादृशार्थस्य वास्तविकत्वावगतये इति बोध्यम् ।

एतादृशमपि ज्ञानं यदि वाद्युपदर्शितकुयुक्तिशतव्रातेन यथाकथञ्चिद् बाधितार्थकं स्यान्न तदाऽस्य निराकाङ्क्षत्वाभावेन महावाक्यार्थजत्वोपपत्तिरत आह - **सूक्ष्मे**ति । वादियुक्तिव्रातदुर्भेद्यार्थविषयकत्वेन युक्तीनां सूक्ष्मत्वमवज्ञेयम् । एतादृशस्य बोधस्य न कुयुक्तिशतविभीषिकासम्भावनाऽपि । वस्तुत एतादृशयुक्ति-शतावलोकनेन वादिन एव कुण्ठितबोधाः स्वयुक्तीनामापातरमणीयतामाकलयन्तः प्रथमत एव तदुद्भावनाना-दृतव्यापाराः । ये च कदाग्रहग्रहिलास्तथाऽवलोकयन्तोऽपि युक्त्याभासशतमुपक्षिपन्ति, ते प्रामाणिकपरिषद्यना-दृतवचना एवेति न तदुद्भावितयुक्त्याभासशतैरप्युक्तबोधस्य किञ्चिदप्यपचीयते इति भावः ।

ननु वाक्यं वाक्यार्थविषयकं बोधमुत्पाद्य निवृत्तव्यापारं कथमुत्तरकालमतिशयविशेषमन्तरेण महावाक्यार्थविषयकबोधजनकं स्यादित्यतस्तस्य सातिशयत्वं दृष्टान्तत उपदर्शयति - **जल** इति । यथा जले प्रक्षिप्तस्तैलबिन्दुर्न युगपदेव सर्वं जलं व्याप्नोति, किन्तु प्रसृत्वरस्वभावः क्रमेण; तथाऽयमपि बोधः सूक्ष्मयुक्तिशतान्वितः । अनुभूयमानश्चाऽतिशयो नाऽन्यत्राऽदर्शनमात्रेणाऽपलपितुं शक्यः । तेन शब्द-बुद्धि-कर्मणां विरम्य व्यापाराभावादित्यादि न्यायो नाऽत्र क्रमते इत्याशयः ॥१.६६॥

भावनाज्ञानं लक्षयति –

**ऐदम्पर्यगतं यच्च, विध्यादौ यत्नवच्च यत् ।**
**तृतीयं तदशुद्धोच्च[1]-जात्यरत्नविभानिभम् ॥१.६७॥**

**ऐदम्पर्यगत**मिति । अस्य वाक्यस्योपक्रमोपसंहारादिभिः षड्भिस्तात्पर्यलिङ्गैरत्राऽर्थे तात्पर्यमित्यवबोधजनितं तात्पर्यविषयविषयकमित्यर्थः ।

एवम्भूतमपि विधिनिषेधशास्त्रसमन्वयप्रवणमेव तदुपादेयं, नाऽन्यादृशमित्याह – **विध्यादा**विति । आदिपदान्निषेधोपग्रहः । **यत्नव**दिति । यत्नवत्त्वं चाऽस्य विधिनिषेधशास्त्रयोरापाततो विरोधप्रतिसन्धाने, यादृशार्थपरत्वे विधिशास्त्रस्य न निषेधशास्त्रतो बाधः, निषेधशास्त्रस्य च यादृशार्थपरत्वे न विधिविहितनिषेधकत्वेनाऽनुपपन्ननिषेधार्थकत्वं, तादृशार्थतात्पर्यावबोधप्रभवत्वम् । तेनाऽऽत्मगतस्य यत्नस्य बोधेऽभावेऽपि न क्षतिः ।

**तृतीयं**- भावनास्वरूपं तद् ज्ञानम् । तस्य ज्ञानस्य परोपमित्या माहात्म्यं प्रकटयति – **अशुद्धे**ति । उच्चजात्यरत्नस्य मलसम्पर्काद् यथाऽशुद्धता, तथाऽस्याऽपि ज्ञानावरणक्षयोपशमविशेषजनितस्य मनाग् ज्ञानावरणसम्पर्कोऽस्तीति ज्ञानावरणरूपमलसम्पर्केणाऽशुद्धता । अत एव शुद्धजात्यरत्नप्रभानिभात् सकलवस्त्वालोकस्वरूपकेवलज्ञानादस्याऽपकृष्टत्वम् ॥१.६७॥

ज्ञानत्रयस्य कार्यभेदं क्रमेणोपदर्शयति –

**आद्ये ज्ञाने मनाक् पुंस-स्तद्रागाद् दर्शनग्रहः ।**
**द्वितीये न भवत्येष, चिन्तायोगात् कदाचन ॥१.६८॥**

**चारिसञ्जीविनीचार-कारकज्ञाततोऽन्तिमे ।**
**सर्वत्रैव हिता वृत्ति-र्गाम्भीर्यात् तत्त्वदर्शिनः ॥१.६९॥**

**आद्ये ज्ञाने**- श्रुतज्ञाने । **मनाक्**- ईषत् । **तद्रागात्**- श्रुतरागात्, **दर्शनग्रहः**- 'एतद् दर्शनं प्रमाणम्, अन्यच्च न प्रमाण'मित्येवं पक्षपातः । अत एतज्ज्ञानवत्त्वं नाऽध्यात्मभाजनत्वमित्यभिसन्धिः ।

**द्वितीये**- चिन्ताज्ञाने, **न कदाचन**- कदाचिदपि न **भवत्येष**- रागाद् दर्शनग्रहो भवति । दर्शनाग्रहे सत्यपि चारकत्वात् सूक्ष्मयुक्तिशतप्रभावितत्वस्वभाव एवाऽस्योच्छिद्येतेत्याशयेन निषेधे हेतुमाह – **चिन्तायोगा**दिति । एतज्ज्ञानवतोऽपि माध्यस्थ्यं सम्भवति ॥१.६८॥

**अन्तिमे**- भावनाज्ञाने । **चारी**त्यादिदृष्टान्तः समयप्रतीतः । **सर्वत्रैव हिता वृत्ति**रित्यनेनाऽस्याऽध्यात्मभाजनत्वं सर्वथैवोपपन्नमित्यावेदयति । तत्र हेतु**र्गाम्भीर्या**दिति । एतज्ज्ञानवतस्तत्त्वदर्शित्वं निरुपचरितमित्यावेदनायोक्तं **तत्त्वदर्शिन** इति ॥१.६८,६९॥

---

१. क्वचित् "तद् विशुद्धोच्च०" इति पाठः । सोऽशुद्धः प्रतिभाति ।

भावनाज्ञानवतः शास्त्रवित्त्वमाविष्करोति –

**तेन स्याद्वादमालम्ब्य, सर्वदर्शनतुल्यताम् ।**
**मोक्षोद्देशाविशेषेण, यः पश्यति स शास्त्रवित् ॥१.७०॥**

**तेने**ति । भावनाज्ञानेनेत्यर्थः । **स्याद्वादमालम्ब्य**- अनेकान्तवादमाश्रित्य कथञ्चिदर्थप्रवेशेन । कथञ्चिदर्थमेव मनसि स्थितं प्रकटयति - **मोक्षोद्देशाविशेषेणे**ति । तथा च दर्शनानां स्वस्वभेदनिमित्तमन्तव्यप्रकारभेदेऽपि मोक्षोद्देशेन प्रवृत्तिरविशिष्टेति तदपेक्षया सर्वदर्शनतुल्यतागमः स्याद्वादमवलम्ब्यैव, न तु तं तटस्थीकृत्येति स्याद्वाद्येव सर्वदर्शनतुल्यताद्रष्टा शास्त्रवित्, नाऽन्यः ।

स्याद्वादावलम्बनमपि भावनाज्ञानवानेव कर्तुं विदग्धो, यो यथावच्छास्त्रार्थं विधिनिषेधव्यतिमिश्रमविरोधेन योजयितुं जानातीत्याशयः ॥१.७०॥

ननु सर्वदर्शनतुल्यतादर्शनेन माध्यस्थ्यमेव स्यात्, ततः शास्त्रवित्त्वं कथम् ? अतो माध्यस्थ्यस्य शास्त्रार्थत्वमाविष्करोति –

**माध्यस्थ्यमेव शास्त्रार्थो, येन तच्चारु सिध्यति ।**
**स एव धर्मवादः स्या-दन्यद् बालिशवल्गनम् ॥१.७१॥**

शास्त्रस्य तात्पर्यविषयोऽर्थः, तेन माध्यस्थ्यस्य शास्त्रानभिधेयत्वेऽपि न क्षतिः । कुतो माध्यस्थ्यस्य साक्षाच्छास्त्रेणाऽनभिधानेऽपि शास्त्रार्थत्वमुररीक्रियते इत्यत आह[१]- **येने**ति । येन माध्यस्थ्येनेत्यर्थः । **तत्**- शास्त्रं, **चारु**- समीचीनं, **सिद्ध्यति**- निष्पद्यते । अन्यथा रागद्वेषकलुषितस्य शासनत्राणशक्तिरूपव्युत्पत्तिनिमित्ताभावाच्छास्त्रत्वमेव न स्यात् ।

अथवा शास्त्रार्थ इत्यस्य शास्त्रजज्ञानजन्यफलमित्यर्थः । **येन**- तादृशफलवत्त्वेन, **तत्**- शास्त्रं, **चारु**- समीचीनमिष्टसाधनस्वरूपं **सिद्ध्यति**- भवति । अन्यथेष्टसाधनत्वाभावेन समीचीनत्वं तस्य न स्यात् ।

**स एव**- माध्यस्थ्यपर्यवसितः शास्त्रार्थ एव । एवकारव्यवच्छेद्यमाह - **अन्यद् बालिशवल्गन**मिति । अन्यत्- माध्यस्थ्यार्थविकलं यत्किमपि दर्शनं तद् बालिशानां- मूर्खाणामसंबद्धप्रलपनमिवेत्यर्थः ॥१.७१॥

न केवलं माध्यस्थ्यलक्षणाध्यात्मवर्जितस्य शास्त्रस्य धर्मवादत्वाभावाद् हितानावहत्वं, स्वपक्षपरिग्रहपरपक्षखण्डनप्रधानत्वेन रागद्वेषकालुष्यतः संसारस्वभावत्वेनाऽनिष्टजनकत्वमपीत्याह –

**पुत्रदारादि संसारो, धनिनां मूढचेतसाम् ।**
**पण्डितानां तु संसारः, शास्त्रमध्यात्मवर्जितम् ॥१.७२॥**

यथा **धनिनां मूढचेतसां**- तत्त्वज्ञानरहितत्वेन मोहसम्मूढमनसां **पुत्रदारादि** रागद्वेषजनकत्वेन भवभ्रमणहेतुत्वात् **संसार** एव, कारणे कार्योपचारात् । तथैव **अध्यात्मवर्जितशास्त्रस्य** स्वपक्षस्थापनायास-

१. वृत्त्यन्तरे "येन वादेन चारु- सुन्दरं तत्- माध्यस्थ्यं सिद्ध्यति- निष्पद्यते, स एव धर्मवादः स्या"दित्यर्थो विहितः । सोऽपि सङ्गत एव भाति ।

परपक्षखण्डनायासजनितदुःखजनकत्वेनेहैव तावदतिपीडकत्वेन संसारत्वं, परलोकेऽपि चाऽसदुपदेशादिजनित-पापफलदुःखसम्पादकत्वेन भवभ्रमणहेतुत्वेन तत्त्वमिति बोध्यम् ॥१.७२॥

माध्यस्थ्यस्य सर्वतः प्राधान्यमर्थत उपदर्शयति –

**माध्यस्थ्यसहितं ह्येक-पदज्ञानमपि प्रमा[१] ।**
**शास्त्रकोटिर्वृथैवाऽन्या, तथा चोक्तं महात्मना ॥१.७३॥**

**माध्यस्थ्यसहित**मिति । पक्षपातादिरहितमित्यर्थः । तच्च स्याद्वादार्थालम्बनत्वेनैव सम्पद्यते । **एक-पदज्ञानमपि**- एकपदजन्यज्ञानमपि । अपिना वाक्य-महावाक्यजज्ञानस्य माध्यस्थ्यसहितस्य प्रमात्वे किमु वक्तव्यमित्यावेदितं भवति ।

**अन्या**- माध्यस्थ्यविकला स्याद्वादार्थानपेक्षेति यावत् । **शास्त्रकोटि**पदं बहुसङ्ख्यामात्रोपलक्षणम् । **वृथैवे**ति । प्रमाजनकत्वाभावेन ततः कस्यचिदप्यर्थस्याऽसिद्धेः ।

उक्तार्थे प्राचां संवादमुपदर्शयति - **तथा चोक्तं महात्मने**ति ॥१.७३॥

तद्वचनमुट्टङ्कयति –

**"वादांश्च प्रतिवादांश्च, [२]वदन्तोऽनिश्चितांस्तथा ।**
**तत्त्वान्तं नैव गच्छन्ति, तिलपीलकवद्[३] गतौ" ॥१.७४॥**

स्वपक्षसाधनं वादः, प्रतिपक्षखण्डनं प्रतिवाद इतिकृत्वा वाद-प्रतिवादयोर्भेदोऽवधारणीयः । **तिलपील-कवदि**ति दृष्टान्तः समयज्ञादवसेयः ॥१.७४॥

माध्यस्थ्यसहितपदज्ञानवतो विशिष्टसुखाप्तौ निदर्शनमुपदर्शयति –

**इति यतिवदनात् पदानि बुद्ध्वा, प्रशम-विवेचन-संवराभिधानि ।**
**प्रदलितदुरितः क्षणाच्चिलाति-तनय इह त्रिदशालयं जगाम ॥१.७५॥**

**इति**शब्दो हेतुवचनः । तथाचैकपदज्ञानस्य प्रमात्वत **इह चिलातितनयो[४] यतिवदनात् प्रशमविवेचन-संवराभिधानि पदानि बुद्ध्वा प्रदलितदुरितः** सन् **क्षणा**दतिशीघ्रं **त्रिदशालयं**- स्वर्गं **जगामे**त्यन्वयः । अर्थस्तु व्यक्त एवेति ॥१.७५॥

चिलातितनयस्य स्याद्वादावगमाभावान्माध्यस्थ्यमेव दुर्घटमिति पदविशेषज्ञानमात्रेण स्वर्गगमनमसम्भावना-स्पदमित्यत आह –

**न चाऽनेकान्तार्थावगमरहितस्याऽस्य फलितं,**
**कथं माध्यस्थ्येन स्फुटमिति विधेयं भ्रमपदम् ।**

---

१. प्रमा- साफल्यसम्पादकम् । २. अत्र योगबिन्दुवृत्त्याद्यनुसारेण "वदन्तो निश्चितांस्तथा" इति पाठोऽपि सम्भाव्यते । ३. तिलपीलकवद्- निरुद्धाक्षसञ्चार-तिलयन्त्रवाहननियुक्तैकगोमहिषादिवत् । ४. चिलातिपुत्रस्य कथानकमावश्यकनिर्युक्ति - ८७२-८७५ गाथातोऽवसेयम् ।

**समाधेरव्यक्ताद् यदभिदधति व्यक्तसदृशं,**
**फलं योगाचार्या ध्रुवमभिनिवेशे विगलिते ॥१.७६॥**

**न चे**त्यस्य **विधेय**मित्यनेनाऽन्वयः । अनेकान्तार्थावगमरहितस्याऽस्य चिलातितनयस्य कथं माध्यस्थ्येन स्फुटं फलितमिति भ्रमपदं न च विधेयम् ।

निषेधे हेतुः **समाधे**रिति । **यत्**- यस्मात्, **योगाचार्या**- योगस्वरूपाभिज्ञाः सूरयोऽ**भिनिवेशे**- कदाग्रहे **विगलिते** सति **अव्यक्तात् समाधेः व्यक्तसदृशं फलं ध्रुव**मित्यभिदधतीत्यन्वयः ।

अर्थस्त्वस्याऽपि व्यक्त एव । केवलमेकान्ताभिनिवेशाभावात् सामान्यतोऽनेकान्तार्थावगमस्तस्याऽप्यस्त्येवेति भावार्थोऽवसेयः ॥१.७६॥

प्रथमं शास्त्रयोगशुद्ध्यधिकारमुपसंहरति –

**विशेषादोघाद् वा सपदि तदनेकान्तसमये,**
**समुन्मीलद्भक्तिर्भवति य इहाऽध्यात्मविशदः ।**
**भृशं धीरोदात्तप्रियतमगुणोज्जागररुचि-**
**र्यशःश्रीस्तस्याऽङ्कं त्यजति न कदाऽपि प्रणयिनी ॥१.७७॥**

**तत्**- तस्मात् पूर्वोपदर्शितयुक्तिदृष्टान्तकदम्बतः । **विशेषाद्**- विशेषरूपतः, **ओघात्**- सामान्यरूपतः, वाकारो विकल्पार्थक उभयोः समप्रधानताख्यापनार्थः । **सपदि**- झटिति, न तु स्याद्वादराद्धान्ते कारणफलादिपर्यालोचनविलम्बनतो विलम्बेन भक्तिर्विधेयेति भावः ।

**इह**- अनेकान्तसमये **अध्यात्मविशदो यः** कश्चित् पुरुषविशेषः **समुन्मीलद्भक्तिः**- प्रकटितभक्ति**र्भवति**- स्यात्, **तस्य** पुरुषविशेषस्याऽ**ङ्कं**- क्रोडं **भृशम्**- अत्यर्थं **प्रणयिनी**- प्रियतमा **यशःश्रीः**- यशोलक्ष्मीः; अनेन चाऽध्यात्मोपनिषत्प्रकरणप्रणेता श्रीम**द्यशोविजयो**पाध्यायः स्वनामोट्टङ्कनं कृतवान्; यशःश्रीः कथम्भूतेत्यपेक्षायामाह - [१] **धीरोदात्तप्रियतमगुणोज्जागररुचि**रिति, कदापि न त्यजति ॥१.७७॥

**॥ इति शास्त्रयोगशुद्धिनामा प्रथमोऽधिकारः ॥**

---

१. नायकस्य धीरोदात्तादिभेदा नाट्यशास्त्रादितोऽवगन्तव्याः ।

# २
# ज्ञानयोगशुद्धिनामाऽधिकार:

अथ शास्त्रयोगसम्पन्न एव ज्ञानयोगेऽधिकृतो भवतीति शास्त्रयोगप्ररूपणानन्तरं ज्ञानयोगं निरूपयति –

**दिशा दर्शितया शास्त्रै-र्गच्छन्नच्छमतिः पथि ।**
**ज्ञानयोगं प्रयुञ्जीत, तद्विशेषोपलब्धये ॥२.१॥**

**अच्छमतिः**- निर्मलमतिः माध्यस्थ्यपरिनिष्ठितमतिः पुमान्, **शास्त्रैः**- स्याद्वादागमै**र्दर्शितया दिशा** नयविशेषोन्नीतापेक्षाभेदनिमित्ताविरोधसमर्थितानन्तधर्मात्मकवस्तुपर्यालोचननयनावलोकितैकान्तवाद्युपन्यस्तदोषकण्टकापनयनप्रत्यलयुक्तिव्रातप्रकारेण[१], **पथि**- मोक्षमार्गे, **गच्छन्**- मोक्षमार्गविषयकज्ञानलक्षणगतिक्रियामनुभवन्, **तद्विशेषोपलब्धये**- अविलम्बितमोक्षधामप्राप्त्यनुकूलमोक्षमार्गवैलक्षण्यासादनार्थं, **ज्ञानयोगं** वक्ष्यमाणस्वरूपं, **प्रयुञ्जीत**- स्वात्मतादात्म्यास्पदं विदधीत, तदेकव्यापारव्यापृतमात्मानं कुर्यात् । ज्ञानयोगो यथाऽविलम्बनेन सम्पद्येत तथा तत्प्रत्यलव्यापारपरायणो भवेदिति यावत् ॥२.१॥

कारणा-ऽभिधाना-ऽवस्थाना-ऽन्यव्यावृत्तिभिर्ज्ञानयोगस्वरूपमुपदर्शयति –

**योगजादृष्टजनितः, स तु प्रातिभसञ्ज्ञितः ।**
**सन्ध्येव दिन-रात्रिभ्यां, केवल-श्रुतयोः पृथक् ॥२.२॥**

**योगजादृष्टजनित** इति । योगाभ्यासजन्यधर्मविशेषप्रभव इत्यर्थः । अनेन ज्ञानयोगस्य कारणमुपदर्शितम् । **स तु** - ज्ञानयोगः पुनः । **प्रातिभसञ्ज्ञितः**- प्रातिभपदजन्यबोधविषयत्वप्रकारकसङ्केतविशेषः प्रातिभनामक इति यावत् । अस्यैव च सर्वविषयकज्ञानत्वेनाऽलौकिकप्रत्यक्षविशेषत्वेनोररीकारो नैयायिकस्य । लोके 'पृष्ठत उपसर्पन्तं सर्पं बुद्ध्यैव पश्यति, कुमारी अकस्मादेवैवं वक्ति – "श्वो मे भ्राताऽऽगमिष्यती"-त्यादिज्ञानानां प्रातिभसञ्ज्ञया प्रसिद्धिः । सा तूपचारादेव । उपचारश्च क्वचिन्मुख्यस्यैव सतो भवतीति मुख्यया वृत्त्या ज्ञानयोग एव प्रातिभनामक इत्याशयः ।

ज्ञानयोगश्च सर्वथा सर्ववस्तुप्रकाशाभावाद् न केवलज्ञानरूपः । आवरणे सत्यप्यतिशयितार्थावगाहनलक्षणप्रमाविशेषबन्धुरत्वाद् नवा तादृशप्रमानालिङ्गितश्रुतज्ञानरूपः । किन्तु केवलसूर्योदयाव्यवहितारुणोदयकल्पः किञ्चिन्मलीमसश्रुतज्ञानत्रियामान्तिमप्रहरावसानकालिकप्रकाशसमो रात्र्यन्तदिनाव्यवहितपूर्वकालो

---

१. नयविशेषोन्नीता येऽपेक्षाभेदा तन्निमित्तो योऽविरोधस्तत्समर्थितं यदनन्तधर्मात्मकवस्तु तत्पर्यालोचनरूपं यन्नयनं तदवलोकितानि यान्येकान्तवाद्युपन्यस्तदोषकण्टकानि तदपनयने प्रत्यलो यो युक्तिव्रातस्तत्प्रकारेण ।

यथा न रात्रिर्न वा दिनं, किन्तु तयोः सन्धित्वात् सन्ध्याकालोऽन्य एव; तथा केवलज्ञानाव्यवहितपूर्वसमयभाविनः श्रुतज्ञानप्रकर्षान्तिमसमयसम्पद्यमानरूपस्याऽस्य तदुभयभिन्नत्वं श्रद्धेयमित्याशयेनाऽऽह - **सन्ध्येवे**ति ॥२.२॥

श्रुतज्ञानस्वरूपाच्छास्त्रज्ञानाज्ज्ञानयोगस्याऽवस्थितिवैलक्षण्येन वैलक्षण्यं प्रकटयति –

**पदमात्रं हि नाऽन्वेति, शास्त्रं दिग्दर्शनोत्तरम् ।**
**ज्ञानयोगो मुनेः पार्श्व-माकैवल्यं न मुञ्चति ॥२.३॥**

**शास्त्रं दिग्दर्शनोत्तरं**- दिग्दर्शनोत्तरकालं, **पदमात्रम्**- एकं पदमपि, मुक्तिधामप्रस्थितं मुनिं, **नाऽन्वेति**- नाऽनुगच्छति । अयं **ज्ञानयोग आकैवल्यं**- केवलज्ञानोत्पत्तिसमयं यावत् । मर्यादार्थकोऽयमाङ्शब्दः, तेन केवलज्ञानोत्पत्तिक्षणाव्यवहितपूर्वक्षणपर्यन्तमित्यर्थः । **मुनेः**- मुक्तिमार्गमननशीलस्य मुमुक्षोः, **पार्श्वं**- सन्निधानं, **न मुञ्चति**- न त्यजतीत्यर्थः ॥२.३॥

ब्रह्मविषयकपरोक्षज्ञानस्वरूपाच्छास्त्राद् ब्रह्मविषयकसाक्षात्कारिज्ञानस्वरूपविश्रान्तस्य ज्ञानयोगस्य स्वरूपतः फलविशेषजनकत्वतश्च वैलक्षण्यमित्युपदर्शयितुं शास्त्रज्ञानस्वरूपमुपदर्शयति –

**तत्त्वतो ब्रह्मणः शास्त्रं, लक्षकं न तु दर्शकम् ।**
**न चाऽदृष्टात्मतत्त्वस्य, दृष्टभ्रान्तिर्निवर्तते ॥२.४॥**

**तत्त्वत** इति । यथावस्थितस्वरूपत इत्यर्थः । **ब्रह्मणः**- आत्मनः, **शास्त्रं**- श्रुतज्ञानं, **लक्षकं**- परोक्षतयोपदर्शकं, न तु दर्शकम् । नैव तत्साक्षात्कारिज्ञानस्वरूपम् ।

तेन च शरीरात्मत्वादिभ्रान्तेरनिवृत्त्याऽऽत्मनः स्वस्वरूपावाप्तिलक्षणमोक्षासम्भव इत्याह – **न चे**ति । अस्य **निवर्तते** इत्यनेनाऽन्वयः । **अदृष्टात्मतत्त्वस्य**- असाक्षात्कृतात्मतत्त्वस्य, शरीरादिभेदेनाऽऽत्मतत्त्वमसाक्षात्कुर्वत इति यावत् । **दृष्टभ्रान्तिः**- शरीरादिष्वनात्मसु आत्मतत्त्वस्य भ्रमात्मकः साक्षात्कारः, **न च निवर्तते**- नैव विनश्यति । साक्षात्कारात्मकातत्त्वभ्रमनाशं प्रति साक्षात्कारात्मकतत्त्वप्रमाया एव कारणत्वस्य दिङ्मोहादेरपरोक्षदिगवगतित एव निवृत्त्यवलोकनेनाऽवधारणादित्याशयः ॥२.४॥

यतः शास्त्रयोगान्नाऽऽत्मतत्त्वसाक्षात्कारोऽतस्तदर्थं ज्ञानयोग उपासनीय इत्याह –

**तेनाऽऽत्मदर्शनाकाङ्क्षी, ज्ञानेनाऽन्तर्मुखो भवेत् ।**
**द्रष्टुर्दृगात्मता मुक्ति-र्दृश्यैकात्म्यं भवभ्रमः ॥२.५॥**

**तेने**ति । शास्त्रस्याऽऽत्मतत्त्वलक्षकत्वमेव, न तु दर्शकत्वमित्यनेनेत्यर्थः । **आत्मदर्शनाकाङ्क्षी**- तत्त्वत आत्मस्वरूपं साक्षात्कर्तुमिच्छुः । **ज्ञानेन**- सम्यग्विचारपुरस्कृतात्मज्ञानेन । **अन्तर्मुख** इति 'शरीरादयो बाह्यपुद्गलविलासाः क्षणभङ्गुराः स्वभावतो दुःखबहुलाः, नैतैरात्मीयतयोपगृहीतैरनाबाधात्यन्तिकनिर्वाणसुखावाप्तिरतो नैतेष्वासक्तिर्विधेया, स्वरूपविश्रान्तिलक्षणसुखस्वरूपः सर्वदावस्थानलक्षणध्रौव्याकलितपर्यायाश्रितोत्पादव्ययात्मकसत्त्वालिङ्गितविग्रहः स्वप्रकाशज्ञानैकस्वभाव आत्मैवोपादेय' इत्येवमन्तर्मुखो भवेत् । सततमात्मस्वरूपभावनाचान्तस्वान्तः स्यादिति यावत् ।

ज्ञानेनाऽन्तर्मुखभवने सति स्वात्मानं ज्ञानस्वरूपतया सततं भावयतो ज्ञानतादात्म्यापन्न एवाऽऽत्माऽविर्भूतो भवतीति ज्ञानस्वरूपतालक्षणमुक्तिः परमपुरुषार्थोऽयत्नोपनत एव भवतीत्याशयेनाऽऽह – **द्रष्टु**रिति । **द्रष्टुः**- आत्मनो **दृगात्मता**- आविर्भूतज्ञानस्वरूपता । तेनोपयोगलक्षणस्य जीवस्य ज्ञानस्वरूपतायाः सर्वदा भावेऽपि न सर्वदा मोक्षप्रसङ्गः । **दृश्यैकात्म्यं**- दृगभिन्नग्राह्यस्वरूपशरीराद्यभिन्नत्वमात्मनः, **भवभ्रमः**- संसारविलासः, बन्ध इति यावत् ।

अथवा "ज्ञानेनाऽन्तर्मुखो भवे"दिति यदुक्तं, तत्र 'ज्ञानेनाऽन्तर्मुखत्वं कि'मित्याकाङ्क्षायां तत्स्वरूपमेवोपदर्शितं **द्रष्टु**रित्यादिना । एवं परिभावनमेव ज्ञानेनाऽन्तर्मुखत्वमिति ॥२.५॥

तस्याऽतिशयं प्रकटयति –

**आत्मज्ञाने मुनिर्मग्नः, सर्वं पुद्गलविभ्रमम् ।**
**महेन्द्रजालवद् वेत्ति, नैव तत्राऽनुरज्यते ॥२.६॥**

**मग्नः**- तत्स्वरूपपरिभावनलीनचित्तः, **सर्वं**- पुत्रदारधनशरीराद्यखिलं बाह्यं, **पुद्गलविभ्रमं**- पुद्गलविवर्तमात्रं पूरणगलनस्वभावत्वात् ।

ज्ञानमग्नस्याऽपि मुनेः शरीरादिपुद्गलविलासाः सन्त्येव, न तु तज्जनितचित्तविकारास्तत्र प्रादुर्भवन्ति, तेषामसत्यत्वेनाऽवधारणादित्यावेदनायाऽनुगुणं दृष्टान्तमाह – **महेन्द्रजालव**दिति । महेन्द्रजालदर्शितार्थस्य द्रष्टुः कल्पितत्वज्ञाने जाग्रति सति तस्योपचयापचयतो न रागद्वेषौ, किन्तु माध्यस्थ्यमेव; तथाऽऽत्मज्ञानमग्नस्य मुनेः शरीरादेः पुद्गलविभ्रमत्वदृष्ट्या पश्यतस्तद्वृद्धिक्षयाभ्यां न रागद्वेषौ, किन्त्वौदासीन्यमेवेत्याह – **नैवे**ति । **तत्र**- पुद्गलविभ्रमे ॥२.६॥

नन्वात्मज्ञाने किमपि सुखं नाऽस्ति, बिषये तु कामिन्यादौ सम्भोगादिजनितं सातिशयितं बहुविधं सुखं प्रत्यक्षत एवोपलभ्यते, आत्मज्ञानवत उत्तरकाले मुक्तिसुखसम्भवेऽपि नेदानीं तत् प्रत्यक्षत उपलभ्यते इति स्वयंप्राप्तविषयसुखपरित्यागे स्वार्थभ्रंश एव स्यादतस्तदर्थं तत्राऽनुरागो विधेय एव ज्ञानिनेत्यतो, ज्ञानसुखं तात्कालिकमेव स्वानुभवसंवेद्यं काल्पनिकवैषयिकसुखादपरिमेयगुणं समस्ति, ज्ञानयोगिनस्तत्र मग्नस्य विषयोपभोगजनितं सुखं विषमिवाऽवभासते इति न तत्राऽनुराग इत्याह –

**आस्वादिता सुमधुरा, येन ज्ञानरतिः सुधा ।**
**न लगत्येव तच्चेतो, विषयेषु विषेष्विव ॥२.७॥**

**येन**- आत्मज्ञानवता । **तच्चेतः**- आत्मज्ञानिचित्तम् ॥२.७॥

ननु स्वात्मनि तत्तद्विषयोपार्जनादिकमन्तरेण तत्तद्विषयोपभोगादिजनितसुखसंवेदनमेव न भवति । तत्परिज्ञानाभावे च तत उत्कर्षज्ञानाभावाद् 'ज्ञानरतिः सुमधुरा, न तु विषयरतिस्तथे'त्याकलनमपि कथम्? तदभावे विषयसुखं परित्यज्य ज्ञानसुखानुरागो माध्यस्थ्यविघातक एव गुणदोषपरीक्षाविमुखस्य सम्पद्यते । ततो विषयसुखानुभवः पूर्वमवश्यमेव विधेयो ज्ञानसुखं प्रकृष्टतयाऽभिकाङ्क्षता । विषयाणां बहुविधत्वाद् विचित्रस्वभावत्वेन नैकविषयजनितसुखापकृष्टत्वधिया प्रत्येकं सर्वविषयजसुखापकृष्टत्व-

बुद्धिरचिरमेव सम्पद्यते इति तत्तदवस्थोचितसुखानुभवतश्चिरेण विषयोपभोगजसुखानुभवानन्तरं ज्ञानसुखसम्पत्तिस्तुरीयावस्थायां, न तु प्रथमत एवेत्याशङ्काशङ्कून्मूलनायाऽऽह –

**सत्तत्त्वचिन्तया यस्या-ऽभिसमन्वागता इमे ।**
**आत्मवान् ज्ञानवान् वेद-धर्मवान् ब्रह्मवाँश्च सः ॥२.८॥**

विषयाणामानन्त्यात् प्रत्येकं सर्वविषयोपभोगोऽसम्भवग्रस्त एवेत्याशङ्कोपदर्शिता प्रक्रिया न सम्भवत्येव। किन्तु **सत्तत्त्वचिन्तये**ति। सतो यत् तत्त्वमुत्पादव्ययध्रौव्यलक्षणं, तस्य या चिन्ता- नयभेदव्यपेक्षा विचारणा, 'एतदपेक्षयोत्पाद, एतदपेक्षया व्यय, एतदपेक्षया ध्रौव्यमेतदपेक्षया सत्त्वमेतदपेक्षयाऽसत्त्वमेवमेतदपेक्षया नित्यत्वमेतदपेक्षयाऽनित्यत्वमेतदपेक्षयैकत्वमेतदपेक्षयाऽनेकत्व'मित्यादिका सर्वाऽपि विचारणा सत्तत्त्वचिन्तापदेन ज्ञेया, तयेत्यर्थः ।

**यस्य**- ज्ञानिन, **इमे**- परिदृश्यमानाः सर्वेऽपि विषया, **अभिसमन्वागता**- अभितः- सर्वप्रकारेण, समिति समीचीनतया, अनु- स्वपृष्ठलग्नतयाऽवश्यम्भावेन, आगता- ज्ञानविषयभावमानीताः । तथाच क्षयोपशमविशेषेण यथावस्थितसर्वविषयविषयकज्ञानवानित्यर्थः । एवं च यत् सुखं यादृशं तत्सुखस्य तादृशतया ज्ञानं तस्याऽपि सम्पन्नमिति तदपेक्षयोत्कृष्टत्वबुद्धिर्ज्ञानात्मनि सुखे भावनाप्रकर्षेणाऽस्थविरस्याऽपि सम्भवत्येवेत्याशयः ।

एवम्भूतं पुरुषमन्यतः प्रकृष्टतया भावयति – **आत्मवानि**ति । आविर्भूतात्मतादात्म्यवानित्यर्थः । तेन स्वस्य स्वापेक्षयाऽऽधाराधेयभावेऽपि न क्षतिः । एतेन यस्य न ज्ञानरतिस्तस्याऽऽत्मवत्त्वे सत्यपि अनात्मन्येव पुत्रकलत्रधनदेहादावात्मत्वाध्यवसायान्न यथार्थमात्मत्वग्रहोऽनात्मवानेव स इत्युपदर्शितम् । अथवाऽऽत्मपदेन पुरुषकार एव मुक्तिविषयोऽभिमतः । उक्तज्ञानसम्पन्न एव मुक्तौ सफलपुरुषकारव्यापारः सम्पद्यते इत्याशयः । **ज्ञानवानि**ति । यद्यप्युपयोगलक्षणो जीव इति जीवस्वाभाव्यात् पुरुषभावे एव ज्ञानवत्त्वम् । तथापि ज्ञानपदेन विशिष्टं ज्ञानमत्राऽभिप्रेतम् । दृश्यते च ज्ञानित्वाविशेषेऽपि 'अयं ज्ञानी, अयं चाऽज्ञानी'ति विविक्तो व्यवहारो लोके । **वेदधर्मवानि**ति[१] । वेदपदमागमपरम् । आगमविहितधर्माचरणसम्पन्न इति । उक्तज्ञानविकलस्य तु श्रुतविहिताचरणेऽपि न तथाभाव इति ज्ञानी स्तूयते । **ब्रह्मवानि**ति । ब्रह्म- ब्रह्मचर्यं मैथुननिवृत्तिः । तेन च कदापि रेतःस्खलनाभावेनोर्द्ध्वरेतस्कत्वमुपलक्ष्यते । ऊर्ध्वरेता अवश्यमेव ज्ञानी भवति "ऊर्ध्वरेता भवेत् प्राज्ञ" इति लोकप्रसिद्धेः ॥२.८॥

ज्ञानयोगसम्पादनार्थं पूर्वं विषयाः परित्यक्तव्याः । सम्पन्ने च ज्ञानयोगे विषयेषु माध्यस्थ्यमेवाऽवलम्बेत तत्स्वरूपाभिज्ञः सन्नित्याह –

**विषयान् साधकः पूर्व-मनिष्टत्वधिया त्यजेत् ।**
**न त्यजेन्न च गृह्णीयात्, सिद्धो विन्द्यात् स तत्त्वतः ॥२.९॥**

---

१. वृत्त्यन्तरे 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति न्यायमाश्रित्य "वेदवान्- आगमवान्, धर्मवान्- अपवर्गाभ्युदयमार्गवा"नित्यर्थो दर्शितः । सोऽपि कथञ्चित्सङ्गत एव ।

**विषयानिति** । कञ्चनकामिनीचन्दनादीनित्यर्थः । **साधकः**- ज्ञानयोगनिष्पत्त्यनुकूलव्यापारवान् । **पूर्वं**- ज्ञानयोगानिष्पत्तिदशाया**मनिष्टत्वधिया**- स्वरूपविश्रान्तिलक्षणज्ञानसुखावाप्तिप्रतिबन्धकत्वप्रयोज्यानिष्टत्व-बुद्ध्या[१] । **त्यजेत्**- दूरत एव परिवर्जयेत् ।

**सिद्धः**- सम्पन्नज्ञानयोगः । तस्य कर्तव्यस्य योगस्य सम्पत्तेर्न विषयासक्तौ तत्प्रतिबन्धकत्वबुद्धिरित्य-निष्टत्वबुद्ध्यभावान्न विषयपरित्यागः । ज्ञानसुखनिमग्नस्य स्वभावत एव विषयसुखेच्छा नोत्पद्यते इति फलेच्छाभावे तज्जनितोपायेच्छाया अप्यभाव इति न तदुपादानलक्षणं विषयग्रहणमित्याह - **न त्यजेन्न च गृह्णीयादिति** ।

अत्यन्तमूढोऽपि कश्चिद् विषयस्वरूपानवबोधतो न विषयपरित्यागग्रहणवान्, तादृशश्चाऽयमपीत्युपेक्ष्य एव लोकानामत आह - **विन्द्यात् स तत्त्वत** इति । यस्य विषयस्य यादृग् रूपं तं तादृग्रूपेण जानन्नेव न गृह्णाति न परित्यजति चेति ज्ञानकृतावेवाऽस्य ग्रहणाभाव-परित्यागाभावावित्यादरणीयतम एव लोकानामिति भावः ॥२.९॥

साधक-सिद्धयोः सुखदुःखावस्थानवैलक्षण्यतो वैलक्षण्यं सुखावबोधमित्युपदर्शयति -

**योगारम्भदशास्थस्य, दुःखमन्तर्बहिःसुखम् ।**
**सुखमन्तर्बहिर्दुःखं, सिद्धयोगस्य तु ध्रुवम् ॥२.१०॥**

**अन्तर्दुःखमिति** । स्वरूपविश्रान्तिलक्षणज्ञानसुखानवाप्त्या तदवाप्त्यनुकूलप्रयासबाहुल्यमेवाऽन्तर्दुःख-मित्यर्थः । **बहिःसुखमिति** । अनिष्टत्वधिया विषयपरित्यागेन तदर्जनक्षणादिगोचरप्रयासाल्पीभावतस्तज्जनित-दुःखानुत्पादलक्षणं सुखमभावे भावोपचारतो बहिःसुखमित्यर्थः । यतोऽस्य ज्ञानसुखनिष्पत्तयेऽनवरतं ज्ञानेनाऽन्तर्मुखभवनलक्षणाभ्यासो वरीवर्ति । स चाऽसम्पादितकार्यनिष्पत्तिकत्वाद् दुःखमिवेति । सुखं तु स्वरूपविश्रान्तिलक्षणज्ञानसुखमनिष्पन्नत्वाद् बहिरेव यावन्न जातमित्यतोऽपि बहिःसुखमिति बोध्यम् ।

**सिद्धयोगस्य तु**- पुनः स्वरूपविश्रान्तिलक्षणज्ञानसुखस्याऽऽत्मनि एकतया सद्भावाद् **अन्तःसुख**-मिति । बाह्यस्य तु विषयपरिभोगजनितस्य सुखस्य परोपधिकत्वाद् दुःखमिवेति **बहिर्दुःख**मिति ॥२.१०॥

किं तत् सुखं यस्य बहिरन्तर्भावः साधकसिद्धव्यपेक्षयोच्यते ? किं च तद् दुःखं यस्याऽन्तर्बहिर्भावः साधकसिद्धव्यपेक्षयेत्यपेक्षायां सुखस्वरूपं तावदाह -

**प्रकाशशक्त्या यद्रूप-मात्मनो ज्ञानमुच्यते ।**
**सुखं स्वरूपविश्रान्ति-शक्त्या वाच्यं तदेव तु ॥२.११॥**

**आत्मनो यद् रूपं**- स्वरूपं **प्रकाशशक्त्या**- वस्तुप्रकाशनसामर्थ्येन **ज्ञानमुच्यते**- 'ज्ञान'पदाभिधेयं भवति, **तदेव** स्वरूपं **स्वरूपविश्रान्तिशक्त्या**- शुद्धात्मस्वभावमात्रावस्थानशक्त्या तु **सुखं**- 'सुख'पदेन

---

१. स्वरूपे या विश्रान्तिस्तल्लक्षणं यद् ज्ञानसुखं तदवाप्तेः यत् प्रतिबन्धकत्वं तत्प्रयोज्यं यदनिष्टत्वं विषयनिष्ठं तद्बुद्ध्या ।

**वाच्यं** भवति । एतावता स्वरूपविश्रान्त्यभावलक्षणमात्मनोऽस्वस्थत्वमेव दुःखमित्यावेदितं भवतीत्यतस्तस्य पृथगनुपन्यासेऽपि न न्यूनत्वमिति बोध्यम् ॥२.११॥

उक्तलक्षणमेव सुखदुःखस्वरूपं वचनान्तरेण स्पष्टयति –

**सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम् ।**
**एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥२.१२॥**

**समासेन**- सङ्क्षेपेण । उत्तानार्थमन्यत् ॥२.१२॥

ननु स्वरूपविश्रान्तेरभावादस्मदादीनामिदानीन्तनानामेतत् सुखं स्वानुभवतो न वेद्यते इति तद् वक्तव्यं किमाकारम् ? वचनपथातीतं चेत् कथमवधारणीयम् ? साक्षात् तदुपदेष्टुमशक्यं चेद् येन सदृशमेतत् तदेवोच्यता'मनेन सदृशमेत'दिति । न च स्वरूपत उपदर्शयितुं शक्यम् । नवा केनचिदुपमयोपलक्षयितुं शक्यम् । तथाऽप्यस्तीति श्रद्धामात्रगम्यमिदं स्यादित्यत आह –

**ज्ञानमग्नस्य यच्छर्म, तद् वक्तुं नैव पार्यते ।**
**नोपमेयं प्रियाश्लेषै-र्नाऽपि तच्चन्दनद्रवैः ॥२.१३॥**

स्वानुभववेद्यस्य तस्य यत्पुरुषविशेषनिष्ठत्वं सोऽपि ज्ञानमग्नः पुरुषधौरेयस्तद् वचनेन तन्मात्रप्रतिपादकेनोपदर्शयितुमशक्तः । किमुताऽन्येऽस्मदादयः ? निर्वक्तुमशक्यस्य तस्य निर्वचनाभावेऽपि न स्वरूपतोऽभावः । न हि दधिदुग्धमधुद्राक्षासितादीनां माधुर्यविशेषः परस्परविलक्षणतया वचनेन प्रतिपादयितुमशक्योऽपि न नाम न समस्ति । तादृगेवैतदपि । न चैतत्सदृशं वैषयिकं किमपि सुखं समस्ति, येनोपमीयेताऽपीदम् । न हि सर्वप्रकारेण सर्ववस्त्ववभासिनः केवलालोकस्य केनचित्प्रकाशकस्वभावेनोपमितत्वाभावेऽप्यभावस्तथैवेदमपीति भावः ।

**शर्म**- सुखम् । **तत्**- सुखम् । **प्रियाश्लेषैः**- प्रियाश्लेषजनितसुखविशेषैः । **तत्**- सुखम् । **चन्दनद्रवैः**- सम्पूर्णाङ्गोपाङ्गोपलिप्तचन्दनद्रवजनितसुखविशेषैः ॥२.१३॥

ज्ञानमग्नस्यैव भगवत्यादिप्रतिपादिततेजोलेश्याविवृद्धिरपि घटते इत्यतिशयमस्य प्रतिपादयति –

**तेजोलेश्याविवृद्धिर्या, पर्यायक्रमवृद्धितः ।**
**भाषिता भगवत्यादौ[१], सेत्थम्भूतस्य युज्यते ॥२.१४॥**

**सा**- तेजोलेश्याविवृद्धिः । **इत्थंभूतस्य**- ज्ञानमग्नस्य ॥२.१४॥

उपयोगलक्षणजीवभावान्यथाऽनुपपत्त्याऽस्मदादीनामपि सर्वदा किञ्चित् किञ्चिद्गोचरज्ञानमग्नता विद्यते, न तु शर्मविशेषस्तथोपलभ्यते । आत्मज्ञानमपि 'अहं सुखी, अहं दुःखी, अहं जानामि, उपलभेऽहं, द्वेष्मि अहम्, इच्छामि अहम्' इत्यादिकं वर्तते, न च मात्रयाऽपि शर्मविशेषावाप्तिरित्यतो यादृशज्ञानमग्नस्य शर्मविशेषस्तादृशं ज्ञानस्वरूपमुपदर्शयति –

---

१. व्याख्याप्रज्ञप्तिनामकं पञ्चमाङ्गमेव 'भगवती'तिपूज्यतासूचकशब्देनोच्यते । तत्रत्यं १४.९:५३७ सूत्रम् ।

**चिन्मात्रलक्षणेनाऽन्य-व्यतिरिक्तत्वमात्मनः ।**
**प्रतीयते, यदश्रान्तं, तदेव ज्ञानमुत्तमम् ॥२.१५॥**

**अन्यव्यतिरिक्तत्वं**- देहादिबाह्यभिन्नत्वम् । अस्मदादीनामपि कदाचिच्चिन्मात्रस्वरूपतया प्रतीतिरस्त्यात्मनोऽन्यव्यवच्छेदेनेत्यत आह - **अश्रान्त**मिति । विरामविकलमुत्तरोत्तरानुवृत्तिमदित्यर्थः । तेनोत्तरकाले विरोधिज्ञानान्तराबाधितत्वादभ्रान्तमेव तदिति लभ्यते । **तदेवे**त्येवकारेणाऽतादृग्भूतस्य ज्ञानस्योत्तमत्वव्यवच्छेदः ॥२.१५॥

अस्यैव ज्ञानस्य शुभोपयोगरूपत्वे सविकल्पकसमाधित्वं, शुद्धोपयोगरूपत्वे निर्विकल्पकसमाधित्वमतो 'ज्ञानस्वरूपः सन् योग' इति निर्वचनलभ्यज्ञानयोगस्वरूपताऽस्य न न घटते इति न रूढिमात्रेणैवाऽत्र ज्ञानयोगशब्दप्रवृत्तिरित्याह –

**शुभोपयोगरूपोऽयं, समाधिः सविकल्पकः ।**
**शुद्धोपयोगरूपस्तु, निर्विकल्पस्तदेकदृक् ॥२.१६॥**

शुभोपयोगरूपेऽस्मिन् ध्यातृध्येयध्यानाना'महं ध्याताऽयं ध्येय इदं च ध्यान'मित्येवं पृथगवभासस्तदाकारस्य समस्तीति सविकल्पकत्वम् । तत्र च न स्वरूपविश्रान्तिर्भेदावभासादिति न तल्लक्षणं सुखमेतदवस्थायाम् । किन्तु शुद्धोपयोगरूप एव ध्यातृध्येयध्यानानां पृथगनवभासान्निर्विकल्पकसमाधौ । तदानीं तदेकदृग् चिन्मात्रस्वरूपात्ममात्रावलम्बनावबोधो विगलितवेद्यान्तरान्तरायत्वात् स्वरूपविश्रान्तिलक्षणसुखस्वरूप इत्यभिसन्धिः ॥२.१६॥

सविकल्पक-निर्विकल्पकसमाध्योर्वैलक्षण्यमुपदर्शयति –

**आद्यः सालम्बनो नाम, योगोऽनालम्बनः परः ।**
**छायाया दर्पणाभावे, मुखविश्रान्तिसन्निभः ॥२.१७॥**

**आद्य** इति । सविकल्पकसमाधिरित्यर्थः । **सालम्बन** इति । ध्येयस्वरूपव्यतिरिक्ततया ध्यातृध्यानविषयकत्वमत्र सालम्बनत्वम् । तेन ज्ञानमात्रस्य सविषयकत्वेन निर्विकल्पकसमाधावपि ज्ञानस्य ध्येयस्वरूपालम्बनत्वेऽपि न क्षतिः ।

न च निर्विकल्पकसमाधौ वृत्तिमात्रनिरोधे न स्वरूपावभासलक्षणा वृत्तिः समस्तीति शङ्क्यम्; यतस्तमधिकृत्य परैरपीत्थं गीयते –

"ध्यातृ-ध्याने परित्यज्य, क्रमाद् ध्येयैकगोचरम् ।
निवातदीपवच्चित्तं, समाधिरभिधीयते ॥१॥

वृत्तयस्तु तदानीम-ज्ञात्वा अप्यात्मगोचराः ।
स्मरणादनुमीयन्ते, व्युत्थितस्य समुत्थितात् ॥२॥

वृत्तीनामनुवृत्तिस्तु, प्रयत्नात् प्रथमादपि ।
अदृष्टासकृदभ्यास-संस्कारसचिवाद् भवेत् ॥३॥" [ ]

**परः**- निर्विकल्पकयोगः, **अनालम्बनः**- ध्येयस्वरूपव्यतिरिक्तध्यातृध्यानाविषयकः । अस्य च स्वरूपविश्रान्तिस्वरूपतामुपमया भावयति - **छायाया** इति । मुखाकारावभासरूपाया मुखकान्तेरित्यर्थः । **दर्पणाभाव** इति । मुखप्रतिबिम्बग्राहिस्वभाव-दर्पणादिस्वच्छद्रव्यरूपोपाध्यभावे सतीत्यर्थः । **मुखविश्रान्ती**ति । बिम्बभूतमुखमात्रस्वरूपतेत्यर्थः । **तत्सन्निभः**- तत्तुल्यः ॥२.१७॥

निर्विकल्पकसमाधिस्वरूपशुद्धोपयोगलक्षणज्ञानावभातमेवाऽऽत्मस्वरूपं नाऽन्यादृशमित्येतत् प्रपञ्चयति —

**यद् दृश्यं यच्च निर्वाच्यं, मननीयं च यद् भुवि ।**
**तद् रूपं परसंश्लिष्टं, न शुद्धद्रव्यलक्षणम् ॥२.१८॥**

**यद् दृश्य**मिति । चक्षुरादीन्द्रियगोचरं यच्छरीरादीत्यर्थः । **निर्वाच्यं**- शब्देन वक्तुं शक्यं, शब्दजन्यबोधगोचरं यदिति यावत् । **मननीयं**- मनोजन्यज्ञानविषयम् । **भुवी**ति लोकमात्रोपलक्षकम् ।

**तद्रूपं परसंश्लिष्ट**मिति चक्षुरादिजन्यज्ञानस्य रूपादिप्रतिनियतगुणविशिष्टतयैव द्रव्यग्राहकत्वात्, शब्दजनितज्ञानस्य विशेषणविशेष्यभावालम्बनतयैवेतरपदार्थान्वितद्रव्यग्राहकत्वात्, मनोजन्यज्ञानस्याऽपि तत्तद्गुणाद्युपादानेनैव द्रव्यमननात्मकत्वात्, परसम्बद्धमेव द्रव्यं दृश्यं निर्वाच्यं मननीयं च भवति । ततो न तस्य शुद्धद्रव्यस्वरूपलक्षणत्वम् । ततो विशेषणोपग्रहेण यदात्मविषयकं ज्ञानं, तद्वतो न ज्ञानमग्नत्वमनालम्बनयोगानाक्रान्तेरित्याशयः ॥२.१८॥

यदि परसंश्लिष्टं रूपं न शुद्धात्मद्रव्यलक्षणं, तर्हि वक्तव्यं तल्लक्षणमित्यत आह —

**अपदस्य पदं नाऽस्ती-त्युपक्रम्याऽऽगमे[१] ततः ।**
**उपाधिमात्रव्यावृत्त्या, प्रोक्तं शुद्धात्मलक्षणम् ॥२.१९॥**

**अपदस्य**- शब्दागोचरस्य, **पदं**- प्रतिपादकशब्दः । अथवा पद्यते- ज्ञायतेऽनेनेति व्युत्पत्त्या पदं- विशिष्टज्ञानजनकं प्रमाणं, ज्ञायते इत्यस्य विशिष्टज्ञानविषयीक्रियते इत्यर्थकत्वात् । न विद्यते विशिष्टज्ञानजनकं प्रमाणं यस्य शुद्धात्मद्रव्यस्य तदपदम् । तस्या**ऽपदस्य** विशिष्टज्ञानजनकप्रमाणाविषयस्येति यावत् । **पदं**- विशिष्टज्ञानम् । **नाऽस्ति**- न सम्भवति । शुद्धद्रव्यस्य सविकल्पकज्ञानविषयत्वासम्भवात् । **इत्युपक्रम्य**- एवं प्रतिज्ञाय, **आगमे**- जैनप्रवचने, **ततः**- उक्तप्रतिज्ञानन्तरम् ।

**उपाधिमात्रव्यावृत्त्या**- परौपाधिकधर्ममात्रविधूननेन । **शुद्धात्मलक्षणं**- शुद्धात्मस्वरूपं यच्चैतन्यमात्रं तदात्मकं लक्षणं, **प्रोक्तं**- प्रकृष्टतयोपदर्शितम् ॥२.१९॥

परौपाधिकधर्ममात्रव्यावृत्त्या यदात्मस्वरूपं चैतन्यमात्रं तदेवाऽऽत्मद्रव्यस्य स्वरूपलक्षणमिति जैनप्रवचनप्रमितमर्थं परागमोऽपि संवदतीत्याह —

१. आचाराङ्गसूत्रम् - १.५.६.१७२-१७३.

**"यतो वाचो निवर्तन्ते, ह्यप्राप्य मनसा सह" ।**
**इतिश्रुतिरपि व्यक्त-मेतदर्थानुसारिणी[१] ॥२.२०॥**

**यं**- परब्रह्मात्मस्वरूपम्, **अप्राप्य**- विषयतया स्वसम्बद्धमकृत्वा **मनसा सह वाचो** निवर्तन्ते । यद् वाङ्मनोगोचरातीतमिति यावत् । **इतिशब्दः** शब्दस्वरूपपरः । तेन **इतिश्रुतिः**- एवंस्वरूपा **श्रुतिः**- वेदः, **व्यक्तं**- स्पष्टं यथा स्यात् तथा, **एतदर्थानुसारिणी**- परसंश्लिष्टरूपरहित-शुद्धात्मद्रव्यस्वरूपानुवादिनी ॥२.२०॥

अनालम्बनयोगदशापन्नज्ञानसहकारमन्तरेण केवलशास्त्रजज्ञानविषयत्वं न शुद्धात्मद्रव्यस्येति वचनगोचरातीतत्वं तस्य युक्तमेवेत्याह –

**अतीन्द्रियं परं ब्रह्म, विशुद्धानुभवं विना ।**
**शास्त्रयुक्तिशतेनाऽपि, नैव गम्यं कदाचन ॥२.२१॥**

**अतीन्द्रिय**मिति । अनेन च दृश्यत्वं तस्य न केनाऽप्यनुमतमित्यावेदितम् । **पर**मिति । देहादिव्यतिरिक्ततया व्यवस्थितमित्यर्थः । तेन क्षीरोदकन्यायेन देहादिसम्भिन्नतया व्यवस्थितस्याऽऽत्मनस्तदात्मतया प्रत्यक्षत्वेऽपि न क्षतिः । **ब्रह्म**- केवलालोकस्वरूपेण विषयतया सर्वार्थव्यापकं चैतन्यम् ।

**विशुद्धानुभवं विना**- तन्मात्रावगाहिशुद्धोपयोगरूप-निर्विकल्पकसमाधिदशापन्नानुभवमन्तरेण, **शास्त्रयुक्तिशतेनाऽपि**- शास्त्रोपदर्शितानल्पयुक्तिकदम्बकेनाऽपि, **कदाचन**- क्वचिदपि काले, **नैव गम्य**मवगमविषयो न भवत्येव ॥२.२१॥

"विशुद्धानुभवं विना शास्त्रगम्यं न ब्रह्मे"त्युक्तया विशुद्धानुभवसहकारेण ब्रह्मणः शास्त्रगम्यतोररीकृता । तामधिकृत्याऽऽह –

**केषां न कल्पनादर्वी, शास्त्रक्षीरान्नगाहिनी ।**
**विरलास्तद्रसास्वाद-विदोऽनुभवजिह्वया ॥२.२२॥**

यथा क्षीरान्ने माधुर्यविशेषः समस्ति । तमितस्ततस्तत्र व्याप्रियमाणाऽपि दर्वी न जानाति, किन्तु जिह्वेन्द्रियमेव तदनुभवसमर्थम् । तथा शास्त्रे स्थितमपि सर्ववस्तुसारभूतं परं ब्रह्म रस्यमानतयाऽमृतकल्पमुक्तिसुखात्मकं नैव तदनुभवविकलाः पण्डितम्मन्या अपि स्वस्वकल्पनात्मकयुक्तिशतेन शास्त्रार्थं परिभावयन्तोऽपि जानन्ति, किन्तु तदनुभववन्त एव द्वित्रा विद्वांसस्तद्ब्रह्मस्वरूपाभिन्नरसास्वादविदः । एतेन शास्त्रयोगस्याऽपि नाऽऽनर्थक्यमित्यावेदितं भवतीति ॥२.२२॥

निर्द्वन्द्वस्वरूपस्य ब्रह्मणः निर्द्वन्द्वानुभवसमुत्थानेनैव परम्परया लिप्यादिगोचरत्वं न तु साक्षात्, तेषां तदविषयकत्वादित्याह –

---

१. क्वचिद् "०मेतदर्थानुभाषिणी"ति पाठः । अर्थस्तु समान एव ।

**पश्यतु ब्रह्म निर्द्वन्द्वं, निर्द्वन्द्वानुभवं विना ।**
**कथं लिपिमयी[१] दृष्टि-र्वाङ्मयी वा मनोमयी ॥२.२३॥**

**निर्द्वन्द्वं ब्रह्म निर्द्वन्द्वानुभवं** निर्विकल्पकशुद्धोपयोगं **विना लिपिमयी वाङ्मयी मनोमयी वा दृष्टिः कथं पश्यतु**- कथं विषयीकरोतु ? दृष्टौ लिप्यादिमयत्वं च लिप्यादिमात्रप्रभवत्वकृतं ज्ञेयम् ॥२.२३॥

शुद्धोपयोगरूपस्य निर्विकल्पकानुभवस्याऽनालम्बनयोगस्य जाग्रत्स्वप्नसुषुप्त्यात्मकावस्थात्रयभिन्नत्वेन तुरीयावस्थात्वं निष्टङ्कयति –

**न सुषुप्तिरमोहत्वा-न्नाऽपि च स्वाप-जागरौ ।**
**कल्पनाशिल्पविश्रान्ते-स्तुर्यैवाऽनुभवो दशा ॥२.२४॥**

[२]सविकल्पकज्ञानविकलत्वेन सौसादृश्यात् सुषुप्तित्वभ्रम एव तत्र प्रथमतः समुल्लसतीत्यतः सुषुप्तित्व-प्रतिषेध एव पूर्वमादृतः । **अमोहत्वात्**- मोहनीयविशेषोदयप्रसूतत्वान्मोहस्वरूपा सुषुप्तिरयं च तद्विलक्षणत्वान्न सुषुप्तिरित्यर्थः ।

**नाऽपि स्वापजागराविति** ज्ञानावस्थात्वेनोभयस्वरूपतया युगपदेव तत्र प्राप्तौ सर्वप्रधानेन द्वन्द्वेन[३] तदुभयमुपन्यस्य तत्प्रतिक्षेपो विहितः । तत्रापि परिस्फुटस्थिरबाह्यावभासविकलत्वेन स्वप्नत्वभ्रमस्यैव प्रथमतः प्राप्तेस्तत्सन्निवेश एव प्रथमतः कृतः । तेन [४]बह्वच्त्वेऽपि स्थिरावभासकतया पूज्यस्य जागरस्य प्रथमोपन्यासप्राप्तावपि न क्षतिः ।

स्वापजागरोभयनिषेधे हेतुः **कल्पनाशिल्पविश्रान्तेरि**ति । स्वप्ने जागरे च सविकल्पकपरम्परा समुन्मिषति, अत्र मात्रयाऽपि न तदुन्मेष इति कल्पनाशून्यत्वात् निर्विकल्पकशुद्धोपयोगात्माऽनालम्ब-नयोगस्वरूपोऽनुभवः स्वप्नजागराभ्यामपि भिन्न इति तुरीय एवेति ॥२.२४॥

तादृशानुभवः शास्त्रज्ञानपूर्वक एव ब्रह्माधिगतिहेतुरिति शास्त्रयोगोऽप्यत्रोपयुज्यते इत्याह –

**अधिगत्याऽखिलं शब्द-ब्रह्म शास्त्रदृशा मुनिः ।**
**स्वसंवेद्यं परं ब्रह्मा-ऽनुभवैरधिगच्छति ॥२.२५॥**

**शब्दब्रह्मे**ति । शब्देनोल्लिख्यमानस्वरूपत्वाच्छब्दतया व्यवसितं जीवाजीवादितत्त्वं स्वात्मना जगत एव क्रोडीकृतत्वाद् ब्रह्म । **तदखिलमेव**- समस्तमेव **शास्त्रदृशा**- शास्त्रजन्यबोधात्मकदृष्ट्या, "अन्तरा

---

१. लिपिमयी- सञ्ज्ञाक्षरमयी, वाङ्मयी- वचनोच्चारणमयी, मनोमयी- विचारमयी । २. निर्विकल्पकज्ञानस्य सुषुप्तेरिव सविकल्पकज्ञानविकलत्वात् तत् सुषुप्तिरिति भ्रमः कस्यचित् सम्भवति । ३. समासवृत्तौ केवलं द्वन्द्वसमासे एव तदन्तर्गतसर्वपदानां प्राधान्यं सम्भवति । ४. अस्य कथनस्य तात्पर्यस्याऽवगमनार्थं सिद्ध. शब्दा. ३.१.१६० सूत्रं तद्वृत्तिश्च द्रष्टव्ये ।

केवलज्ञानं, छद्मस्थाः खल्वचक्षुषः । हस्तस्पर्शसमं शास्त्र-ज्ञानं तद्व्यवहारकृत् ॥" [१.१०] इत्यनेन छद्मस्थानां शास्त्रदृष्टित्वस्यैवाऽभ्युपगमात् । **अधिगत्य**- ज्ञात्वा ।

**स्वसंवेद्यं परं**- स्वसंवेदनमात्रानुभवैकगम्यं **ब्रह्म**- आत्मस्वरूपम् । **अनुभवैः**- धाराबद्धतया निरन्तरोपपन्नत्वेन बहुलीभूतैरनुभवैः शुद्धोपयोगरूपैर्मुनिः शास्त्रमननकुशलः पुरुषविशेषस्तुरीयावस्थाव्यवस्थितः, **अधिगच्छति**- जानाति । अधिगमनोपायस्य बहुत्वेन निर्देशादधिगमस्य दृढभूमित्वमावेदितमतः स्वरूपविश्रान्तिस्तत्र भवति न तु कल्पनाधायित्वमिति ॥२.२५॥

ब्रह्मोपेन्द्रमहेन्द्रमहेशाद्युपासकानामिव तत्तदात्मपर्यायप्रधानभावोपासकानां जैनागमाश्रयणदत्तचित्तानामप्यात्मस्वभावपरमार्थावबोधविकलानां वस्तुतः परसमयस्थिततत्वमेव । आत्मस्वभावपरिकर्मितमतीनामेव स्वसमयस्थितत्वमित्याह —

**ये पर्यायेषु निरता-स्ते ह्यन्यसमयस्थिताः ।**
**आत्मस्वभावनिष्ठानां, ध्रुवा स्वसमयस्थितिः ॥२.२६॥**

**पर्यायेषु**- आत्मनः पर्यायेषु देवेन्द्रत्वादिभावेषु । **य** इति ये केचन जैना अजैना वा भवन्तु । **निरताः**- तत्पर्यायानुस्मरणधारणाध्यानार्चनादिसंलीन-करणोपकरणस्वान्तव्यापाराः । **ते**- पुरुषा, **हि**- यतः, स्वसमयस्थिततत्वेन व्यवह्रियमाणा अपि वस्तुतो**ऽन्यसमयस्थिताः** ।

तर्हि केषां स्वसमयस्थितिरित्यपेक्षायामाह - **आत्मस्वभावनिष्ठानामिति** । 'चैतन्यमेव केवलमात्मस्वभावोऽन्यस्तु कर्मोपाधिविनिर्मितो धर्मकलाप' इत्येवमात्मस्वभावं श्रद्दधतां तथा परिशीलयतां च पुरुषधौरेयाणामित्यर्थः । **ध्रुवा**- दृढतया व्यवस्थिता, परकीययुक्तिशतेनाऽपि चालयितुमशक्या, **स्वसमयस्थितिः**- स्वसिद्धान्तावस्थानम् ॥२.२६॥[१]

किं तदात्मस्वरूपं शुद्धोपयोगसंवेद्यमेव यदित्यपेक्षायामाह —

**आवापोद्वापविश्रान्ति-र्यत्राऽशुद्धनयस्य तत् ।**
**शुद्धानुभवसंवेद्यं, स्वरूपं परमात्मनः ॥२.२७॥**

**यत्र**- यस्मिन् परमात्मस्वरूपे शुद्धचैतन्ये । **अशुद्धनयस्य**- पर्यायसम्भिन्नद्रव्यावगाहिनो द्रव्यार्थिकस्य द्रव्यसम्भिन्नपर्यायावगाहिनः पर्यायार्थिकस्य च । **आवापोद्वापौ**- स्वधर्मस्य कल्पनारूपान्वय आवापः, अन्यधर्मप्रतिक्षेपरूपव्यतिरेक उद्वापः, एतौ चाऽशुद्धनयकृतावेव[२] । तयोर्विश्रान्तिरभाव आवापोद्वापविश्रान्तिः, समस्तीति क्रियाऽध्याहार्या । यस्मिन् परात्मस्वरूपे अशुद्धनयप्रभावितैकधर्मकल्पना-ऽन्यधर्मप्रतिक्षेपौ न स्त इत्यर्थः । तदेवम्भूतं **परमात्मनः स्वरूपं शुद्धानुभवसंवेद्यं**- शुद्धोपयोगमात्रगम्यमित्यर्थः ॥२.२७॥

---

१. श्लोकोऽयं प्रवचनसार - २.२ गाथाया च्छायारूपः । अतः सा गाथा तद्वृत्तिश्चाऽवलोकनीये । २. वृत्त्यन्तरे "अशुद्धनयस्य- औपाधिकपर्यायग्राहकनयस्य, आवापोद्वापविश्रान्तिः- अध्यारोपापवादाभ्यां निवृत्तिर्भवति (अध्यारोपोऽविद्यमानस्याऽऽरोपः, अपवादः- विद्यमानस्य प्रतिषेधः)" इति तात्पर्यमुपवर्णितम् । तच्चिन्त्यम् ।

यतः शुद्धानुभवसंवेद्यमेव परमात्मस्वरूपमतो ये केचन कल्पनाज्ञानगोचरीभूय स्थिताः पर्यायास्ते सर्वेऽपि न परमात्मस्वरूपमित्याह –

**गुणस्थानानि यावन्ति, यावन्त्यश्चाऽपि मार्गणाः ।**
**तदन्यतरसंश्लेषो, नैवाऽतः परमात्मनः ॥२.२८॥**

**तदन्यतरसंश्लेषः**- गुणस्थानमार्गणान्यतरसम्बन्धः, **नैव**- न भवत्येव, **अतः**- शुद्धानुभवमात्रसंवेद्यस्वरूपत्वतः । गुणस्थानमार्गणास्वरूपाणामवगमो ग्रन्थान्तराद् विधेयो, ग्रन्थगौरवभयान्नेह तत्स्वरूपपरिभावनम् ॥२.२८॥

ये च शुद्धोपयोगविकलास्ते परौपाधिकानल्पधर्मान्नात्मन्यवगच्छन्तोऽपि न वस्तुस्थित्या परमात्मस्वरूपाभिज्ञा इत्युपदिशति –

**कर्मोपाधिकृतान् भावान्, य आत्मन्यध्यवस्यति ।**
**तेन स्वाभाविकं रूपं, न बुद्धं परमात्मनः ॥२.२९॥**

**तेन**- आत्मनि कर्मोपाधिकृतभावाध्यवसायवता पुरुषेण । **स्वाभाविकं**- स्वतःसिद्धमसाधारणस्वरूपम् । उत्तानार्थमन्यत् ॥२.२९॥

यदि कर्मोपाधिकृता भावा न शुद्धस्याऽऽत्मनस्तर्हि तेषां तत्र व्यवहारः किंनिबन्धन इत्यपेक्षायामाह –

**यथा भृत्यैः कृतं युद्धं, स्वामिन्येवोपचर्यते ।**
**शुद्धात्मन्यविवेकेन, कर्मस्कन्धोर्जितं तथा ॥२.३०॥**

तथा च 'व्यवहार उपचारबहुल इति न व्यवहारेण धर्माणां वास्तविकत्वं संप्रधार्य'मित्यस्य दाढर्यार्थं दृष्टान्तदार्ष्टान्तिकभावेन प्रकृतार्थगुम्फनं, तथा सति प्रतिपाद्यावबोधः सौकर्येण सम्पद्यते इति । श्लोकार्थस्तु व्यक्त एव ॥२.३०॥

तथाव्यवहारिणोऽज्ञत्वं सुखावबोधमेवेत्युपदर्शयितुमाह –

**मुषितत्वं यथा पान्थ-गतं पथ्युपचर्यते ।**
**तथा व्यवहरत्यज्ञ-श्चिद्रूपे कर्मविक्रियाम् ॥२.३१॥**

एतदपि पद्यं स्पष्टार्थमेव ॥२.३१॥

नन्वेवमात्मस्वरूपमवगच्छन्नपि ज्ञानी कर्मकृतभावाभिभूतो दृश्यते एव । ततश्च कर्मकृतभावान् स्वाभाविकत्वेनाऽऽत्मन्यध्यवस्यतोऽज्ञानिनः[१] किङ्कृतो विशेषः कर्मकृतभावानस्वाभाविकत्वेनाऽऽत्मनि पश्यतो ज्ञानिन इत्यत आह –

**स्वत एव समायान्ति, कर्माण्यारब्धशक्तितः ।**
**एकक्षेत्रावगाहेन, ज्ञानी तत्र न दोषभाक् ॥२.३२॥**

१. अत्र पञ्चमी विभक्तिः समस्ति ।

**आरब्धशक्तितः**- 'आरब्धं कर्माऽवश्यमेव भोक्तव्य'मित्यारब्धकर्मस्वाभाव्यात् । **स्वत एव**- स्वस्वभावादेव, न तु पुरुषप्रयत्नरूपपुरुषकारान्नाऽपीश्वरादितः, **कर्माणि**- पूर्वोपार्जितपुण्यपापाख्यकर्माणि, **समायान्ति**- स्वफलं दातुमुदयावलिकाप्रविष्टानि भवन्ति ।

**एकक्षेत्रावगाहेन**- नीरक्षीरन्यायेन यस्मिन् क्षेत्रे कर्मणामवगाहस्तस्मिन्नेव ज्ञान्यात्मनोऽप्यवगाह इत्येवमेकक्षेत्रावगाहेन, **ज्ञानी**- कर्मस्वभावकृतदोषादिस्वरूपाभिज्ञः, **तत्र**- कर्मकृतभाववैचित्र्योल्लासे, **न दोषभाक्**- न कर्मकृतदारिद्र्याद्युपद्रवजनितक्लेशभाक्[१] । उक्तमन्यत्राऽपि –

"ज्ञानिनोऽज्ञानिनश्चाऽत्र, समे प्रारब्धकर्मणि ।
न क्लेशो ज्ञानिनो धैर्या-न्मूढः क्लिशत्यधैर्यतः ॥
मार्गे गन्त्रोर्द्वयोर्भ्रान्तौ, समायामप्यदूरताम् ।
जानन् धैर्याद् द्रुतं गच्छे-न्मूढस्तिष्ठत्यधैर्यतः ॥" [ ] इति ॥२.३२॥

ननु यथाऽन्ये लोका इष्टे कर्मणि प्रवर्तन्ते, अनिष्टे च कर्मणि निवर्तन्ते, विहितमाचरन्ति, निषिद्धं च परित्यजन्ति; तथैव लोकव्यवहारानुसारिणो ज्ञानिनोऽपीति । एवं चेष्टमुपाददानास्तदुपायान्वेषणायासप्रभावितदुःखभाजिनो लौकिका इव ज्ञानिनः स्युः, अनिष्टं च परिहरन्तस्तत्साधनसम्पर्काद् दूरीभवन्तो नैकान्तेनैवैकत्र स्थितिमाधातुं प्रभविष्णव इति तत्कृतदुःखभागिनो लौकिका इव तेऽपि प्रसज्येरन्निति कुत एतेषां दृढज्ञानयोगव्यवस्थितिरित्यत आह –

**दारुयन्त्रस्थपाञ्चाली-नृत्यतुल्याः प्रवृत्तयः ।**
**योगिनो नैव बाधायै, ज्ञानिनो लोकवर्तिनः ॥२.३३॥**

यथा दारुयन्त्रखचितकाष्टमयपुत्तलिकानृत्यं बहुप्रकारं केनाऽपि तत्सूत्रणसूत्रधारेण विधीयमानं तत्कर्तृतयाऽऽपाततः प्रतीयमानानां पुत्तलिकानां स्वभावत एव रागद्वेषविवर्जितानां नाऽऽयासप्रभावितदुःखसंक्षोभविधायकं; तथा योनिप्रवृत्तयोऽपि प्रारब्धकर्मशक्तिवशतो भवन्त्यो न स्वकर्तॄणां माध्यस्थ्यभावनाभावितान्तःकरणानां रागद्वेषजनितव्यामोहपराङ्मुखानां ज्ञानिनां 'लोकव्यवहारव्युच्छेदो मा भू'दित्येतावन्मात्रेणैव प्रवर्तमानानां न मनागपि बाधायै भवन्ति । अत्र च लोकवर्तिनो ज्ञानिनो योगिनः प्रवृत्तयो दारुयन्त्रस्थपाञ्चालीनृत्यतुल्याः सत्यो बाधायै नैव भवन्तीति क्रियायोगः ॥२.३३॥

लोकमार्गातिलङ्घी यदि ज्ञानी अभ्युपगम्येत तदा तस्य यथेष्टाचरणं युज्येत । नैवं तथा तस्योपगमः । तथा सत्यशुचिभक्षणाद्यतिनिन्दनीयकर्मण्यपि प्रवर्तमानस्य व्यवहारौचित्यलङ्घिनस्तस्य ज्ञानिनः स्वभावतोऽशुचिभक्षणप्रवृत्ताच्छुनोऽप्यपकृष्टत्वमासज्येत । अत उचितक्रियाकार्येव ज्ञानी अस्माकमनुमत इत्याशयेनाऽऽह –

---

१. वृत्त्यन्तरे श्लोकस्याऽस्याऽन्योऽपि भावार्थः प्रदर्शितः । स चैवं - आरब्धशक्तितः- नियतविविधकर्मबन्धसामर्थ्यतः, स्वत एव- विशिष्य जीवाप्रेरितान्येव कर्माणि समायान्ति । परमेकक्षेत्रावगाहमात्रेण ज्ञानी तत्र कर्मबन्धे दोषभाग् न भवतीति । अयमपि सङ्गमनीयो भाति ।

**प्रारब्धादृष्टजनिता[१], सामयिकविवेकतः[२] ।**
**क्रियाऽपि ज्ञानिनो व्यक्ता-मौचितीं नाऽतिवर्त्तते ॥२.३४॥**

**सामयिकविवेकत** इति । अयं सामायिककाल इदानीं सामायिकक्रिया विधेया । अयं चोपदेश-कालोऽत्र उपदेशो विधेयः । एवमन्यास्वपि क्रियासु नियतसमयप्रभवासु यथासम्भवमुपयुज्य कालसम्बद्ध-प्रवृत्तिविवेक इत्येवं सामयिकविवेकत इत्यर्थः ।

**क्रियाऽपि**- जायमाना क्रियाऽपि तत्तन्नित्यनैमित्तिकाचरणमयी, **ज्ञानिनः**- प्रकृतज्ञानवतः, **व्यक्तां**-स्पष्टाम्, **औचितीम्**- उचितत्वं, **नाऽतिवर्तते**- नाऽतिक्रामतीत्यर्थः ॥२.३४॥

ननु ज्ञानिनो रागद्वेषराहित्येऽपि विषयाणां स्वसम्बद्धाभिभावकत्वस्वाभाव्यात् तैस्तस्याऽभिभवः स्यादेवेत्यत आह –

**संसारे निवसन् स्वार्थ-सज्जः कज्जलवेश्मनि ।**
**लिप्यते निखिलो लोको, ज्ञानसिद्धो न लिप्यते ॥२.३५॥**

**स्वार्थसज्जः**- स्वेष्टसम्पादनपरायणो **निखिलो**- ज्ञानिव्यतिरिक्तः समग्रोऽपि **लोकः**- जनः, **कज्जल-वेश्मनि**- कामक्रोधलोभमोहा एव आत्ममनोमलीमसतास्वरूपापादकत्वात् कज्जलानि, तेषां निरामया-वासस्थानत्वाद् वेश्मेव वेश्म । तस्मिन् **संसारे निवसन्, लिप्यते**- कामक्रोधलोभमोहैरभिभूयते ।

**ज्ञानसिद्धस्तु** योगी न स्वार्थसज्ज इत्यरक्तद्विष्टस्वभावो न केनाऽपि स्वस्वभावतः प्रच्यावयितुं शक्य इत्युक्तसंसारे निवसन्नपि **न लिप्यते**- न तैरभिभूयते । मूलत एव तत्र तेषामुच्छेदात् ॥२.३५॥

ज्ञानिनो लिप्तत्वाभावे कर्तृत्व-कारयितृत्वा-ऽनुमन्तृत्वाद्यन्यतमाभाववत्तयाऽऽत्मज्ञानवत्त्वमेव प्रयोजकमित्याह –

**नाऽहं पुद्गलभावानां, कर्त्ता कारयिता च न ।**
**नाऽनुमन्ताऽपि चेत्यात्म-ज्ञानवान् लिप्यते कथम्? ॥२.३६॥**

**अहं**- पुद्गलव्यतिरिक्ततया प्रतिभासमानमूर्तिरात्मा । पूरणगलनस्वभावतया **पुद्गलभावानां** साक्षात् परम्परया वा पुद्गलविवर्तभूतानां स्रक्चन्दनकामिन्यादिसम्बन्धप्रभावितानां भोगानां तद्विषयाणां कामादीनां तदुपघातोल्लसितानल्पकुकल्पनासमुत्थविकाराणां च परोपाधिसमुद्भूततया विजातीयतया च स्वतः **कर्ता न**, परद्वारा **कारयिता न**, परेणैव तदुपादाने तदुपष्टम्भकवचनाद्युपन्यासेन तदप्रतिषेधकत्वेन वा**ऽनुमन्ताऽपि न**, इत्येव**मात्मज्ञानवान्** पुरुषः **कथं लिप्यते** ? नैव लिप्यते इत्यर्थः ॥२.३६॥

"पुद्गलस्यैव पुद्गलविशेषसम्बन्धविशेषलक्षणो लेपो नाऽपुद्गलस्याऽऽत्मनः । अञ्जनेन चित्रव्यवस्थित-पुद्गलाकारविशेषस्यैव श्यामीकरणं, न तु तत्राऽभिव्याप्याऽवस्थितस्याऽपि व्योम्न" इत्थं ध्यायतोऽपि ज्ञानिनो न लेपसम्भव इत्याह –

---

१. पूर्वकृतकर्मविपाकफलभूतेत्यर्थः । २. वृत्यन्तरेऽत्र "सामायिकविवेकतः" इति पाठो दृश्यते । अर्थोऽपि तदनुरूप एव तत्र दर्शितः - लोकविरुद्धत्याग-शासनापभ्राजनानिवृत्त्यनुकूलपरिणामानुविद्धचारित्रनिर्वाहकाचारसम्बन्धिविवेकशक्तित इति ।

**लिप्यते पुद्गलस्कन्धो, न लिप्ये पुद्गलैरहम् ।**
**चित्रव्योमाऽञ्जनेनेव, ध्यायन्निति न लिप्यते ॥२.३७॥**

**पुद्गलैः पुद्गलस्कन्धो लिप्यते** । अहं तु पुद्गलभावास्पृष्टतनुः, **न लिप्ये**- लिप्तो न भवामि । **चित्रव्योमाऽञ्जनेनेवे**ति[१] । यथा चित्रव्यवस्थितपुद्गलविशेषः पुद्गलस्वभावेनाऽञ्जनेन लिप्यते- स्वस्वरूपेणाऽऽच्छादितस्वरूपः क्रियते, न त्वपुद्गलस्वभावं व्योम तत्र स्थितमपि तेन तथा क्रियते **इति ध्यायन्**- एवमात्मस्वरूपं भावयन् ज्ञानवान् **न लिप्यते**- न लेपभाग् भवति ॥२.३७॥

ननु यदि स्वभावतो निर्लिप्त एवाऽयमात्मा, तर्हि तत्स्वरूपमविदुषस्तत्र लेपभ्रान्त्याऽऽरोपितलिप्ततासम्भवात् तदपनुत्तये शुद्धक्रियानुष्ठानं भवति । तेन च लेपस्य वस्तुतोऽभावेऽपि तद्भ्रान्तेरेवाऽपनयनं शुभज्ञानोत्पादनद्वारा सम्भवति, सर्वस्याऽपि शुद्धक्रियाकलापस्य चित्तशोधकताऽभ्युपगमात् । ज्ञानिनस्तु निर्लिप्तमात्मस्वरूपं करामलकवत् पश्यतो न मात्रयाऽपि समस्ति लिप्तताभ्रान्तिः, स्वभावतो विद्यमानैव च चित्तशुद्धिरित्यनतिप्रयोजनत्वात् शुभक्रियाकलापाननुष्ठानमेव ज्यायः । एवमपि तथाऽनुष्ठानं कुर्वन् ज्ञानी अप्रेक्षापूर्वकारितया लोकस्योपहसनीयतापात्रमेव स्यादित्यत आह —

**लिप्तताज्ञानसम्पात-प्रतिघाताय केवलम् ।**
**निर्लेपज्ञानमग्नस्य, क्रिया सर्वोपयुज्यते ॥२.३८॥**

निर्लेपज्ञानमग्नस्य सर्वा क्रिया लिप्तताज्ञानसम्पातप्रतिघाताय केवलमुपयुज्यते इति सम्बन्धः ।

'सर्वथा निर्लिप्तोऽयं चेतनस्वरूप आत्मा' इत्याकारकं यज्ज्ञानं **तन्निर्लेपज्ञानं तन्मग्नस्य**- तत्तादात्म्यमुपागतस्य ज्ञानिनो लोकवर्तित्वाल्लोकव्यवहारमनतिक्रम्याऽवतिष्ठमानस्य **सर्वा क्रिया**- असदाचरणव्यतिरिक्ता सर्वाऽपि शुभा क्रिया आगमविहितक्रियानुष्ठानलक्षणा । 'अयं विषयगार्ध्यात् तदत्यन्तसम्बन्धाविच्छेदाय विहितामपि क्रियां नाऽनुतिष्ठत्यतो विषयलोलुपोऽय'मित्येवं ज्ञान्यात्मविशेष्यकं **लिप्तत्व**प्रकारकं यत् पृथग्जनस्य **ज्ञानं**, तस्य विषयतयाऽऽत्मनि यः **सम्पातः**- प्राप्तिः सम्बन्ध इति यावत्, तस्य यः **प्रतिघातो**ऽनुत्पादलक्षणः प्रतिबन्धस्तदर्थं लिप्तताज्ञानसम्पातप्रतिघाताय- 'अयं विषयलिप्त' इत्याकारकपृथग्जनभ्रान्त्यनुत्पत्तये इति यावत् । **केवलम्**- उक्तभ्रमापनोदव्यतिरिक्तप्रयोजनविकल**मुपयुज्यते**- अनुष्ठानप्रयत्नविषयो भवति ॥२.३८॥

ननु ज्ञानिनोऽप्यंशतो लेपः समस्त्येव । तदपनोदार्थमेव शुभक्रियानुष्ठानम् । अन्यत्र लेपापनोदने क्लृप्तसामर्थ्यस्य तस्य तत्रापि तत्फलकत्वस्यैव युक्तत्वादतः शुभक्रियानुष्ठानान्यथानुपपत्तिप्रमाणक[लेप]लेश सम्पर्कवति ज्ञानिनि निर्लेपत्वाभ्युपगमः कदाग्रहमात्रविजृम्भित एवेत्यतः, क्रियावत्यप्यभिमानिनि लेपोऽकुण्ठितप्रसर एवोपलभ्यते, क्रियाशून्येऽपि च पुरुषधौरेये क्वचिल्लेपो न दृश्यते इत्यन्वयव्यतिरेकव्यभिचाराभ्यां निर्लेपसामान्यं प्रति शुभक्रियानुष्ठानस्य सामर्थ्यमेव न क्लृप्तमित्याह —

---

१. 'चित्रव्योम'पदस्य वृत्त्यन्तरे 'चित्रीयमाणं गगन'मित्यर्थो दर्शितः । स चाऽयुक्तः प्रतिभाति । चित्रशब्दस्य तथाऽर्थावभासकत्वस्य दुःशकत्वात्, "पुद्गलैः पुद्गलस्कन्धो लिप्यते" इत्यत्र दृष्टान्तस्याऽफलीभवनाच्च ।

**तप:श्रुतादिना मत्त:, क्रियावानपि लिप्यते ।**
**भावनाज्ञानसम्पन्नो, निष्क्रियोऽपि न लिप्यते ॥२.३९॥**

**क्रियावानपि तप:श्रुतादिना मत्त:** "अहं तपस्वी, अहं श्रुतादिज्ञानवान्, मदन्यो नैतादृशतपोबलसम्पन्न:, कोऽन्यो मत्त एतादृशश्रुतज्ञानादिसम्पन्न" इत्येवमभिमानवान् **लिप्यते** । तथा च क्रियानुष्ठानस्य सद्भावेऽपि न लेपविगमं इत्यन्वयव्यभिचार: ।

निष्क्रियोऽपि व्यवहारदशामतीत्य व्यवस्थित: पुरुषविशेषो भावनाज्ञानसम्पन्नो **न लिप्यते**- न लेपभाग् भवति । तथा च तत्र क्रियानुष्ठानाभावेऽपि लेपाभावस्य सद्भाव इति व्यतिरेकव्यभिचार: ॥२.३९॥

**समलं निर्मलं चेद-मिति द्वैतं यदा गतम् ।**
**अद्वैतं निर्मलं ब्रह्म , तदैकमवशिष्यते ॥२.४०॥**

एवं च पौद्गलिकभावानां परौपाधिकानामपि स्वात्मगततयाऽऽकलयिता रागद्वेषादिकषायपरिभूतान्त:करण: समल:, भावनाज्ञानसम्पन्नश्चाऽतथाभूतो निर्मल: । परौपाधिकभावान् स्वात्मगततयाऽयं पश्यति अतोऽयं समल:, अहं च न तथा पश्यामि अतोऽहं निर्मल इत्येवं व्यावृत्तिज्ञानमपि यावत् समस्ति, तावद् द्वैतमेव, तस्याऽप्यपगमो यस्यामवस्थायां **गतं**- विनष्टं न भवत्येवेति यावत्, तदा तस्यामवस्थाया**मेकं**- भिन्नस्याऽपि सतोऽद्वैतभावनयाऽवगाहनात् स्वरूपतश्चैतन्यलक्षणेनैकमेवाऽतो**ऽद्वैत**मत एव च **निर्मलं ब्रह्म**- आत्मस्वरूप**मवशिष्यते** । एतदभिप्रायक एव च "एकमेवाऽद्वितीयं ब्रह्म, नेह नानाऽस्ति किञ्चन" इत्यादि: परेषामागम: ॥२.४०॥

अस्य च ब्रह्मण: सच्चिदानन्दरूपत्वं योग्यनुभवसंवेद्यम् । तत्र सत्त्वं महासामान्यं सकलवस्तुसमनुगतं ब्रह्माभिन्नतया यदा व्यवतिष्ठते धर्मधर्मिणो: कथञ्चित्तादात्म्यात्; तदा 'तदभिन्नाभिन्नस्य तदभिन्नत्व'मिति नियमेन जगदेव ब्रह्मस्वरूपमापन्नमिति नयोपदर्शिता: सर्वेऽप्यात्मप्रकारास्तत्स्वरूपनिमग्ना एवेति सर्वपर्यायविवर्तकस्य ब्रह्मण: समुद्रसन्निभत्वं तद्विवर्तानां च कल्लोलकल्पत्वं तन्निबन्धनानामुपाधीनां च समुद्रकल्लोलोल्लासकोद्धतप्रभञ्जनसन्निभत्वमित्युपदर्शयति –

**महासामान्यरूपेऽस्मिन्, मज्जन्ति नयंजा भिदा: ।**
**समुद्र इव कल्लोला:, पवनोन्माथनिर्मिता: ॥२.४१॥**

**महासामान्यरूपे** इति । सकलवस्त्वनुगतत्वान्महासामान्यं सत्ता, तस्या अतिरिक्तधर्मतयाऽभ्युपगमे धर्मिवृत्तित्वमधिकं कल्पनीयमतो वरं धर्मिस्वरूपैव सेति ब्रह्मैव तादृशसत्तारूपं, तस्मिन्नित्यर्थ: । **अस्मिन्**- ब्रह्मणि ।

**नयजा:**- तत्तन्नयकल्पनया गोचरीक्रियमाणत्वान्नयजा इत्युपचर्यन्ते । **भिदा:**- आत्मनो जीव-ईश्वरादिप्रकारा, अस्य सत्तयैक्यमालम्ब्य व्यवस्थितौ सतो ये भेदा द्रव्यगुणादयस्तेऽप्यस्यैव प्रपञ्चा इति । भिदा इत्यनेन प्रत्येकं सर्वनयमन्तव्या आत्मन: प्रकारास्तत्त्वप्रभेदप्रकाराश्च गृहीतव्या: ।

एकस्मिन्ननेकस्वरूपविवर्तत्वं दृष्टान्तेन द्रढयति – **समुद्र इव कल्लोला** इति । समुद्रे यथा कल्लोला अनवरतं विचित्रस्वभावाः प्रादुर्भवन्तस्तत्रैव निमज्जन्ति– तदभिन्नतयैवाऽवतिष्ठन्ते, तथा ब्रह्मपर्याया अपि यथामतं कल्पनाजालसमुत्थिता ब्रह्मस्वरूपमास्थायैवाऽवस्थिता, न ततो बहिरिति नि**मज्जन्ति**– ब्रह्मस्वरूप-तत्त्वज्ञाने सति न तेषां तत्राऽवभास इत्यस्थिरतासाधर्म्येण कल्लोलकल्पत्वम् ।

कस्मादेकस्मिन्नेव समुद्रे विचित्राः कल्लोलाः समुल्लसन्तीत्यपेक्षायामाह – **पवनोन्माथनिर्मिता** इति । पवनेन समुद्रस्य य उन्माथः– विलोडनं– लघीयस्तया जलानामुच्चालनं, तन्निर्मितास्तत्प्रभवा इत्यर्थः । एवं प्रकृतेऽपि नयानां मन्तव्यप्रकारभेद एव प्रभञ्जनस्तत्प्रकल्पितोपाधिसमुत्थापिता एव वास्तविककर्मपुद्गलप्रभवा भावाः पौद्गलिका अप्यापाततस्तत्र परिदृश्यमाना इति ॥२.४१॥

नन्वेवं सत्तारूपमहासामान्यरूपत्वे पुद्गलादिसद्रूपत्वमप्यस्याऽनपनोदितमेव । एवं च पौद्गलिका भावा अपि स्वाभाविका एव प्रसज्येरन् । तथा च पुद्गलस्वरूपतामापन्नस्याऽस्य लेपोऽपि वास्तविक एव, निर्लेपत्वं स्वरूपत एव न स्यादिति पूर्वोपदर्शिता सर्वाऽपि प्रक्रिया व्युच्छिन्ना एव स्यादित्यत आह –

**षड्द्रव्यैकात्म्यसंस्पर्शि, सत्सामान्यं हि यद्यपि ।**
**परस्याऽनुपयोगित्वात्, स्वविश्रान्तं तथापि तत् ॥२.४२॥**

जीवपुद्गलधर्माधर्माकाशकालभेदतः षड् द्रव्यम् । तेन सह प्रत्येकं 'सत्, स'दिति प्रत्ययानुगमनेनैकात्म्यं– तादात्म्यं तत् समिति समन्तात् स्पृशति– तद्भागी भवतीति **षड्द्रव्यैकात्म्यसंस्पर्शि** । अत एवा-ऽनुगतत्वा**द्धि**– यतः **सत्**– सत्त्वं **सामान्यं**– महासामान्यं **यद्यपि** भवतीति क्रियायोगः ।

**तथापि**– षड्द्रव्यैकात्म्यसंस्पर्शित्वेऽपि, **परस्य**– विशेषेभ्यो षड्द्रव्येभ्यो भिन्नस्य– व्यतिरिक्तस्य स्वरूपसत्त्वविलक्षस्य सत्त्वस्य, **अनुपयोगित्वात्**[१]– भेदाभेदादिविकल्पजर्जरितत्वेनाऽर्थक्रियाकारित्वाभावात् । यतस्तदभ्युपगम्यमानं यदि व्यतिरिक्तमेव विशेषेभ्यस्तदा तस्याऽपि वस्तुत्वेन सत्त्वमभ्युपेयम् । एवं तस्याऽपि सत्त्वमेवं तस्याऽपीत्यनवस्था । अथ तस्य सत्त्वं नाऽङ्गीक्रियते, तदा स्वयमसता तेन शशशृङ्गकल्पनेन न परस्याऽपि सत्त्वमित्यसदेव जगदापन्नम् । अथ तत् सत्त्वं स्वस्मिन्नपि सद्बुद्धिनियामकत्वाद् वर्तते तदाऽऽत्माश्रयः । यदि तत्र सत्त्वं द्वितीयं तत्र चेदमित्युपगम्येत तदाऽन्योन्याश्रयः । एवं तृतीयादिसत्त्वमुपगम्य तत्र प्रथमादिसत्त्वमुपगम्यते तदा चक्रकम् ।

एवं तत् सत्त्वं सांशं निरंशं वा । आद्ये येनांऽशेनैकत्र तदवस्थानं तदन्येनांऽशेनाऽन्यत्राऽवस्थानमित्येव-मनेकवृत्तित्वसम्भवेऽपि सम्पूर्णस्य तस्य न कुत्राऽपि वृत्तित्वं स्यात् । एवमंशेऽपि तस्यांऽशेनाऽवस्थानं तत्राऽप्यंशेनाऽवस्थानमित्यभ्युपेयमन्यथांऽशानां सत्त्वाभावे शशशृङ्गकल्पानां तेषां वृत्त्यवच्छेदकत्वमपि दुर्घटं स्यादित्यनवस्थाऽत्राऽपि संलग्नैव । द्वितीये निरंशस्य तस्यैकत्रैव पर्याप्त्याऽवस्थानेनाऽन्यत्राऽवस्थानमेव दुर्घटम् । अतोऽतिरिक्ततयाऽभ्युपगम्यमाना सत्ता स्वात्मानमेवाऽलभमाना नाऽर्थक्रियासूपयुज्यते ।

---

१. वृत्त्यन्तरे 'परस्य– अनात्मद्रव्यस्य पुद्गलादिलक्षणस्य परमभावग्राहकनयविचारे अनुपयोगित्वात्– निष्प्रयोजनत्वात्' इत्यर्थो दर्शितः । स चाऽप्रस्तुतत्वादनुपादेयो भाति ।

**तत्**- सत्सामान्यं, **स्वविश्रान्तं**- प्रत्येकं तत्तद्व्यक्तिस्वरूपनियतं स्वरूपसत्त्वमिति यावत् । स्वरूपसत्त्वानां भिन्नानामपि 'सत्, स'दित्यनुगतबुद्धिनियामकत्वेन कथञ्चिदैक्यान्महासामान्यत्वं स्याद्वादनीत्योपपद्यते एव । एवं च ब्रह्मणो महासामान्यसद्रूपत्वेऽपि तत् सूक्ष्मधिया विचार्यमाणं स्वस्वरूपसत्त्वे एव विश्राम्यतीति न वस्तुतः पुद्गलरूपतापत्तिस्तस्य । ततो न पौद्गलिकानां भावानां कर्तृत्वकारयितृत्वादिकं वास्तविकं तस्येति लेपाभावे निर्लिप्तत्वं तस्योपपन्नमिति भावः ॥२.४२॥

ननु सङ्ग्रहोऽभिन्नैकरूपमेव महासामान्यं सत्त्वमभ्युपगच्छति । ऋजुसूत्रनयश्च स्वरूपसत्त्वमननुगतमेवोररीकरोतीत्यनुगता-ऽननुगतसत्त्वाभ्युपगमो न कस्याऽपि नयस्य विषयः । तथा चैवमभ्युपगच्छतः स्याद्वादिनः प्ररूपणायां नयनिरपेक्षत्वं प्रसक्तम् । तथा च "प्रमाणनयैरधिगम" [तत्त्वार्थ० - १.६] इति सिद्धान्तव्याकोपः । तत्र हि एकस्यैव वस्त्ववगमस्य प्रमाणनयोभयप्रभवत्व'मधिगम' इत्येकवचनोपन्यासतोऽवधार्यते इत्यत आह —

**नयेन सङ्ग्रहेणैव-मृजुसूत्रोपजीविना ।**
**सच्चिदानन्दरूपत्वं, ब्रह्मणो व्यवतिष्ठते ॥२.४३॥**

**ऋजुसूत्रोपजीविना**- ऋजुसूत्राभ्युपगतस्वरूपसत्त्वानां स्वाभ्युपगतानुगतैकमहासामान्यरूपसत्त्वस्वरूपप्रविष्टतयाऽभ्युपगमोपष्टम्भत ऋजुसूत्रानुगतेन । **सङ्ग्रहेण**- सर्वस्यैवाऽवान्तरसामान्यविशेषादेरेकमहासामान्यसत्त्वस्वरूपतया सङ्ग्रहप्रवणेन सङ्ग्रहसञ्ज्ञकेन नयेन द्रव्यार्थिकनयविशेषेण । **एवम्**- उक्तप्रकारेण सच्चिदानन्दरूपत्वं ब्रह्मणो व्यवतिष्ठते ।

तत्र शुद्धोपयोगरूपत्वव्यवस्थापनेन चैतन्यरूपत्वं, वैषयिकसुखापेक्षया ज्ञानमग्नस्याऽत्युत्कृष्टानन्दस्वरूपावाप्त्युपपादनेनाऽऽनन्दरूपत्वं, "महासामान्यरूपेऽस्मि"न्नित्यनेन च सद्रूपत्वं व्यवस्थापितमिति,

"अस्ति भाति प्रियं नाम, रूपं पञ्चात्मकं जगत् ।
आद्यत्रयं ब्रह्मरूपं, जगद्रूपं ततो द्वयम् ॥" [ ]

इति परवचनमपि सम्यक् परिशीलितं भवति, स्याद्वादे सर्वस्यैव नयभेदेनोपपत्तेरिति ॥२.४३॥

ननु सत्त्वं चित्त्वमानन्दत्वं परस्परविभिन्नस्वभावमेवाऽऽस्थेयम् । अन्यथा सच्चिदानन्दशब्दानामभिन्नप्रवृत्तिनिमित्तकत्वेन पर्यायताप्रसक्तौ त्रयाणां सामानाधिकरण्येनोपादानं 'घटः कलश' इतिवद् दुर्घटं स्यात् । एवं च नैकं विभिन्नस्वभावात्मकं, स्वभावभेदे स्वभाववतो भेदस्याऽऽवश्यकत्वात् । तथा च 'एकमेवाऽद्वितीयं ब्रह्मे'ति परश्रुतेः सङ्गमना कुतः, ब्रह्माद्वैतस्यैव सद्भावात् । एवमुक्तधर्मत्रयवत्त्वे निर्धर्मकत्वमपि ब्रह्मणो विशीर्येत ।

किञ्चोक्तधर्माणां वास्तविकत्वे तद्विशिष्टं ब्रह्माऽपि वास्तविकमिति तत्तद्धर्मविशिष्टतया ब्रह्मज्ञानमपि प्रमात्मकमिति तदात्मकसविकल्पवेद्यत्वे सम्भवति 'निर्विकल्पकैकमात्रवेद्यमेव ब्रह्म, ब्रह्मणो निर्विकल्पकज्ञानमेव शुद्धोपयोग' इत्याद्युपगमोऽपि विशीर्णप्राय एव ।

किञ्चोक्तधर्माणां धर्मिस्वरूपाद् ब्रह्मणो भेदोऽभेदो वा ? आद्ये ब्रह्मधर्मता तेषां न स्यात् । तथाऽपि तथाभावे द्वैतापत्तिः स्यादेव । द्वितीये 'तदभिन्नाभिन्नस्य तदभिन्नत्व'मिति न्यायेन सत्त्वचित्त्वानन्दत्वानामैक्यप्राप्तौ पुनरपि सच्चिदानन्दशब्दानां पर्यायताप्राप्तौ सहप्रयोगानुपपत्तिरित्यत आह —

**सत्त्वचित्त्वादिधर्माणां, भेदाभेदविचारणे ।**
**न चाऽर्थोऽयं विशीर्येत, निर्विकल्पप्रसिद्धितः ॥२.४४॥**

**आदि**पदादानन्दत्वादेरुपग्रहः । **भेदाभेदविचारणे** इति । दर्शितदिशा परस्परं धर्मिणा समं च भेदाभेदविचारण इत्यर्थः । **अयं**- बुद्धौ विपरिवर्तमानतया साक्षात् स्पष्टं शास्त्रयुक्त्या निर्धारितस्वरूपः, **अर्थः**- मुमुक्षुभिरर्थ्यमानत्वात् सच्चिदानन्दस्वरूपब्रह्मात्मकः, **न च विशीर्येत**- नाऽन्यथाभावमापद्येत ।

तत्र हेतुः **निर्विकल्पप्रसिद्धित** इति । अयमभिप्रायः - विकल्पयोग्ये हि विकल्पानामवसरो भवति । ब्रह्म तु निर्विकल्पकैकमात्रवेद्यत्वाद् विकल्पयोग्य एव न भवति । ततः कथं तत्र विकल्पात्मिका भेदाभेदविचारणाऽऽत्मानमासादयेत् ?

न च सत्त्वचित्त्वानन्दत्वधर्मयोगाद् विकल्पयोग्यत्वमेव तस्येति वाच्यम्; सत्त्वं बाध्यत्वाभावः, चित्त्वमस्वप्रकाशत्वाभावः, आनन्दत्वमनानन्दत्वाभावः, तत्राऽनानन्दत्वं परप्रेमानास्पदत्वम् । इत्थं सर्वेऽप्यभावस्वरूपाः । अभावश्चाऽधिकरणात्मक एव नाऽतिरिक्त इति न ब्रह्मव्यतिरेकेण तेषामस्ति सम्भवः । ब्रह्म च निर्विकल्पकवेद्यमिति तेऽपि ब्रह्मस्वरूपतया निर्विकल्पकवेद्या एव । तद्रूपतयैव च तेषां पारमार्थिकत्वम् । तथा सति च निर्विकल्पकमात्रगम्येषु तेष्वपि कुतो विकल्पप्रसरः ? ॥२.४४॥

नन्वेवमपि 'ब्रह्म धर्मि, सत्त्वादयश्च धर्माः' इति धर्मधर्मिभावकल्पनायां पूर्वोक्ता विकल्पाः समवतरन्तः कथमपाकरणीयाः ? तेषां चाऽनपाकरणे भेदाभेदविकल्पदुःस्थतया न ते धर्माः परस्याऽनुभवपथावतार्याः स्युः । परानुभवगोचरतामुपनेतुमेव च शास्त्रव्यापारो भवतीत्यत आह –

**योगजानुभवारूढे, सन्मात्रे निर्विकल्पके ।**
**विकल्पौघासहिष्णुत्वं, भूषणं न तु दूषणम् ॥२.४५॥**

**योगजानुभवारूढे**- योगजानुभवमात्रगम्ये । **सन्मात्रे** इति । धर्मधर्मिभावानापन्ने केवलसद्रूपे ब्रह्मणीत्यर्थः । **निर्विकल्पके** इति । धर्मधर्मिभावकल्पनाऽगोचरतया निर्धर्मके इत्यर्थः । **विकल्पौघासहिष्णुत्वं**- विकल्पसमूहेनाऽनुपपन्नत्वम् ।

यो हि विकल्पविषयो भवति, स विकल्पात्मकविचारेण विचार्यमाणस्तथोपपन्नो भवति । ब्रह्मत्वमतथास्वरूपं कथं तथोपपन्नं स्यात् ? तथा च ब्रह्मणो विकल्पौघासहिष्णुत्वं **भूषण**मेव । यतस्तेनाऽलङ्कृतं तत् सर्वथा निर्विकल्पकावदातस्वरूपतयैवाऽवद्योतते इति ।

यथा च विकल्पसहिष्णुत्वं धर्मस्वरूपतया तत्र नाऽस्ति, तथा विकल्पौघासहिष्णुत्वं धर्मस्वरूपतयाऽभ्युपगम्यमानं तत्र नाऽस्त्येव । कथं तत्राऽविद्यमानं तत् तद् दूषयेत् ? अभावस्याऽधिकरणस्वरूपताश्रयणेन यदि ब्रह्मस्वरूपमेव तत्, तदा स्वस्य न स्वदूषकत्वं, दूष्यदूषकभावस्य भेदनिबन्धनत्वादित्यभिप्रायेणोक्तं - **न तु दूषण**मिति ॥२.४५॥

ननु योगिनामनुभवैकगम्ये निर्विकल्परूपे ब्रह्मणि न भवतां वचनप्रवृत्तिसम्भवः । ततश्च परानस्मान् कथं तथाब्रह्मस्वरूपं शास्त्रविज्ञोऽपि भवान् बोधयितुं प्रगल्भः ? एवं च यद् वचनेन प्रतिपादयितुं न शक्यते, तन्नाऽस्ति, यथा शशशृङ्गम् । ब्रह्म चोक्तस्वरूपं तथेत्येवं दूषयितुं समर्था एव वयमित्यत आह –

**यो ह्याख्यातुमशक्योऽपि, प्रत्याख्यातुं न शक्यते ।**
**प्राज्ञैर्न दूषणीयोऽर्थः, स माधुर्यविशेषवत् ॥२.४६॥**

न च शशशृङ्गादिराख्यातुमशक्योऽपि प्रत्याख्यातुं शक्यते एवेति नोक्तनियम इति वाच्यम्; यादृशस्याऽखण्डस्वरूपतयाऽसत्त्वेनाऽभिमतस्य शशशृङ्गादेराख्यातुमशक्यत्वं तस्य न प्रत्याख्यानमपि, अलीकस्य विधिनिषेधोभयधर्मानालिङ्गितत्वात् तत्र विधिवचनस्येव निषेधवचनस्याऽप्यप्रवृत्तेः । अत एव तस्य न कस्यचिद् धर्मस्य विशेष्यत्वं, नाऽपि चाऽत्यन्ताभावप्रतियोगित्वम् । तदुक्त**मुदयनाचार्यैः** –

"व्यावर्त्त्याभाववत्तैव, भाविकी हि विशेष्यता ।
अभावविरहात्मत्वं, वस्तुनः प्रतियोगिता ॥"[१] [न्यायकुसुमा०-३.२]

सखण्डस्य च शशशृङ्गस्य नाऽलीकत्वं, शश-शृङ्गयोरुभयोरपि भिन्नाधिकरणतया व्यवस्थितेः । अतो भ्रान्तिविकल्पमुपादाय 'शशशृङ्ग'मिति वचनप्रवृत्तिः सम्भवत्येव । निषेधवचनमपि तत्र वस्तुगतिमनुरुध्याऽभ्रान्तानां सम्भवत्येव 'शशशृङ्गं नाऽस्ती'ति, शशे शृङ्गं नाऽस्तीत्येवम्भूतस्याऽर्थस्य भावात् ।

यतः सोऽर्थः प्रत्याख्यातुं न शक्यते, ततः प्राज्ञैर्न दूषणीयः । न चेयमदृष्टचरी कल्पनेत्यत आह - **माधुर्यविशेषवदि**ति । प्रतिप्राणि स्वानुभवसंवेद्यमानो दधिदुग्धमधुद्राक्षादीनामन्योन्यं विलक्षणो माधुर्यविशेषः, सोऽसाधारणधर्मेण परस्परव्यावृत्ततया वचनेन 'ईदृशं दधिमाधुर्यं दुग्धमाधुर्यं चेत्थम्भूत'मित्याद्याकारेणाऽऽख्यातुमशक्योऽपि 'तादृशमाधुर्यविशेषो नाऽस्त्ये'वं प्रत्याख्यातुं न शक्यते, आबालगोपालाङ्गनानुभवविरोधात् ।

तथा योगिनां स्वसंवेद्यमुक्तस्वरूपं ब्रह्म योगिभिरप्याख्यातुमशक्यमपि न प्रत्याख्यातुं शक्यते । तथा च 'यद् वचनेन प्रतिपादयितुं न शक्यते तन्नाऽस्ती'त्यनुमानं माधुर्यविशेषेऽनैकान्तिकतादोषाघ्रातत्वादाभासस्वरूपमेवेत्याशयः ॥२.४६॥

योगी एव योगाभ्यासजनितधर्मविशेषादेवंविधं ब्रह्मस्वरूपं तदनुभवजनितं सुखं च ज्ञातुं समर्थो नाऽस्मदादिरिति नाऽस्मदादिज्ञानाविषयत्वेन तस्याऽसत्त्वम् । अन्यथा सुरतक्रीडादिसमुद्भवानन्दविशेषस्य कुमारीज्ञानागोचरत्वादसत्त्वमपि स्यादित्याह –

**कुमारी न यथा वेत्ति, सुखं दयितभोगजम् ।**
**न जानाति तथा लोको, योगिनां ज्ञानजं सुखम् ॥२.४७॥**

**दयितभोगजं सुखं यथा कुमारी न वेत्ति** । नैवं सत्यपि तदभावः । तथा **योगिनां ज्ञानजं सुखं लोको**- योगविकलः पुमान् **न जानाति** । नैतावता ज्ञानजन्यसुखाभावः प्रसिद्ध्यति ॥२.४७॥

---

१. इदमत्र तात्पर्यम् - हि- यतो विशेष्यता भाविकी- भावनिष्ठैव भवति, ततो विशेष्यतारूपा व्यावर्त्त्याभाववत्ता-प्रतियोग्यभाववत्ताऽपि पारमार्थिकी- भावनिष्ठैव भवितुमर्हति । एवं प्रतियोगिताऽप्यभावविरहात्मत्वम्- अभावाभावत्वरूपैव । अतः साऽपि वस्तुनः- वस्तुतो विद्यमानस्यैव भवितुमर्हति । अर्थात् सर्वथाऽलाकस्य वस्तुनोऽभावो तस्मिन् वा कस्यचिद् धर्मस्याऽभावः प्रतिपादयितुं न शक्यः । न चैवमपि निषेधानधिकरणत्वेन ब्रह्मवत् शशशृङ्गादेरप्यदूषणीयता सिद्ध्यते । सखण्डस्य तस्य दूषयितुं शक्यत्वादेव । अखण्डस्य च तस्योपलब्ध्ययोग्यत्वादलीकत्वमेव । नन्वेवं ब्रह्मणोऽपि तद्वदेवाऽऽख्यानप्रत्याख्यानोभयातीतत्वात् कुतो नाऽलीकत्वम् ? योग्यनुभवादिरूपा प्रमाणान्तरेण तस्योपलब्धियोग्यत्वादिति ।

एवंविधं ब्रह्मज्ञानं समस्तीत्यपि नाऽविशेषेण सर्वान् प्रति वाच्यम् । किन्तु यस्तथा श्रद्दधानः सन् तथाऽवधारयितुं समर्थस्तं प्रत्येव । अतादृशं प्रत्युपदेश्यमानं तदनर्थायैव स्यादित्याशयेनाऽऽह –

**अत्यन्तपक्वबोधाय, समाधिर्निर्विकल्पकः ।**
**वाच्योऽयं नाऽर्धविज्ञस्य, तथा चोक्तं परैरपि ॥२.४८॥**

**अत्यन्तपक्वबोधाये**ति । हिताहितविचारप्रवणत्वेनोहापोहसमर्थत्वेन च कषच्छेदतापादिपरिकर्मिततया च परिनिष्ठितो बोधोऽत्यन्तपक्वः । स यस्य तस्मै अत्यन्तपक्वबोधायेत्यर्थः । **अयं निर्विकल्पकसमाधिर्वाच्यः**- प्रज्ञापनीयः ।

**अर्धविज्ञस्ये**ति । यद्यत् स्वमनोऽभिलषितं तत्तत् स्वभावतो दुष्टमदुष्टं हितमहितं स्वशास्त्रीयमन्यशास्त्रीयं वाऽवगच्छति । न तु सम्पूर्णं शास्त्रं यथावदवगच्छति । नवा तदर्थं यतते । एवमपि चाऽऽत्मानं पण्डितम्मन्यः सोऽर्धविज्ञस्तस्याऽयमर्थो **न** वाच्यः । उक्तार्थे परसम्मतिमुपनिबध्नाति – **तथा चोक्तं परैरपी**ति ॥२.४८॥

परवचनमेवोल्लिखति –

**"आदौ शमदमप्रायै-र्गुणैः शिष्यं प्रबोधयेत् ।**[1]
**पश्चात् 'सर्वमिदं ब्रह्म, शुद्धस्त्व'मिति बोधयेत् ॥२.४९॥**

**शिष्यम्**- अन्तेवासिनम् । **शमदमप्रायैः**- शमदमप्रभृतिभिः, शमोऽन्तःकरणस्यैकत्र विषयेऽवस्थापनं, दमो बाह्येन्द्रियनिग्रहः, **गुणैः**- आत्मोपकारकैः । **आदौ**- शुद्धब्रह्मोपदेशात् प्राक्काले, **प्रबोधयेत्**- प्रबोधनं कुर्यात् । प्रथमं प्रज्ञापनीयं शिष्यं शमदमादिगुणभाजनं विदध्यादित्यर्थः । तथा सत्येव शुद्धब्रह्मस्वरूपश्रवणाधिकारित्वमस्य सम्पद्यते ।

**पश्चात्**- तदनन्तरं योग्यं तं '**शुद्धस्त्वं**- कर्मोपाधिविनिर्मुक्तस्त्वं, यदेतत् "सर्वमिदं ब्रह्मे"ति गीयते तद्ब्रह्मस्वरूपोऽसी'त्येवं बोधयेत् । एतेन "अत्यन्तपक्वबोधाय समाधिर्निर्विकल्पकः वाच्योऽय"मिति स्वोक्तौ परसम्मतिराविष्कृता भवतीति ॥२.४९॥

"नाऽर्धविज्ञस्य निर्विकल्पकः समाधिर्वाच्य" इति स्वोक्तौ संवादकं परवचनमुपदर्शयति –

**अज्ञस्याऽर्धप्रबुद्धस्य, 'सर्वं ब्रह्मे'ति यो वदेत् ।**
**महानरकजालेषु, स तेन विनियोजितः" ॥२.५०॥**

**अज्ञस्ये**ति । **अर्धप्रबुद्धस्या**ऽपि यथास्थितार्थानभिज्ञत्वेनाऽज्ञत्वमेवेति तद्विशेषणमेवेदमतो न तदंशे स्वोक्तादाधिक्यमत्रेति बोध्यम् ।

**यः**- प्रज्ञापयिता पुरुषो**ऽज्ञस्याऽर्धप्रबुद्धस्य** प्रबोधनाय '**सर्वं ब्रह्मे**'**त्येवं वदेत्, तेन** प्रज्ञापयित्रा पुरुषेण **सो**ऽर्धप्रबुद्धोऽज्ञो **महानरकजालेषु विनियोजितः** । यतस्तस्याऽप्रशोधितचित्तस्य 'सर्वं ब्रह्मे'ति

१. शमदमोपरत्यादिगुणावगमार्थं वेदान्तपरिभाषादि द्रष्टव्यम् । अयमनन्तरश्लोकश्च महोपनिषत्सत्कौ ।

श्रुतवतो भक्ष्याभक्ष्य-पेयापेय-गम्यागम्यादिभेदज्ञानविरहिणोऽविशेषेण सर्वत्र प्रवर्तमानस्याऽभक्ष्यभक्षणा-ऽपेयपाना-ऽगम्यागमनादि-निषिद्धकर्मानुष्ठानतत्परस्य यथेष्टाचरणतो महानरकपातो ध्रुवमेवेति ॥२.५०॥

अत्यन्तपक्वबोधतारूप-श्रवणाधिकारिविशेषणनिष्पत्तिर्यथा भवति तथोपदर्शयति –

**तेनाऽऽदौ शोधयेच्चित्तं, सद्विकल्पैर्व्रतादिभिः ।**
**यत् कामादिविकाराणां, प्रतिसङ्ख्याननाश्यता ॥२.५१॥**

यतोऽशोधितचित्तस्य ब्रह्मगतसर्वतादात्म्यश्रवणतोऽनर्थ एव, **तेन**- तस्मात् कारणादित्यर्थः । **आदौ**- शुद्धात्मस्वरूपब्रह्मोपदेशात् पूर्वं तादृशब्रह्मश्रवणाधिकारितानिष्पत्तये, **चित्तम्**- अन्तःकरणं, **शोधयेत्**- अश्रद्धाऽज्ञानयथेष्टाचरणादिसमीहादिमलविगलितं कुर्यात् ।

केनोपायेन तथा स्यादित्यपेक्षायामाह – **सद्विकल्पै**रिति । शुद्धाध्यवसायैरित्यर्थः । न केवलं ज्ञानेनैव सम्पूर्णतया चित्तमलापनयनं शक्यं विधातुमत उपायान्तरमाह – **व्रतादिभि**रिति । व्रतानि महाव्रतानि प्राणातिपातविरमणादीनि पञ्चाऽनगारिण आगारिणश्च देशव्रतानि । आदिपदात् शमाद्युपग्रहः । तैरित्यर्थः । अथवा व्रतादिभिरित्यस्यैव सद्विकल्पैरिति विशेषणम् । शोभनानुष्ठानादिसत्प्रकारैरिति तदर्थः ।

व्रतादीनां चित्तशोधकत्वे हेतुमाह – **यदि**ति । यस्मात् कारणादित्यर्थः । **कामादिविकाराणां**- कामक्रोधलोभमोहाद्यात्मकचित्तविकाराणां, **प्रतिसङ्ख्याननाश्यता**- प्राणातिपाताद्यशुभानुष्ठाननिवृत्तिग्रहण-लक्षणप्रत्याख्यानं, तन्नाश्यतेत्यर्थः । 'सद्विकल्पै'रित्यस्य 'शुभाध्यवसायै'रित्यर्थे च प्रतिसङ्ख्यानमशुभा-ध्यवसायप्रतिपक्षभूतशुभाध्यवसायपरिशीलनं, विशिष्टशुभाध्यवसायेन सत्तर्कादिप्रवृत्तेनाऽऽरोपिताशुभा-ध्यवसायस्य महामोहविजृम्भितस्य समूलमुन्मूलनादिति बोध्यम् ॥२.५१॥

महामोहश्चाऽविद्या-माया-प्रकृत्यादिशब्देन व्यपदिश्यते । तस्य नाशे तन्मूलकानां कामादीनां नाशो-ऽयत्नोपनत एव, बीजाभावेऽङ्कुरासम्भवादतो मायास्वरूपमोहस्य भावनादिविलक्षणसहकारिप्रभावित-स्वपरिणामविशेषशुभोपयोगलक्षणविकल्पनाश्यत्वमुपपादयति –

**विकल्परूपा मायेयं, विकल्पेनैव नाश्यते ।**
**अवस्थान्तरभेदेन, तथा चोक्तं परैरपि ॥२.५२॥**

**विकल्परूपे**ति । असदावेशनिबन्धनत्वादनल्पकल्पनाजालसमर्पकत्वाद् विचारतोऽनुपपद्यमानत्वाच्चित्त-विक्षेपाद्युपनिबन्धनत्वादिन्द्रजालिकनिर्मितेन्द्रजालवत् स्फुटस्वरूपतयाऽवभासमानत्वाच्चेयं माया विकल्परूपा निर्विकल्पशुद्धचैतन्यलक्षणात्मब्रह्मव्यतिरिक्तस्वभावा । **विकल्पेनैव**- स्वपरिणामभूतेन "एकमेवाऽद्वितीयं ब्रह्मे"त्यादिवाक्यजाखण्डाकारवृत्तिलक्षणपरिणामेनैव[१] । अत्र विकल्पपदं परिणामपरं, तेनाऽखण्डाकार-वृत्तेर्निर्विकल्पकत्वेऽपि न क्षतिः ।

---

१. वृत्त्यन्तरे नाशकविकल्परूपेण नाशकाविद्यारूपेण च शुभोपयोगपरिणाम एवाऽभिमतः, न त्वत्र दर्शितः शुद्धोपयोगपरिणामः ।

**नाश्यते**- तदधिकरणक्षणत्व-तत्पूर्वाधिकरणक्षणत्वान्यतरव्याप्यसत्ताको भवति । तेनाऽविद्यानाशस्याऽखण्डाकारवृत्त्योत्पादाभ्युपगमे तेनैव सद्वयत्वं ब्रह्मणः स्यादिति वेदान्त्यभिमतब्रह्मवादसङ्गमनमत्र नैश्चयिकविचारे न स्यादित्युक्तेर्नाऽवकाशः । अविद्यानिवृत्त्यतिरिक्तद्वैतविगमेनैवाऽद्वैतं ब्रह्मवादिनोऽभिमतमित्यतिरिक्ताविद्यानिवृत्तेर्भावेऽपि न ब्रह्मवादहानिरित्याश्रयणे तु नाश्यते इत्यस्य नाशप्रतियोगिताश्रयो भवतीत्यर्थकरणेऽपि न क्षतिः ।

ननु परिणामपरिणामिनोरभेदान्नाशकतयाऽभिमतो विकल्पोऽपि मायैव कथं स्वनाशकः ? नहि स्वस्य स्वनाशकत्वं क्वचिद् दृष्टमित्यत आह - **अवस्थान्तरभेदेने**ति । विचित्रशक्तिर्हि माया । सैकेनाऽवस्थालक्षणशक्तिस्वरूपेण स्वस्वरूपं विस्तारयति, नानास्वरूपवती भवति । तच्च स्वरूपमतिमलीमसत्वान्महामोहप्रागल्भ्यविजृम्भितमेवेति ततो विस्तृतैव माया भवति । अन्येन चाऽतिविशुद्धेन परिशोधितचित्तसमुद्गतेनाऽवस्थान्तरलक्षणशक्तिस्वरूपेण स्वस्वरूपं सङ्कोचयति- सर्वथा विलीनं भवति । एतदेवाऽन्यतोऽस्या वैलक्षण्यं, यतः स्वत एवाऽऽविर्भवति, स्वत एव च विनश्यति स्वस्मिन् । अस्य च ब्रह्मणो निर्विकारतया सर्वदाऽवस्थिततत्वेन तदुत्पादकत्वनाशकत्वासम्भवात् । ब्रह्मव्यतिरिक्तस्य च सर्वस्य मायिकत्वेन मायात्वमेव । तत्र कस्याऽपि तन्नाशकत्वे मायैव मायानाशकृदित्यकामेनाऽप्यभ्युपगतमेव स्यादित्यभिसन्धिः ।

अवस्थान्तरभेदेन मायाया मायानाशकत्वं योगवासिष्ठादौ परेणाऽप्युररीकृतमिति दर्शयति - **परैरपी**ति ॥२.५२॥

परवचनात्मकमेव पद्यत्रयं योगवासिष्ठगतमुपनिबध्नाति —

**"अविद्ययैवोत्तमया, स्वात्मनाशोद्यमोत्थया[१] ।**
**विद्या सम्प्राप्यते राम!, सर्वदोषापहारिणी ॥२.५३॥**

**शाम्यति ह्यस्त्रमस्त्रेण, मलेन क्षाल्यते मलः ।**
**शमं विषं विषेणैति, रिपुणा हन्यते रिपुः ॥२.५४॥**

**ईदृशी[२] भूतमायेयं, या स्वनाशेन हर्षदा ।**
**न लक्ष्यते स्वभावोऽस्याः, प्रेक्ष्यमाणैव नश्यति" ॥२.५५॥** [४.४१.१३-१५]

तत्र प्रथमे - हे राम! स्वात्मनाशोद्यमोत्थयोत्तमयाऽविद्ययैव सर्वदोषापहारिणी विद्या सम्प्राप्यते इत्यन्वयः । माया-ऽविद्ययोरेकत्वान्मायया मायानाशेऽविद्ययाऽविद्यानाश इति प्रतिपादकवचनस्य संवादित्वं स्यादेवेति बोध्यम् ।

न चाऽत्र पद्ये मायाव्यतिरिक्तैवाऽविद्याऽभिलाप्येति शङ्कनीयम् । "ईदृशी भूतमायेय"मिति तृतीयपद्ये मायापदेन पूर्वोपदर्शिताविद्याया एवाऽऽम्रेडनात् ।

स्वात्मनाशोद्यमश्चाऽविद्यायाः शमदमादिचित्तशोधनद्वारा श्रवणमननिदिध्यासनलक्षणसहकारिसम्पादनं, **तदुत्थया**- तज्जन्यया, **उत्तमया**- शुद्धचैतन्यलक्षणनिर्विकल्पकब्रह्मविषयकत्वलक्षणोत्तमत्ववत्या, **अविद्यया**- अविद्यापरिणामत्वेनाऽविद्यारूपया शुद्धचैतन्याकारवृत्त्या, **विद्या**- शुद्धचैतन्यस्वरूपं ब्रह्मैव सम्प्राप्यते ।

---

१. "०द्यमेच्छया विद्या सा प्राप्यते राम" - यो.वा.-४.४१.१३ । २. "०शी राम! माये०" - यो.वा.-४.४१.१५ ।

तद्गोचरीभवनमेव तत्प्राप्तिः । ब्रह्म च पूर्वमपि सत्तया प्राप्तमेव । तथाऽप्यखण्डाकारवृत्त्यवच्छिन्न-चैतन्यलक्षणा विद्याऽपि स्वोपाधिभूतवृत्तेर्मायाजन्यत्वतो मायाजन्या भवति । तत्त्वेन मायापरीणामत्वान्मायाऽपि सा । सा च **सर्वदोषापहारिणी** । विद्ययाऽविद्याया निवृत्तौ तदुपादानकानां कामक्रोधादिदोषाणां मूलत एवोच्छेदादतो युक्तमस्याः सर्वदोषापहारकत्वमिति ॥२.५३॥

पूर्वोत्तराविद्यावस्थयोर्भेदेऽप्याविद्यकत्वेन साजात्यं समस्ति । सजातीयस्य सजातीयनाशकत्वमन्यत्राऽपि समस्ति । तावन्मात्रेणेयमपि कल्पना नाऽदृष्टचरी । साजात्ये च भेदो नाऽन्तर्भावनीय इति स्वस्याऽपि स्वसजातीयत्वं सम्भवत्येव । तेन चरमवृत्तेः स्वनाशकत्वेऽपि कथञ्चिदुपदर्शितदृष्टान्तसंवादितं भवतीत्याशयेनाऽऽह –

**शाम्यती**ति । **अस्त्रं** नागास्त्राऽऽग्नेयास्त्रादिक**मस्त्रेण** गारुडवारुणाद्यस्त्रेण **शाम्यति**- विनश्यति । तेषामस्त्रत्वसामान्येन सजातीयत्वात् ।

**मलेनो**खरभूविकारभूतमृत्तिकाविशेषेण, **मलो**- वस्त्राद्यत्यन्तसंयोगम्मापन्नो मालिन्यापादको रजोविशेषः, **क्षाल्यते**- दूरीक्रियते । तयोरपि भूविकारत्वेन मलत्वेन साजात्यात् ।

**विषं**- सर्पादिदंशप्रभवं देहाद्यङ्गप्रत्यङ्गव्यापि गरलं, **विषेण**- शोधितविषविशेषादिना, **शमं**- विनाश**मेति**- प्राप्नोति, अत्राऽपि विषत्वेन साजात्यमस्ति ।

**रिपुणा**- शत्रुणा, **रिपुः**- प्रतिपक्षभूतो जन्तुः, **हन्यते**- वियोजितप्राणः क्रियते । तयोरपि रिपुत्वेन सजातीयत्वं समस्ति ॥२.५४॥

दृष्टान्ते सर्वत्र प्रतिपक्षभाव एव विनाश्यविनाशकतया सम्प्रतिपन्नयोः संजातीयत्वे सत्यपि शक्ति-विशेषसहकारेणाऽभीष्टविनाशनिमित्तभावमाकलयति । दार्ष्टान्तिके च माया स्वविनाशमेव स्वोपाध्यवच्छिन्नस्य चैतन्यस्य स्वात्मकोपाधिविगमतः स्वकृतविकारजालात्यन्तोन्मूलनतः स्वरूपावस्थानलक्षणानन्दसुखाविर्भाव-कत्वेनेष्टमाकलयन्ती स्वात्मानमेव विनाशयति । न चित्रमत्राऽघटितघटनापटीयस्यां मायायामित्याह – **ईदृशी**ति ।

'हर्षद' इति पाठे, मदुपदिश्यमानवचनशुश्रूषाप्रवणचित्तत्वेनोपदिष्टाखिलपदार्थयथार्थज्ञानवत्त्वस्य स्वात्मन्याविष्करणेन तत्प्रभवविनयादिमत्त्वेन चाऽत्राऽधिकारिणि योग्ये ममोपदेशः सर्वथा साफल्यमञ्चतीति ज्ञानजन्यस्याऽऽनन्दस्य प्रदानात् हे हर्षद!- राम! ।

**येयं** सर्वव्यापकत्वात् पुरः परिदृश्यमानेन **भूतमाया**- भूतसमष्ट्युपादानभूता माया । भूतपदं भौतिकादेरप्युपलक्षणम् । **स्वनाशेन**- स्वनाशोत्पादनेन, **ईदृशी**- दृष्टान्तदृष्टस्वसजातीयनाशकत्वलक्षण-सम्पन्ना । साजात्ये भेदाप्रवेशात् स्वस्मिन्नपि स्वसजातीयत्वं समस्तीत्युक्तमेव ।

**अस्या**- मायायाः, **स्वभावो**ऽनिर्वचनीयकार्यार्जकत्वादिलक्षण आवरणविक्षेपशक्त्यादिरूपो वा, **न लक्ष्यते**- न स्पष्टं प्रतिभासते । यत इयं **प्रेक्ष्यमाणैव**- अधिष्ठानभूतचैतन्यभिन्नतयाऽवलोक्यमानैव, **नश्यति**- स्वविरोधिस्वपरिणामस्वरूपाखण्डाकारवृत्तितो निवृत्तिमुपयातीत्यर्थः ।

**हर्षदा** इति पाठस्तु शोभनः । तत्रेयं भूतमाया ईदृशी- वक्ष्यमाणस्वरूपतयाऽन्येभ्यः सर्वेभ्य उक्तदृष्टान्तेभ्यश्च विलक्षणा । यतो या स्वनाशेन हर्षदा- शुद्धचैतन्यस्वरूपस्य ब्रह्मणः स्वरूपविश्रान्तिलक्षणसुखप्रदा । न ह्येवम्भूतो लोके कोऽपि परोपकारकः समस्ति, यः स्वनाशेनाऽन्यस्य हर्षदो भवेदित्यर्थः । अन्यत् सर्वं पूर्ववद् व्याख्येयम् ॥२.५५॥

सद्विकल्पैर्व्रतादिभिः कामादिविकारलक्षणमलापनयनतश्चित्तशोधनं प्रतिज्ञातमधिकृत्याऽऽह —

**व्रतादिः शुभसङ्कल्पो, निर्नाश्याऽशुभवासनाम् ।**
**दाह्यं विनैव दहनः, स्वयमेव विनङ्क्ष्यति ॥२.५६॥**

**व्रतादिः शुभसङ्कल्पोऽशुभवासनां निर्नाश्य** स्वयमेव विनक्ष्यति । यथा **दहनो** दाह्यं- सञ्चितकाष्ठादि भस्मसात् कृत्य **दाह्यं विनैव**- दाह्यस्याऽन्यस्याऽभावात्, **स्वयमेव विनंक्ष्यति**- विनाशप्रतियोगी भवति ।

उत्पन्नस्याऽग्नेः प्रतिक्षणं सक्रियतयाऽवयवानां संयोगविनाशादेव विनाशः । अन्यस्याऽग्नेर्दाह्यस्वरूप-सत्ताधीनसत्तावतामवयवानामेवाऽनुत्पत्त्या तद्विलक्षणसंयोगानारम्भादेव । तथा प्रकृतेऽप्यशुभवासनापनयनार्थमेव शुभसङ्कल्पादरस्तदभावे तस्याऽप्यपूर्वस्याऽनारम्भादारब्धस्य च तस्य स्वविनाश्यविनाशनेन निष्पन्नप्रयोजनतया यावन्नियमितावस्थानं प्रपूर्य ततः परमवस्थानस्वभावाभावादेव विनाश इति ॥२.५६॥

यत एव स्वत एव शुभसङ्कल्पो विनश्यति, तत एव तन्नाशार्थं न प्रयत्नविशेषो नाऽपि तज्जनिता काचिच्चेष्टाऽपि योगिनामुपयोगिनी । यतस्तद्विनाशार्थमप्यपरः प्रयत्नविशेषः चेष्टाविशेषो वाऽऽदरणीयः, एवं तन्नाशार्थमपीत्येवमनवस्थाकदर्थनया स्वस्वरूपाविर्भावः कदाऽपि न सम्पद्यते इति प्रसङ्गः स्यादित्याह—

**इयं नैश्चयिकी शक्ति-र्न प्रवृत्तिर्न वा क्रिया ।**
**शुभसङ्कल्पनाशार्थं, योगिनामुपयुज्यते ॥२.५७॥**

स्वत एव विनाशजननलक्षणा **शक्तिः**- शुभसङ्कल्पगतसामर्थ्यं, **नैश्चयिकी**- निश्चयनयनिर्णीता[१] । अत एव व्यवहारेणाऽत्राऽन्यथाभावो न शङ्कनीयः, अन्यनयविषयेऽन्यनयस्य कुण्ठत्वात् ।

ततः किमित्याह- **न प्रवृत्तिरिति** । **शुभसङ्कल्पनाशार्थ**मित्यस्याऽत्राऽन्वयः, **क्रिया**यामपि । शुभ-सङ्कल्पनाशार्थमान्तरप्रयासात्मिका प्रवृत्तिर्योगिनां नोपयुज्यते । तथा बाह्यशुभाचरणादिचेष्टालक्षणा क्रियाऽपि नोययुज्यते इत्यर्थः ॥२.५७॥

न केवलं शुभसङ्कल्परूपव्रतादेरेव विनाशः । अपित्ववस्थाविशेषे क्षमादिगुणानामपि विनाश इत्याह —

**द्वितीयापूर्वकरणे, क्षायोपशमिका गुणाः ।**
**क्षमाद्या अपि यास्यन्ति, स्थास्यन्ति क्षायिकाः परम् ॥२.५८॥**

---

१. वृत्त्यन्तरे शुभोपयोगनाशकत्वसामर्थ्यवती योगिनामात्मगता नैश्चयिकी शक्तिरङ्गीकृता । तच्चिन्त्यम् । शुभोपयोगस्य स्वत एव विनाशस्याऽनन्तरश्लोके एव प्रतिपादितत्वात् ।

**यास्यन्ति**- शममेष्यन्ति । एवं तर्हि सर्वगुणविनाशे निर्गुणस्य द्रव्यस्य स्वरूपावस्थानासम्भवाच्छून्यत्वमेव माध्यमिकसम्मतं मुक्तिः प्राप्नोतीत्यत आह - **स्थास्यन्ति क्षायिकाः पर**मिति । **परं**- केवलं घातिकर्मचतुष्टयात्यन्तविनाशाविर्भूतानि ज्ञानदर्शनचारित्रवीर्याणि तदानीमप्यवतिष्ठन्ते इत्यर्थः ॥२.५८॥

**इत्थं यथाबलमनुद्यममुद्यमं च, कुर्वन् दशानुगुणमुत्तममान्तरार्थे ।**
**चिन्मात्रनिर्भरनिवेशितपक्षपातः, प्रातर्द्युरत्नमिव दीप्तिमुपैति योगी ॥२.५९॥**

**इत्थ**मिति । उक्तप्रकारेणेत्यर्थः । **यथाबलं**- स्वशक्तिमनतिक्रम्य, **आन्तरार्थे**- अन्तःस्थितज्ञानादिविषये, **दशानुगुणं**- यस्यां दशायां यदयोग्यं यच्च योग्यं तद्विषयम्, **उत्तमं**- परममुक्तेः साक्षात् परम्परया वा प्रयोजकम्, **अनुद्यमम्**- अयोग्यविषयकप्रयत्नपरिहरणम्, **उद्यमं च**- योग्यविषयकप्रयत्नं च **कुर्वन् योगी**- प्रकृतत्वाद् ज्ञानयोगी, कीदृशः ? **चिन्मात्रनिर्भरनिवेशितपक्षपातः** सन्, चिन्मात्रे- शुद्धचैतन्यमात्रस्वरूपे आत्मनि निर्भरमत्यर्थं निवेशितो- विषयतया सन्निधायितः पक्षपातः- स्वाग्रहो येन स तथा, एवम्भूतः सन् **प्रातर्द्युरत्नमिव**- प्रभातकालीनसूर्य इव, यथा प्रातःकालीनः सूर्यः क्रमेण प्रकृष्टतेजोरूपां दीप्तिमुपैति तथा **दीप्तिं**- विशदालोकस्वभावां ज्ञानदीप्ति**मुपैती**त्यर्थः ॥२.५९॥

सम्यग्बाह्याभ्यन्तरस्वरूपज्ञानवतो योगिनो बाह्येऽपि प्रवृत्तिर्ज्ञानस्वरूपदृष्ट्यैव । तावता चैतन्यस्वरूपे तस्य प्रवृत्तिर्न व्याहता, चिन्मात्रस्वरूपाभ्यासस्य सातत्येन स्वभावत एव निरन्तरतत्प्रवृत्तेः समुल्लासात् । चिन्मात्रपक्षपातरहितस्य तु व्यवहारमार्गाभ्यसनशीलस्य गुर्वाज्ञानिष्ठस्याऽपि शुद्धचैतन्यस्वरूपावधानलक्षणा प्रवृत्तिर्व्याहतैवेत्याह -

**अभ्यस्यतु प्रविततं व्यवहारमार्गं, प्रज्ञापनीय इह सद्गुरुवाक्यनिष्ठः ।**
**चिद्दर्पणप्रतिफलत्त्रिजगद्विवर्त्ते, वर्तेत किं पुनरसौ सहजात्मरूपे ॥२.६०॥**

**इह**- ज्ञानविचारे, **प्रज्ञापनीयः**- प्रज्ञापनायाः सदुपदेशलक्षणाया विनयादिगुणसम्पन्नत्वाद् योग्योऽन्तेवासी, **सद्गुरु**रप्रतारकत्वादिगुणसम्पन्नो हितोपदेशकः, तस्य **वाक्यं**- विहिताचरणनिषिद्धानाचरणादिप्रतिपादकवचोनिकुरम्बं, तस्मि**न्निष्ठा**- आस्था यस्य स सद्गुरुवाक्यनिष्ठः । एवम्भूतः सन् **प्रविततं**- बहुविषयकरम्बितत्वाददतिविस्तीर्णं **व्यवहारमार्गं**- सम्यग्व्यवहारमाधातुमलं व्यवहारोपबृंहणप्रवणं क्रियाद्यनुष्ठानम्, **अभ्यस्यतु**- यथावसरं स्वशक्तिमनतिक्रम्य भूयः करोतु ।

**असौ**- व्यवहारमार्गाभ्यासावष्टब्धचित्तः प्रज्ञापनीयः, **पुनः**- चिन्मात्राभ्यासराहित्यात् पूर्वोक्तयोगिविलक्षणः, त्वर्थे विद्यमानस्य पुनःशब्दस्याऽन्यवैलक्षण्यावबोधकत्वात्, चिद्दर्पणप्रतिफलत्त्रिजगद्विवर्ते सहजात्मरूपे किं वर्तेत ? काकूक्त्या न वर्तेतैवेत्यर्थः ।

**चिदि**त्यादि । चित् स्वस्वरूपं चैतन्यं, तदेव स्वच्छतया प्रतिबिम्बग्राहकत्वाद् दर्पणं, तत्र प्रतिफलन्- प्रतिबिम्बभावमास्कन्दन् त्रिजगद्विवर्तः- त्रयाणां जगतां परिणामो यस्य तच्चिद्दर्पणप्रतिफलत्त्रिजगद्विवर्तम् । तस्मिन् **सहजात्मरूपे**- स्वाभाविकात्मस्वरूपे चैतन्ये, **किं वर्तेत**- किं परिनिष्ठितो भवेत् ? अपितु व्यवहारमार्गप्रतिकूलतया न तत्राऽऽस्थां विदधीतेति सम्मुखीनोऽर्थः ।

अथवा योगिन एव लोकानुवृत्त्या व्यवहारपथस्थितस्य सहजात्मरूपव्यवस्थितिप्रदर्शनपरमिदं पद्यम् । तथाहि - **तु**- पुन**रिह**- अस्यां लोकयात्रायां, **प्रज्ञापनीयः**- स्वतो ज्ञानवानपि 'गुरुमुखश्रवणेन स्वागतस्यैवाऽर्थस्याऽवगमे दृढं प्रामाण्यं भवती'ति कृत्वाऽन्तेवासितामात्मनि वरामाश्रयन् प्रज्ञापनायोग्यः, **सद्गुरुवाक्यनिष्ठः**- सद्गुरुवाक्यश्रद्धः सन्, **प्रविततं व्यवहारमार्गमभ्यस्य**- स्वानुभूतमेव तं पुनः पुनर्गुरुवाक्यतोऽवधार्य, "चित्प्रतिबिम्बितमेव बाह्यव्यवहारजातमौपाधिकमस्तु मम, नाऽतो मदीयस्य स्वाभाविकस्य चैतन्यस्वरूपस्य बिम्बप्रतिबिम्बभावकल्पनापेतस्य काचिदपि हानि"रिति बुद्ध्या **चिद्दर्पणप्रतिफलत्त्रिजगद्विवर्ते वर्तेत** । तत्राऽप्यस्य बिम्बतया प्रधानभूते चैतन्ये वर्तनमस्त्येव । यस्य च योगिनो यथाकथञ्चिच्चैतन्यसम्बन्धेनेष्टत्वप्रतिसन्धानत एवम्भूतं वर्तनम्, **असौ पुनः सहजात्मरूपे**- चैतन्ये वर्तेतेति **किम् ?,** किमत्र वक्तव्यम् ? तत्तु कैमुतिकन्यायप्राप्तमेवेति[१] ॥२.६०॥

एतावता निश्चयनयोपग्रहेण 'बाह्यं तत्त्वं नाऽस्त्याभ्यन्तरमेव तत्त्व'मित्येवं वस्तुतत्त्वं न व्यवस्थाप्यते । यतः प्रमाणनयाभ्यामुभयविधस्याऽपि वस्तुतत्त्वस्याऽनाकुलमेवोज्जृम्भमाणत्वात् । किन्तु शुद्धचैतन्यमात्रस्वरूपात्मपरिभावनतः किमप्यनिर्वचनीयं शमस्वरूपं स्वरूपविश्रान्तिलक्षणसुखमभिमुखं भवतीत्येतदर्थमभिनिवेशोऽत्राऽस्माकमित्यावेदयितुमाह —

**भवतु किमपि तत्त्वं बाह्यमाभ्यन्तरं वा, हृदि वितरति साम्यं निर्मलश्चिद्विचारः[२] ।**
**तदिह निचितपञ्चाचारसञ्चारचारु-स्फुरितपरमभावे पक्षपातोऽधिको नः ॥२.६१॥**

**किमपि** स्याद्वादैकप्रमाणगम्यत्वादन्यतन्त्रानाकलितं, **वाकारः** समुच्चये, **बाह्यमाभ्यन्तरं** च **तत्त्वं भवतु** । नहि प्रमाणसिद्धस्याऽर्थस्य स्वानिष्टिमात्रेणाऽपलपनं शक्यम् । एवञ्च बाह्यस्याऽनेकविधस्याऽर्थस्याऽऽभ्यन्तरस्याऽपि च बहुविधस्याऽर्थस्य सद्भावे चैतन्यमात्रस्वरूपात्मविचारे एव किमर्थमधिकृतो भवानित्यपेक्षायामाह -

**हृदीति** । **हृदि**- अन्तःकरणे, **निर्मलो**- दोषगणसम्पर्कशून्यः, **चिद्विचारः**- चैतन्यमात्रस्वरूपात्मपर्यालोचनम् । **साम्यं**- समतां सर्वजीवानां स्वरूपतोऽभिन्नत्वं तदवगमजन्य-परावस्कन्दप्रभवदुःखभया-ऽत्यन्तापगमसमुत्थशान्तिसुखं **वितरति**- दत्ते । आस्तां तथाविधात्मस्वरूपाविर्भावः । तदाकलनसाम्मुख्यमात्रेणाऽपि कृतार्थमिव भवति चित्तम् ।

**तत्**- तस्मात् कारणात्, **इह**- अस्मिन्, अस्यैव विशेषत उपदर्शनं - **निचितपञ्चाचारसञ्चारचारु-स्फुरितपरमभावे** इति । निचितः- नितरामतिशयेन विधिपूर्वकानुष्ठानादिना चितः- चयमुपचयं समृद्धिमितः प्राप्तः एवम्भूतो यः पञ्चाचारसञ्चारः- पञ्चाचारस्याऽऽचरणं, तेन चारु- समीचीनं स्फुरितं- स्फुरणं प्रकाशनं यस्य स निचितपञ्चाचारसञ्चारचारुस्फुरितः, एवम्भूतो यः परमभावः, परा- उत्कृष्टा शमसुखप्रदा मा- लक्ष्मीर्यस्य स परमः, भावः- आत्मनश्चैतन्यस्वरूपो भावनाज्ञानेनाऽनवरतं भाव्यमानत्वात् सर्वावस्थासु

---

१. वृत्त्यन्तरे 'सहजात्मरूपे किं पुनः- कथमपि- अकथनीयरूपेण वर्तेत' इत्यर्थः प्रदर्शितः । तात्पर्यं तु समानमेव । २. वृत्त्यन्तरे "निर्मलश्चेद् विचारः" इति पाठं स्वीकृत्य तदनुसारं भावार्थः प्रदर्शितः ।

सत्तालक्षणभावनाशीलत्वाच्च भावस्तत्र निचितपञ्चाचारसञ्चारचारुस्फुरितपरमभावे, **नः**- अस्माकं ज्ञानयोगाभिमुखानां मुमुक्षूणां स्याद्वादिनाम्, **अधिकः**- अन्यभावपक्षपातापेक्षया विशिष्टः, तेनाऽन्यत्राऽपि स्याद्वादसिद्धेऽर्थे पक्षपातोऽस्त्येव, अन्यथैकान्तवादिता स्यादिति ध्वनितं, पक्षपातोऽभिनिवेशः । स च परम्परया मुक्त्युपयोगित्वान्न दुराग्रहो, नाऽपि माध्यस्थ्यपरिपन्थीति बोध्यम् ॥२.६१॥

ननु निश्चयनयस्य शुद्धसङ्ग्रहरूपतया परसामान्या-ऽवान्तरसामान्यविशेष-परामर्शरूपनैगमनयादल्पविषयत्वेन नैगमनयाद् बहुविषयादनेकस्वरूपतयाऽऽत्मनो मननस्य सम्भवे, तत्रैव ज्ञानयोगिना निर्भरो विधेयस्तत एव च सिद्धिसौधाध्यासनं सम्पत्स्यते इति निश्चयनयाश्रयणेनाऽऽत्मस्वरूपविभावनमात्मनः सङ्कुचितापादनं न युक्तमित्यत आह –

**स्फुटमपरमभावे नैगमस्तारतम्यं, प्रवदतु न तु हृष्येत् तावता ज्ञानयोगी ।**
**कलितपरमभावं चिच्चमत्कारसारं, सकलनयविशुद्धं चित्तमेकं प्रमाणम् ॥२.६२॥**

पञ्चौपाधिकं कादाचित्कं शमसुखविहीनं तद्भावनिकुरम्बमपि अपरमेव । तथाविधे**ऽपरमभावे तारतम्य**मेतद्भावापेक्षयाऽयं भाव उत्कृष्ट एतदपेक्षया चाऽयमुत्कृष्टोऽयं चाऽऽत्मन औपशमिक आत्मनो भावोऽयं च क्षायोपशमिक एतदपेक्षया क्षायिकोऽयमुत्कृष्ट एवमेतद्भावनया सालोक्यावाप्तिः[१], एतद्भावनया च सामीप्यावाप्तिरेतद्भावनया च सारूप्यावाप्तिरित्थंभावनया च सायुज्यमित्यादिप्रकारेण तारतम्यं नैगमः प्रवदतु ।

**तावता**- अनल्पस्वरूपतयाऽऽत्मस्वरूपमननेन नैगमप्रभावितेन **ज्ञानयोगी न तु हृष्येत्** । न ह्यारोपितस्वरूपबाहुल्यसमुत्थापित-विचारबाहुल्यतश्चित्तस्य स्वरूपविश्रान्तिलक्षणसुखसाम्मुख्यं मनागप्युपजायते । याचितानल्पालङ्कारव्याप्तविग्रहाऽपि कामिनी आपाततोऽन्यदृष्टिसुखभाजनाऽपि स्वयं तद्भारोद्वहनप्रभवदुःखभागिन्येव । न हि स्वयं दुर्भगाया आभरणकदम्बसम्पर्कसमुद्भावितमौपाधिकं सौन्दर्यं सौन्दर्यतया समाकलयन्ति लौकिका अपीति याचिताभरणकल्पं दुर्भगाभरणकल्पं वा नैगमोत्प्रेक्षितमपरमभावकदम्बकमात्मनः पश्यन् ज्ञानयोगी नाऽऽनन्दभाग् भवतीत्यर्थः ।

तर्ह्यात्मनश्चैतन्यमात्रस्वरूपमप्यवलम्ब्य कथमस्याऽऽनन्दसमुल्लासो येन तत्पक्षपात्ययं स्यादित्यतस्तत्र वैशिष्ट्यमुपदर्शयति - **कलितपरमभाव**मिति । अनेन विशेषणेन चैतन्यस्वरूपलक्षणस्याऽनौपाधिकत्वमाविष्कृतम् । कलितः- स्वस्वरूपतयाऽवस्थापितः परमभाव- उपदर्शितनिर्वचनो येन तत् तथेति । **चिच्चमत्कारसार**मिति । अनेन च दुःखमात्रयाऽप्यसंस्पृष्टत्वादत्यन्तोपादेयत्वमाविष्कृतम् । चित्- चैतन्यं, तदेवाऽऽनन्दस्वरूपत्वाच्चमत्कारस्तत्सारं- तत्प्रधानम् । नाऽत्र मात्रयाऽपि चैतन्यव्यतिरिक्तस्य कस्यचित् कालस्थायित्वेनाऽऽत्यन्तिकावस्थानविकलस्य सम्पर्कः ।

**सकलनयविशुद्ध**मित्यनेन नाऽत्र कस्याऽपि विवादः, चार्वाकोऽपि च चैतन्ययोगमुपगम्यैव भूतसमष्टिपरिणामविशेषे शरीरात्मकभूते आत्मत्वमुपगच्छतीति प्रकटितम् । सकला नया यत्र स्याद्वादे स सकलनयः,

---

१. सालोक्याव्याप्त्यादयः क्रमशो वर्धमानाः शुभावस्थाः परदर्शनसत्काः ।

तेन विशुद्धं- दोषसम्पर्कलक्षणाशुद्धिविगमतः सर्वथा परिशुद्धम् । एवंविधार्थपरिकल्पनायां कथञ्चिदर्थानुप्रवेशोऽप्यत्राऽऽवेदितो भवति ।

**चित्तं**- चैतन्य**मेकम्**- उपाधिविकलं, **प्रमाणं**- स्वतःप्रकाशरूपत्वात् स्वप्रकाशे प्रमाणान्तरानपेक्षत्वात् प्रमाणम् । प्रामाण्यमप्यस्य स्वत एव गृह्यते, नाऽतः प्रामाण्यमप्यस्याऽन्येन प्रमाणेन व्यवस्थाप्यमत इदमेव ज्ञानयोगी प्राप्य हृष्यतीति भावः ॥२.६२॥

अन्यनयाप्रधृष्यत्वं निश्चयनयस्योपदर्शयन्नेव तन्नयावलम्बिनो ज्ञानयोगिनः प्रेक्षापूर्वकारित्वं सूचयति —

**हरिरपरनयानां गर्जितैः कुञ्जराणां,**
**सहजविपिनसुप्तो निश्चयो नो बिभेति ।**
**अपि तु भवति लीलोज्जृम्भिजृम्भोन्मुखेऽस्मिन्,**
**गलितमदभरास्ते नोच्छ्वसन्त्येव भीताः ॥२.६३॥**

**अपरनयानां कुञ्जराणां**- हस्तिनां **गर्जितैः सहजविपिनसुप्तः**- स्वाभाविकचैतन्यात्मस्वरूपरूपविश्रान्तिस्थानवनालम्बनोपजाता-ऽऽयासवैमुख्यलक्षणस्वापाकलितो **निश्चयो हरिः**- निश्चयनयात्मा सिंहो **नो बिभेति** । यथा वनप्रसुप्तस्य सिंहस्य न हस्तिगर्जितैस्त्रासः, तथा निश्चयनयस्य नाऽन्यनयकल्पनासहस्रेणाऽपि स्वविषयेऽप्रामाण्यमित्युपनयः ।.

**अपि तु**- किन्तु [१] **लीलोज्जृम्भिजृम्भोन्मुखेऽस्मिन्**- निश्चयसिंहे **भवति**- सति **गलितमदभरास्ते**- अपरनयात्मकहस्तिनो **भीताः** सन्तो **नोच्छ्वसन्त्येव**ति । प्रकृते लीला ऊहापोहसङ्घटितप्रमाणोपदर्शनं, तयोज्जृम्भिणी- प्रकाशमाना, जृम्भा- आत्मस्वरूपविचारणात्मिका जृम्भा, तदुन्मुखे- तत्परे इत्यर्थः । व्यक्तमन्यत् ॥२.६३॥

शुद्धचैतन्यस्वरूपात्मभावनापवित्रितचित्तस्य ज्ञानयोगिनो न किमप्यन्यत् करणीयं विद्यते इत्युपदर्शयति —

**कलितविविधबाह्यव्यापिकोलाहलौघ-**
**व्युपरमपरमार्थे भावनापावनानाम् ।**
**क्वचन किमपि शोच्यं नाऽस्ति नैवाऽस्ति मोच्यं,**
**न च किमपि विधेयं नैव गेयं न देयम् ॥२.६४॥**

भावनापावनानामित्यत्रैकदेशभावनायां कलितेत्यादेरन्वये [२] समासानिविष्टपदार्थसाकाङ्क्षतालक्षणासामर्थ्यतः 'समर्थः पदविधि'रिति लक्षणापेक्षितसामर्थ्याभावान्न समाससम्भव इति नाऽऽशङ्कनीयम् । भावनाया विषयनिरूप्यत्वान्नित्यसापेक्षत्वेन 'भवति वै नित्यसापेक्षेऽपि समास' इत्यनेन समासस्याऽनुमतत्वात् । अथवा भावनापावनानां कलितविविधबाह्यव्यापिकोलाहलौघव्युपरमपरमार्थे सति इत्येवमन्वयः । यद्वा

---

१. क्रीडया विलासिनी या जृम्भा तया व्यात्ताननै । २. एतादृशपरमार्थविषयिणी या भावना तया पावनानामिति तात्पर्यपक्षे ।

उक्तपरमार्थे सति पावनानां भावना इत्थम्भूता समुल्लसति, तदुपदर्शनपरः क्वचनेत्यादिः । **कलितः**- प्राप्तो **विविधबाह्यव्यापिकोलाहलौघव्युपरमो**[१] येन स तथा । तादृशो यः **परमार्थः** शुद्धचैतन्यलक्षणस्तस्मिन्निति कलितादेरर्थः ।

**क्वचने**त्यादि । **क्वचन**- कुत्राऽपि वस्तुनि **किमपि** मरणेष्टवियोगादिकं **शोच्यं नाऽस्ति**- शोचनीयं न भवति । इष्टत्वानिष्टत्वप्रयोजकरागद्वेषादेः परौपाधिकत्वेन स्वाभाविकत्वाभावान्मोहादेरपि ममतानिबन्धनस्याऽपारमार्थिकत्वात् तन्निबन्धनस्य पुत्रकलत्रादीष्टसम्प्रयोगप्रभवसुखादेरनिष्टविप्रयोगनिबन्धन-सुखादेश्चाऽतात्त्विकत्वात् तदुच्छेदेऽपीष्टवियोगाऽनिष्टसंयोगाभ्यां शुद्धचैतन्यलक्षणस्याऽऽत्मनो न किञ्चिदपचीयते इति शोकस्याऽभावादेव शोच्यं नाऽस्ति ।

तथा स्वभावतो दुःखाभावे दुःखनिदानमपि किमपि नाऽस्तीति **मोच्यं**- परिहरणीयमपि नाऽस्ति । स्वस्वरूपावाप्तिलक्षणानाबाधसुखसम्मुखस्य बाह्यविषयोपभोगादिजनितसुखनिःस्पृहत्वादेव च किमपि **विधेयं**- परलोकसुखफलमनुष्ठेयं न च समस्ति । तावतैव कृतकृत्यस्य स्तुत्यादिप्रसादितदेवाद्युपनीतफलप्रार्थनाभावादेव **गेयं**- स्तव्यं नैव समस्ति । दानफलानाकाङ्क्षणात् स्वस्वरूपचैतन्यव्यतिरिक्ते स्वस्वत्वाभावाच्च किमपि **देयं**- दातुं योग्यमपि नाऽस्तीत्यर्थः ॥२.६४॥

यश्चैवंविधः कोऽपि पुरुषधौरेयस्तस्याऽवदाता कीर्तिः सकललोकव्यापिनीति ज्ञानयोगिनं स्तुवन् ज्ञानयोगनिरूपणसमाप्तिमुपदर्शयति —

**इति सुपरिणताऽऽत्मख्यातिचातुर्यकेलि-**
**र्भवति यतिपतिर्यश्चिद्भरोद्भासिवीर्यः ।**
**हर-हिमकर-हार-स्फारमन्दार-गङ्गा-**
**रजतकलशशुभ्रा स्यात् तदीया यशःश्रीः ॥२.६५॥**

**इति**शब्दो ज्ञानयोगनिरूपणसमाप्तौ अनन्तरोपदर्शितयावद्विचारस्वरूपपरिग्रहे च । तथा चैवंप्रकारात्म-स्वरूपैकतानविचारेण **सुपरिणता**- मोक्षसुखसमास्वादफलोन्मुखत्वेन परिपक्वतामिता, **आत्मख्यातौ**- आत्मस्वरूपपरिज्ञाने **चातुर्यं**- नैपुण्यं, तदेव **केलि**रात्मख्यातिचातुर्यकेलिर्यस्य स सुपरिणतात्मख्याति-चातुर्यकेलिः ।

तथा **चिद्भरोद्भासिवीर्यः,** चित्- चैतन्यं, तत्र भरः- निर्भरस्तत्प्राधान्यं चैतन्यस्वरूपेऽत्यन्तसन्निवेशित-पक्षपातत्वं, तेनोद्भासि- प्रकाशमानं वीर्यं यस्य स तथा, एवम्भूतो **यो यतिपतिर्भवति, तदीया**- तत्सम्बन्धिनी **यशःश्रीः**- कीर्तिलक्ष्मीः **हरहिमकरहारस्फारमन्दारगङ्गारजतकलशशुभ्रा** स्यात् । हरहिमकरादीनामत्यन्तशुभ्रत्वेन तदुपमिताया यशःश्रियोऽत्यन्तावदातत्वं प्रकटितं भवतीति ॥२.६५॥

**॥ इति ज्ञानयोगशुद्धिनामा द्वितीयोऽधिकारः ॥**

---

१. वृत्त्यन्तरेऽत्र "०बाह्यख्यातिलोला०" इति पाठः स्वीकृतः । अर्थस्त्वेवं दर्शितः - "अनुभूते नानाप्रकारौ-दयिकयशःकीर्त्यादिसंक्षोभसमूहविश्रामे परमार्थे सति" ।

# ३

## क्रियायोगशुद्धिनामाऽधिकारः

न केवलं ज्ञानयोगमात्रेण मुक्तिः, ज्ञानिनोऽपि क्रियामन्तरेण मुक्तेरनिष्पत्तेः । यथा हि ज्ञानस्याऽन्वयव्यतिरेकाभ्यां मुक्तिं प्रति साधनत्वं गृह्यते तथा क्रियाया अपि । अन्वयव्यतिरेकयोरुभयत्र साम्येऽपि ताभ्यां ज्ञानस्यैव मुक्तिं प्रति साधनत्वं गृह्यते, न क्रियाया इत्यस्य शपथप्रत्यायनीयत्वादतः क्रियायोगनिरुपणायोपक्रमते –

**यान्येव साधनान्यादौ, गृह्णीयाज्ज्ञानसाधकः ।**
**सिद्धयोगस्य तान्येव, लक्षणानि स्वभावतः ॥३.१॥**

**ज्ञानसाधकः**- पूर्वोक्तज्ञानस्वरूपसिद्ध्युत्पादनप्रवणः, **आदौ**- ज्ञानसिद्ध्युत्पत्तेः पूर्वं, **यान्येव साधनानि**- चित्तविशोधकोपायानि स्वाध्यायाभ्यसनादीनि, **गृह्णीयात्**- उपाददीत । तेषु साधनेषु शमदमादयोऽपि प्रविष्टाः । क्रियाऽपि सर्वाऽऽवश्यकी सन्निविष्टा । मनोगतकामादिसर्वभावपरिहरणमात्मस्वरूपमात्रे एव सन्तोषाभ्यसनं, दुःखेष्वागतेषु तत्साधनेषु चाऽनुद्विग्नभावेन वर्तनं, सुखेषु प्राप्तेषु तत्साधनेषु च समुत्सर्पत्सु स्पृहानाविष्करणं, रागभयक्रोधसाधनेषु समागतेष्वप्यवहेलनं, शुभाशुभयोरुपनिपातेऽपि स्वस्वभावाप्रच्यवनमित्यादिका सर्वा अपि क्रिया ज्ञानसिद्ध्युपायसन्निविष्टा एव ।

ज्ञानसिद्ध्या सिद्धयोगदशामुपागतस्य **सिद्धयोगस्य तानि** साधनानि **स्वभावतो**[1] **लक्षणान्येव** । पूर्वमसिद्धाया ज्ञानस्वरूपसिद्धेर्निष्पत्तये तानि भवन्ति । सिद्धयोगावस्थायां च सिद्धस्य ज्ञानयोगस्य स्थैर्यार्थमेव तानीति ज्ञानिनोऽपि विहितक्रियाचरणं निषिद्धक्रियानाचरणं च स्वभावत एव प्रतिबद्धम् । अतो यत्र तानि न स्युः, स 'सिद्धयोग' इत्येवमपि ज्ञानविषयो न स्यादित्याशयः ॥३.१॥

उक्तार्थे आदराधानाय सम्मतिमुपनिबध्नाति –

**अत एव जगौ यात्रां, सत्तपोनियमादिषु ।**
**यतनां सोमिलप्रश्ने, भगवान् स्वस्य निश्चिताम्**[2] **॥३.२॥**

यत एव ज्ञानसिद्ध्युत्पादकान्येव सिद्धयोगस्य लक्षणानि, **अतः**- अस्मात् कारणादेवेत्यर्थः । **सोमिलप्रश्ने**- सोमिलेन प्रश्ने कृते सति तदुत्तरं वितरीतुं, **भगवान्**- श्रीवर्धमानस्वामी सिद्धयोगः, स्वस्य **निश्चिताम्**- अवश्यकर्तव्यां **सत्तपोनियमादिषु यतनां**- तदाचरणप्रवृत्तिं **यात्रां**- शिष्टाचारमार्गगमनलक्षणां **जगौ**- उक्तवान् ।

१. स्वभावतः- विनैवोपदेशस्मरणादिकं मोहविलयानुविद्धाद् दृढसंस्कारात् । २. भगवतीसूत्रम् - १८.१०.६४२.

स्वस्य कृतकृत्यतया तदाचरणतः प्रयोजनविशेषस्याऽऽत्मगतस्याऽऽप्रतिलम्भेऽपि, तदनाचरणे 'भगवता श्रीमहावीरेणैतन्नाऽऽचरितमतस्तन्मार्गानुसारिभिरस्माभिरप्यननुष्ठेयमेवैत'दिति व्यामोहतः शिष्यप्रशिष्यपरम्पराया-मुत्सन्नाचरणमेवाऽऽश्यकक्रियाकदम्बकं प्रसज्येतेत्येवमालोचयन् भगवान् **महावीरो** जगौ । ततो युक्तं ज्ञानसिद्धिनिबन्धनानां सिद्धयोगलक्षणत्वमिति ॥३.२॥

अमुमर्थं परसम्मत्याऽपि द्रढयति –

**अतश्चैव स्थितप्रज्ञ-भावसाधन-लक्षणे ।**
**अन्यूना-ऽभ्यधिके प्रोक्ते, योगदृष्ट्या परैरपि ॥३.३॥**

**अतश्चैवेति** । अस्मात् कारणादेवेत्यर्थः । **स्थितप्रज्ञभावसाधनलक्षणे** इति । स्थितप्रज्ञस्य भाव-साधनम्- उत्पत्तिजनकं लक्षणं- स्थितप्रज्ञस्वरूपावधारणचिह्नमेतदुभयमित्यर्थः । **अन्यूनाभ्यधिके** इति । न्यूनं चाऽभ्यधिकं च न्यूनाभ्यधिके, न न्यूनाभ्यधिके अन्यूनाभ्यधिके, समे इत्यर्थः । यदेव स्थितप्रज्ञस्य भावसाधनं, तदेव स्थितप्रज्ञस्य लक्षणम् । व्यक्त्या भिन्नत्वेऽपि जात्यैकत्वमेवेत्यर्थः । **योगदृष्ट्या**- योगस्वरूपनिरूपणसमाश्रयणेन । **परैः**- तीर्थान्तरीयैरपि, न त्वस्मदादिभिरेवेत्यर्थः । **प्रोक्ते** इति –

"स्थितप्रज्ञस्य का भाषा, समाधिस्थस्य केशव! ।
स्थितधीः किं प्रभाषेत, किमासीत व्रजेत किम् ? ॥

प्रजहाति यदा कामान्, सर्वान् पार्थ! मनोगतान् ।
आत्मन्येवाऽऽत्मना तुष्टः, स्थितप्रज्ञस्तदोच्यते ॥

दुःखेष्वनुद्विग्नमनाः, सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः, स्थितधीर्मुनिरुच्यते ॥

यः सर्वत्राऽनभिस्नेह-स्तत् तत् प्राप्य शुभाशुभम् ।
नाऽभिनन्दति न द्वेष्टि, तस्य प्रज्ञा प्रतिष्ठिता ॥

यदा संहरते चाऽयं, कूर्मोऽङ्गानीव सर्वतः ।
इन्द्रियाणीन्द्रियार्थेभ्य-स्तस्य प्रज्ञा प्रतिष्ठिता ॥" [भगवद्गीता - २.५४-५८]

इत्यादिवचनैरुपदर्शित इत्यर्थः ॥३.३॥

यतश्च सिद्धयोगस्य ज्ञानिनः पूर्वावस्थायामिव तदानीमपि सम्यक्क्रियाचरणं स्वभावतो लक्षणमेव, ततस्तादृशक्रियाचरणाभावेऽज्ञानिनः सकाशात् तस्य व्यावृत्तिरपि दुर्घटा स्यादित्याह –

**नाऽज्ञानिनो विशेष्येत, यथेच्छाचरणे पुनः ।**
**ज्ञानी स्वलक्षणाभावात्, तथा चोक्तं परैरपि ॥३.४॥**

**ज्ञानी** सिद्धयोगो **यथेच्छाचरणे**- पेयापेय-भक्ष्याभक्ष्य-गम्यागम्यादि-विहित-निषिद्धविभागपरित्यागेन स्वेच्छयोन्मत्तवच्छास्त्रमर्यादामुल्लङ्घ्यैव स्वच्छन्दाचरणे यदि प्रवृत्तः स्यात्, तदा पुनः **स्वलक्षणस्य**

व्यावर्तकस्याऽ**भावादज्ञानिनो न विशेष्येत**- न व्यावर्त्येत । अतः सिद्धयोगस्याऽपि शास्त्रमर्यादामनुल्लङ्घ्य सम्यक्क्रियापरिपालनमेव न्याय्यम् ।

एतदन्येषामपि सम्मतमित्याह - **तथा चोक्तं परैरपी**ति । तथा च- तेन प्रकारेण च परैरपि- उत्तरमीमांसानिष्णातैः पञ्चदशीकृद्भिरपि उक्तं- प्रतिपादितम् ॥३.४॥

तद्वचनमुपदर्शयति –

**"बुद्धाद्वैतस्वतत्त्वस्य, यथेच्छाचरणं यदि ।**
**शूनां तत्त्वदृशां चैव, को भेदोऽशुचिभक्षणे?" ॥३.५॥** [पञ्चदशी - ४.५५]

**बुद्धाद्वैतस्वतत्त्वस्ये**ति । ज्ञानाद्वैतस्वरूपात्मतत्त्वस्य ज्ञानिन इत्यर्थः । **यथेच्छाचरणं**- भक्ष्याभक्ष्यादिशास्त्रोक्तनियमोल्लङ्घनेन यथाकाममभक्ष्यभक्षणाद्याचरणं **यदि**; तदा **शुनां**- कुक्कुराणां **तत्त्वदृशाम**शुचिभक्षणेऽविशिष्टे सति को भेदः ? न किञ्चिदपि वैलक्षण्यम् । केवलं शास्त्रमर्यादोच्छेदकृत्त्वेन चाण्डालादिवदस्पृश्यत्वमेव ततस्तस्याऽऽपतितमिति ॥३.५॥

नन्विदं भक्ष्यं शास्त्रविहितत्वादिदमभक्ष्यं शास्त्रनिषिद्धत्वादित्यादिभेदकल्पनपरायणा बुद्धिर्द्वैतदृशां भवति, तद्बुद्धिपूर्विका प्रवृत्तिस्तेषामेव । अद्वैतदर्शिनां तूक्तबुद्धेरभावात् तानुद्दिश्य शास्त्रस्याऽपि विहितनिषिद्धबोधकतयाऽप्रवृत्तेः । अतस्तत्र ज्ञानिन्यबुद्धिपूर्विका- उक्तबुद्ध्यनधीना वृत्तिः- प्रवृत्तिर्न दुष्टेति चेदाह –

**अबुद्धिपूर्विका वृत्ति-र्न दुष्टा तत्र यद्यपि ।**
**तथापि योगजादृष्ट-महिम्ना सा न सम्भवेत् ॥३.६॥**

विधिनिषेधशास्त्रस्याऽधिकारिणं प्रति प्रवृत्तेस्तस्य[१] चाऽनधिकृतत्वाद् **यद्यपि अबुद्धिपूर्विका प्रवृत्तिर्न दुष्टा, तथापि**- तादृशाचरणे दोषाभावे सत्यपि, **योगजादृष्टमहिम्ना**- योगाभ्यासजनितधर्ममाहात्म्येन **सा**- यथेच्छाचरणात्मिकाऽबुद्धिपूर्विका वृत्ति**र्न सम्भवेत्**, तथाचरणे योगजादृष्टस्यैव प्रतिबन्धकत्वम् । एवमपि सम्यक्क्रियाराधनमेव तस्य कान्तमिति भावः ॥३.६॥

यादृशं ज्ञानिनश्चित्तमेवं सति भवति तदुपदर्शयति –

**निवृत्तमशुभाचारा-च्छुभाचारप्रवृत्तिमत् ।**
**स्याद् वा चित्तमुदासीनं, सामायिकवतो मुनेः ॥३.७॥**

**निवृत्तमशुभाचारा**दिति । अशुभाचारगोचरनिवृत्तिमत् अशुभाचारगोचरप्रवृत्तिपराङ्मुखमिति यावत् । तच्च निश्चेष्टमपि स्यादित्यत आह - **शुभाचारप्रवृत्तिम**दिति ।

**वा**- अथवा, **सामायिकवतः**- सार्वकालिकसामायिकनियमवतो **मुने**र्ज्ञानि**नश्चित्तमुदासीनम्** । 'इष्टं भवतु मा वा, इदं कर्तव्यं व्यवहारपरिरक्षणार्थम्, अनिष्टं भवतु मा वा, इदं न कर्तव्यमेव व्यवहारविरुद्धत्वा'दित्येतावन्मात्रपरं माध्यस्थ्यकरम्बितं सर्वथा सामायिकनियतत्वाच्च नाऽन्यत् कर्तव्यमस्य भवतीति तच्चित्तमुदासीनम् । सामायिकस्याऽपि क्रियात्वेन क्रियायोगस्तावताऽपि समस्त्येवेति भावः ॥३.७॥

---

१. ज्ञानिनः ।

त्रिभिः पद्यैः परस्य शङ्कामुत्थापयति –

**विधयश्च निषेधाश्च, नन्वज्ञाननियन्त्रिताः ।**
**[१]बालस्यैवाऽऽगमे प्रोक्तो, नोद्देशः पश्यकस्य यत् ॥३.८॥**

**नन्विति** प्रश्ने । **आगमे**- जैनराद्धान्ते । **बालस्यैव**- ज्ञानावस्थाविकलस्यैव । ज्ञानावस्थावैकल्यमेवाऽत्र बालत्वं, तेन वयोवृद्धस्याऽप्युक्तज्ञानवैकल्ये बालत्वमेव, बालस्याऽपि चोक्तज्ञानपरिणतौ नोक्तबालत्वमिति बोध्यम् । ***अज्ञाननियन्त्रिता***- *अज्ञानरूपाधिकारमासाद्य प्रवृत्ता,* ***विधयश्च***- *विधायकवचनानि,* **निषेधाश्च**- निषेधवचनानि, भवन्तीति क्रियाऽध्याहार्या ।

**यद्**- यस्मात्, **पश्यकस्य**- ज्ञानिनो **नोद्देशः प्रोक्तः** । ज्ञानिनमुद्देश्य न विधिनिषेधवाक्यमुक्तम्, तस्य विधिनिषेधानधिकारित्वादित्यर्थः ॥३.८॥

अनवगतार्थज्ञापनाय च शास्त्रं प्रवर्तते, सिद्धयोगस्य तु सर्वमवगतमेवेति न तत्र शास्त्रव्यापारः साफल्यमञ्चतीत्याशयेनाऽऽह –

**न च [२]सामर्थ्ययोगस्य, युक्तं शास्त्रं नियामकम् ।**
**कल्पातीतस्य मर्यादा-ऽप्यस्ति न ज्ञानिनः क्वचित् ॥३.९॥**

**सामर्थ्ययोगस्य नियामकं शास्त्रं न च युक्तम्** । नियमो हि 'इदमेव कर्तव्यमिदं च न कर्तव्यमस्मिन् कालेऽस्मिन् देशेऽस्यां चाऽवस्थाया'मित्यादिमर्यादारूप एव । ज्ञानिनस्तु मर्यादाया एवाऽभावान्नियम-स्वरूपाप्रतिलम्भान्नियामकं कथं शास्त्रं स्यादित्याह - **कल्पातीतस्ये**ति जिनकल्पस्थविरकल्पादि-भेदभ्राजिष्णुकल्पसामान्यातीतस्य **ज्ञानिनः क्वचित्**- क्वचिदप्यर्थे **मर्यादाऽपि** 'इत्थं वर्तितव्यमित्थं न वर्तितव्य'मिति नियमोऽपि **नाऽस्तीत्यर्थः** ॥३.९॥

अकिञ्चित्करत्वादपि तस्य क्रिया न युक्तेत्याह –

**भावस्य सिद्ध्यसिद्धिभ्यां, यच्चाऽकिञ्चित्करी क्रिया ।**
**ज्ञानमेव क्रियामुक्तं, राजयोगस्तदिष्यताम् ॥३.१०॥**

**यच्चेत्यत्र** चकारो वाकारार्थकः । तथा च **वा**- अथवा **भावस्य**- सम्यग्ज्ञानस्य **सिद्ध्यसिद्धिभ्या**-मिति । सम्यग्ज्ञानं यद्यस्ति तदा तत एव निर्वाणस्य सम्भवादनर्थिका क्रिया । सम्यक्क्रियाया एव मुक्तिसाधनतयाऽभ्युपगन्तव्यतया क्रियायां सम्यक्त्वस्य सम्यग्ज्ञानसाहचर्येणैव सम्भवेन सम्यग्ज्ञानाभावे विद्यमानाया अपि क्रियायाः सम्यक्क्रियात्वाभावेन मुक्तिं प्रत्यनङ्गत्वात् । सम्यग्ज्ञानभावे तु तत एव मुक्तिसम्भवे समीचीनाऽपि क्रियाऽन्यथासिद्धैवेत्युभयथाऽप्यकिञ्चित्करी क्रिया । **तत्**- तस्मात् **क्रियामुक्तं ज्ञानमेव राजयोग इष्यताम्** ॥३.१०॥

---

**१.** "उद्देसो पासगस्स नत्थि, बाले पुण निहे...." (-आचा० १.२.३.८२) । **२.** सामर्थ्ययोगस्वरूपावगमनार्थं दृश्यताम् योग०समु० - का. ५ । **३.** सर्वेषां योगानामुत्तमो राजयोगः ।

सिद्धान्ती समाधत्ते –

**मैवं नाऽकेवली पश्यो, नाऽपूर्वकरणं विना ।**
**धर्मसंन्यासयोगी चे-त्यन्यस्य नियता क्रिया ॥३.११॥**

**एवम्**- उक्तप्रकारकं प्रश्नवचनं **मा**, 'अ-मा-नो-ना प्रतिषेधवचना' इति कोषात्, न सम्भवतीति । यत इति दृश्यम् । यस्माद**केवली**- केवलिभिन्नः कोऽपि पुरुषः **पश्यः**- पश्यको **न**- न भवतीत्यर्थः । तथा चाऽऽगमे "पश्यकस्योद्देशो ने"ति यदुक्तं तदस्माकमप्यनुमतमेव । सिद्धयोगस्तु तत्पूर्वावस्थो ज्ञानी न केवलीति तस्याऽऽगमे उद्देशः स्यादेवेति विधिनिषेधयोर्भाजनमयमपि स्यादेव ।

"कल्पातीतस्य मर्यादा नाऽऽस्ती"ति यदुक्तं तदप्यपूर्वकरणानन्तरं धर्मसंन्यासयोगिनं प्रत्येव कल्पातीतत्वाद् घटते । **अपूर्वकरणं विना**- अपूर्वकरणमन्तरेण ज्ञानी **धर्मसंन्यासयोगी न** भवति, नाऽतः स कल्पातीतः । इति हेतोः **अन्यस्य**- केवलि-धर्मसंन्यासयोगिभिन्नस्य ज्ञानिनः क्रिया नियतैवेति ॥३.११॥

भावस्य सिद्ध्यसिद्धिभ्यां क्रियाया अकिञ्चित्करत्वं यदुक्तं तत्प्रतिविधानायाऽऽह –

**स्थैर्याधानाय सिद्धस्या-ऽसिद्धस्याऽऽनयनाय च ।**
**भावस्यैव क्रिया शान्त-चित्तानामुपयुज्यते ॥३.१२॥**

**सिद्धस्य** भावस्य **स्थैर्याधानाय, च**- पुनः **असिद्धस्य** भावस्याऽऽनयनाय **शान्तचित्तानां क्रियोपयुज्यते एवे**त्यन्वयः । अर्थस्तु व्यक्त एव ॥३.१२॥

क्रियामुक्तस्य केवलस्य ज्ञानस्य राजयोगत्वं यदुक्तं तदपि तस्य फलासम्पादकत्वेन न सम्भवतीति सदृष्टान्तमुपदर्शयति –

**क्रियाविरहितं हन्त!, ज्ञानमात्रमनर्थकम् ।**
**गतिं विना पथज्ञोऽपि, नाऽऽप्नोति पुरमीप्सितम् ॥३.१३॥**

**हन्ते**ति खेदे । अहो मोहमाहात्म्यं ज्ञानवादिनो भवतो यल्लोकप्रतीतं पश्यन्नपि न पश्यतीति भवदज्ञानविजृम्भणं दृष्ट्वा परोपकारप्रणिहितमनसामस्माकं खेदो जायते इत्याशयः ।

**क्रियाविरहितं ज्ञानमात्रमनर्थकम्** । यतः **पथज्ञोऽपि** 'गन्तव्यस्येष्टपुरस्य गमनेऽयं मार्ग' इत्येवं जानन्नपि **गतिं विना**- उत्तरदेशसंयोगानुकूलक्रियां विना **ईप्सितं**- गन्तव्यतया स्वाभीष्टं **पुरं**- ग्रामं **नाऽऽप्नोति**- न प्राप्नोति ॥३.१३॥

ज्ञानपूर्णस्य क्रियाऽपेक्षणं दृष्टान्तान्तरेण समर्थयति –

**स्वानुकूलां[१] क्रियां काले, ज्ञानपूर्णोऽप्यपेक्षते ।**
**प्रदीपः स्वप्रकाशोऽपि, तैलपूर्त्यादिकं यथा ॥३.१४॥**

---

१. स्वानुकूलां- स्वोचितभूमिकानुरूपाम् । स्वप्रकाशोऽपि- स्वकीयप्रकाशनक्रियायामन्यानपेक्षोऽपि ।

ज्ञानपूर्णोऽपि काले स्वानुकूलां क्रियामपेक्षते । यथा स्वप्रकाशोऽपि प्रदीपः स्वानुकूलतया तैलपूर्त्यादिकमपेक्षते इत्यन्वयः । अर्थस्तु व्यक्त एव ॥३.१४॥

क्रियाया बाह्यत्वेन बहिरङ्गतया न मुक्त्यर्थिनामुपादेयत्वं, किन्तु ज्ञानस्यैवाऽऽन्तरत्वेनाऽन्तरङ्गतया मुक्तिसाधनत्वेनोपादेयत्वमित्येवं मतिमास्थाय ये क्रियां प्रतिक्षिपन्ति तानुपहसति –

**बाह्यभावं पुरस्कृत्य, येऽक्रिया व्यवहारतः ।**
**वदने कवलक्षेपं, विना ते तृप्तिकाङ्क्षिणः ॥३.१५॥**

क्रियाया बाह्यत्वं **पुरस्कृत्य**- स्वीकृत्य ये वादिनो **व्यवहारतो**- व्यवहारदृष्टितो**ऽक्रियाः**- क्रियाविकला[1], निश्चयनयतस्तु आन्तरप्रयत्नविशेषलक्षणक्रियासद्भावात् सक्रिया एव तेऽपि । तेऽक्रियावादिनो **वदने**- मुखे **कवलक्षेपं**- हस्तोपगृहीतबदरामलकादिसदृश-पिण्डितभक्तादेः **क्षेपं**- प्रवेशनं विना **तृप्तिकाङ्क्षिणः**- तृप्त्यभिलाषिणः । यथा कवलक्षेपं विना तृप्त्यभिलाषिणो लोकस्योपहसनीयतामास्कन्दन्ति तथाऽक्रियावादिनोऽपि क्रियामन्तरेण मुक्त्यभिलाषिणः परीक्षकस्योपहसनीया भवन्तीति ॥३.१५॥

उत्पन्नस्य भावस्याऽपतनलक्षणरक्षणप्रवणत्वेनाऽनुत्पन्नस्य च भावस्योत्पादकत्वेन क्रियाविशेषोऽपि युज्यते इति पुनर्द्रढयति –

**गुणवद्बहुमानादे-र्नित्यस्मृत्या च सत्क्रिया ।**
**जातं न पातयेद् भाव-मजातं जनयेदपि ॥३.१६॥**

**गुणवतां**- जिनेश्वरादीनां **बहुमानादितो**, **नित्यस्मृत्या**- सततं तदनुस्मरणेन च, **सत्क्रिया**- जिनगणधराद्युक्तागमार्थाचरणाभ्यसनादिलक्षणा क्रिया, **जातम्**- उत्पन्नं **भावं** सम्यक्त्वादिलक्षणं **न पातयेद्**- न विनाशयेद्, तदाचरणतस्तस्य दृढीभवनात् । **अजातम्**- अनुत्पन्नमभिनवं भावं **जनयेदपि**- अलब्धसत्त्वस्य सत्त्वं सम्पादयेदपि । अत उभयथाऽप्यस्या उपयोग इत्यर्थः ॥३.१६॥

ननु 'जातो भावो न नश्येते'ति नियमेनाऽपार्थकं तद्रक्षणार्थं सत्क्रियानुष्ठानमिति मतिः कस्यचित् स्यात्, तदपोहाय क्षायिकभावस्य पतनासम्भवेऽपि, क्षायोपशमिकस्य पतनसम्भवेन नोक्तनियम इति पतितभावस्य पुनर्विवृद्ध्यर्थमस्खलनार्थं च सत्क्रियानुष्ठानमावश्यकमित्यावेदयति –

**क्षायोपशमिके भावे, या क्रिया क्रियते तया ।**
**पतितस्याऽपि तद्भाव-प्रवृद्धिर्जायते पुनः ॥३.१७॥**

छद्मस्थानां **क्षायोपशमिके भावे** सतीत्यर्थः । **या क्रिया** सम्यगाराधनादिका, **क्रियते**- आचर्यते । **पतितस्याऽपि**- प्रच्युतभावस्याऽपि **तद्भावप्रवृद्धिः**- प्रच्युतभावोपचयस्तया क्रियया **पुनर्जायते**- भवति ॥३.१७॥

**गुणवृद्ध्यै ततः कुर्यात्, क्रियामस्खलनाय वा ।**
**एकं तु संयमस्थानं, जिनानामवतिष्ठते ॥३.१८॥**

---

१. सद्धर्माचारशून्याः ।

**ततः**- तस्मात् कारणात्, **गुणवृद्ध्यै क्रियां कुर्यात्** । **वा**- अथवाऽ**स्खलनाय**- उत्पन्नक्षायोपशमिकभावापतनाय क्रियां कुर्यादिति सम्बन्धः । यतो **जिनानामेकं**- केवलं **संयमस्थानमवतिष्ठते**- क्षायिकत्वेन कदाचिदपि न प्रतिपतति । अन्यूनाधिकस्वभावतया सर्वदाऽवतिष्ठते एवेत्यर्थः । अतस्तद्भिन्नैरजिनैः प्राप्तसंयमस्थानवृद्ध्यादिकृतेऽवश्यं सत्क्रियायोग आदरणीय इत्याशयः ॥३.१८॥

क्रियातो ज्ञानस्याऽज्ञाननाशकत्वेन विशेषोऽक्रियावादिनोऽभिमतस्तत्र स्वानुमत्युपदर्शनायोपदर्श्यते –

**अज्ञाननाशकत्वेन, ननु ज्ञानं विशिष्यते ।**
**न हि रज्जावहिभ्रान्ति-र्गमनेन निवर्तते ॥३.१९॥**

**नन्वि**त्यक्रियावादिनः प्रश्नस्वरूपोपदर्शने । **अज्ञाननाशकत्वेन**- साक्षान्नाश्यनाशकभावलक्षणविरोधेन ज्ञानस्यैवाऽज्ञाननाशकत्वेन, **ज्ञानं विशिष्यते**- क्रियातो वैशिष्ट्यभाग् भवति ।

क्रियाया अज्ञाननिवर्तकत्वं नाऽस्तीति दृष्टान्तोद्भावनेन प्रकटयति – **नही**ति । **हि**- यतो **रज्जावहिभ्रान्तिः**- सर्पबुद्धिर्मण्डूकवशाञ्जितलोचनस्य **गमनेन**- तद्देशगमनेनाऽपि **न निवर्तते** ।

यद्दोषजनिता भ्रान्तिस्तद्दोषापनयनेन सम्यग्ज्ञानोत्पत्तौ सत्यामेव निवर्तते सा । तेन कस्यचिद् दूरत्वदोषतः समुज्जातायां रज्जावहिभ्रान्तौ तस्यास्तद्देशगमनेन समीपतापादनतो दूरत्वदोषापनयनेन निवृत्तावपि, तत्र दूरत्वदोषापनयने एव गमनक्रियाया व्यापारः, भ्रान्त्यपगमस्तु रज्जौ रज्जुबुद्धिलक्षणसम्यग्बुद्ध्यैवेति ध्येयम् ॥३.१९॥

अक्रियावाद्युक्तमभ्युपेत्य समाधत्ते –

**सत्यं क्रियाऽऽगमप्रोक्ता, ज्ञानिनोऽप्युपयुज्यते ।**
**सञ्चितादृष्टनाशार्थं, नासूरोऽपि[१] यदभ्यधात् ॥३.२०॥**

यथा भवतोक्तं तथा **सत्यमेव** । नैतावता क्रियाया वैफल्यम् । तस्या अज्ञाननिवृत्त्यसाधनत्वेऽपि सञ्चितादृष्टनाशकत्वेनोपयोगादित्याह – **आगमप्रोक्ते**ति । आगमविहितेत्यर्थः । **क्रिया**- सम्यक्क्रिया **ज्ञानिनो**- अवाप्तज्ञानस्या**ऽपि** । एतेनाऽप्राप्तज्ञानस्य चित्तशोधनद्वारा ज्ञानजनने क्रियाया उपयोगोऽवश्यमेवेति सूचितम् । **उपयुज्यते**- उपयोगिनी । किमर्थमित्यपेक्षायामाह – **सञ्चितादृष्टनाशार्थ**मिति ।

अत्र परसम्मतिमुपनिबध्नाति – **नासूरोऽपि यदभ्यधा**दिति । **नासूर**नामा कश्चिद् योगविदग्रणी, **यद्**- यस्माद्, **अभ्यधाद्**- उक्तवान् ॥३.२०॥

नासूरवचनमुट्टङ्कयति –

**"तण्डुलस्य यथा वर्म[२], यथा ताम्रस्य कालिका ।**
**नश्यति क्रियया पुत्र!, पुरुषस्य तथा मलम् ॥३.२१॥**

---

१. क्वचित् "०नाशार्थमासुरो" इति पाठः । तत्राऽऽसुरनामा महर्षिर्बोध्यः । २. क्वचित् "चर्मे"ति पाठः ।

**यथा तण्डुलस्य वर्म**- तण्डुलोपरिव्यवस्थितमसारभूतं त्वग् मर्दनताडनादिकया **क्रियया नश्यति**- दूरीभवति, वितुषस्तण्डुलः सम्पद्यते । **यथा ताम्रस्य**- धातुविशेषस्य **कालिका**- कृष्णता, क्रियया- अग्निसन्तापनमृद्घर्षणादिलक्षणया, नश्यतीति पूर्ववत् । हे **पुत्र!, तथा**- तेन क्रियाविशेषाचरणलक्षणप्रकारेण **पुरुषस्य**- जीवस्य **मलम**विद्यालक्षणं, नश्यतीति क्रियासम्बन्धः ॥३.२१॥

ननु जीवोऽनादिकालीनेनाऽविद्यालक्षणेन मलेन सम्बद्धस्तस्याऽपनयनं दुःशकमित्यत आह –

**जीवस्य तण्डुलस्येव, मलं सहजमप्यलम् ।**
**नश्यत्येव न सन्देह-स्तस्मादुद्यमवान् भव" ॥३.२२॥**

**तण्डुलस्य** तुषलक्षणं **मलं सहजमप्यलम्**- अत्यर्थं **नश्यत्येव** । तथा **जीवस्य** सहजमप्यविद्यामलमत्यर्थं नश्यत्येव । **न सन्देहो**- दृष्टानुसारिकल्पनविषयेऽस्मिन्नर्थे मनागपि सन्देहो नाऽस्त्येव । **तस्माद**सन्दिग्धत्वादात्ममलापनयनार्थ**मुद्यमवान्**- यत्नवान् त्वं भव ॥३.२२॥

ननु सञ्चितादृष्टनाशार्थं ज्ञानिनः क्रियोपयुक्तेत्यत्र नासूरवचनं संवादकतयोपदर्शितम् । परमत्राऽविद्यामलापनयनं प्रतीयते क्रियया, नाऽदृष्टापनयनमिति कथं संवादनमित्यत आह –

**[१]अविद्या च दिदृक्षा च, भवबीजं च वासना ।**
**सहजं च मलं चेति, पर्यायाः कर्मणः स्मृताः ॥३.२३॥**

कर्मैवाऽविद्यादिशब्दैर्गीयते । पर्याया एव अविद्यादिशब्दा इति युक्तमेव संवादनम् । पदार्थस्तु व्यक्त एव ॥३.२३॥

ननु "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन!"[भ.गी. ४.३७] इत्यादिवचनाज्ज्ञानिनो ज्ञानेनैव निखिलकर्मणि विनष्टे रिक्तमिदमुच्यते "सञ्चितादृष्टनाशार्थं क्रियोपयोग" इत्यत आह –

**ज्ञानिनो नाऽस्त्यदृष्टं चेद्, भस्मसात्कृतकर्मणः ।**
**शरीरपातः किं न स्या-ज्जीवनादृष्टनाशतः ॥३.२४॥**

**भस्मसात्कृतकर्मणो ज्ञानिनोऽदृष्टं नाऽस्तीति** यदि, तदा **जीवनादृष्टनाशत**- आयुःकर्मनाशात् **शरीरपातः किं न स्यात् ?** शरीरस्थितिनिबन्धनस्याऽऽयुष्कर्मणो नाशाज्ज्ञानिनः शरीरपातः स्यान्न चैवमभ्युपगम्यते भवतेत्याशयः ॥३.२४॥

अत्र परकीयाकूतमाशङ्क्य प्रतिक्षिपति –

**शरीरमीश्वरस्येव, विदुषोऽप्यवतिष्ठते ।**
**अन्यादृष्टवशेनेति, कश्चिदाह तदक्षमम् ॥३.२५॥**

---

१. भ्रान्तिरूपाऽविद्या वेदान्तमते, पुरुषस्य प्रकृतिविकारान् द्रष्टुमिच्छारूपा दिदृक्षा साङ्ख्यमते, भवबीजं संसारकारणरूपं शैवमते, अनादिक्लेशरूपा वासना सौगतमते, सहजं मलं योगदर्शने । अद्रष्ट-मायादिका अपि कर्मण एव पर्यायाः ।

नित्यज्ञानेच्छायत्नवत ईश्वरस्य प्रथमत एव जीवकक्षाविनिर्गतस्य स्वतोऽदृष्टं नाऽस्त्येव । एवमपि तस्य शरीरधारणं परानुग्रहार्थं दृश्यते । गृह्णाति चेश्वरोऽप्यन्तराऽन्तरा शरीरमिति । प्रमाणं चाऽत्र —

"यदा यदा हि धर्मस्य, ग्लानिर्भवति भारत! ।
अभ्युत्थानमधर्मस्य, तदाऽऽत्मानं सृजाम्यहम् ॥

परित्राणाय साधूनां, विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय, सम्भवामि युगे युगे ॥" [भ.गी.-४.७,८] इत्यादि वचनम् ।

कार्यमात्रं प्रत्यदृष्टस्य कारणत्वेनाऽदृष्टमन्तरेणेश्वरस्याऽपि शरीरं न सम्भवतीति यथा तदीश्वरशरीरेण यस्य जीवस्य सुखं यस्य जीवस्य च दुःखं परम्परया सम्पद्यते, तत्तज्जीवादृष्टवशेनेश्वरशरीरं भवति अवतिष्ठते च, सुखदुःखाद्युपभोगपरिपूर्त्यनन्तरं च जीवादृष्टनाशान्नश्यति चेति अन्यादृष्टवशेनेश्वरस्य शरीरमवतिष्ठते तथा **विदुषोऽपि**- ज्ञानिनोऽपि स्वीयनिखिलकर्मक्षयेऽ**प्यन्यादृष्टवशेन शरीरमवतिष्ठते इति कश्चिदाह तदक्षमम्**- अयुक्तमित्यर्थः ॥३.२५॥

तदयुक्तत्वोपपादनायाऽऽह —

**शरीरं विदुषः शिष्या-द्यदृष्टाद् यदि तिष्ठति ।**
**तदाऽसुहृददृष्टेन, न नश्येदिति का प्रमा ? ॥३.२६॥**

**यदि शिष्याद्यदृष्टाद् विदुषः शरीरं तिष्ठति, तदाऽसुहृददृष्टेन**- स्वशत्रुपुरुषादृष्टेन विदुषः शरीरं **न नश्येदिति का प्रमा**- कोऽत्र निर्णयः ? यथा शिष्यस्योपदेशदानादिजन्यफलसम्पादकतया तददृष्टवशाद् ज्ञानिनः शरीरमवतिष्ठते; तथा 'शत्रोस्तच्छरीरावस्थानेन दुःखं मा प्रसाङ्क्षी'दित्येतदर्थं शत्रुगतदुःखप्रतिबन्धकादृष्टवशेन ज्ञानिनः शरीरनाशोऽपि स्यात् । तदैवाऽवतिष्ठेत, तदैव च नश्येदित्यसमञ्जसमेव भवत्कल्पनया प्रसंक्तमिति भावः ॥३.२६॥

ज्ञानिनो ज्ञानेन सकलादृष्टनाशेऽप्यदृष्टस्थानीयाविद्यारूपोपादानाभावेऽप्युपादेयस्य ज्ञानिशरीरस्य कियत्कालावस्थानं न दुर्घटम् । यथा न्यायमते उपादाननाशजन्योपादेयनाशस्थले उपादाननाशोत्पत्तिकाले निरुपादानकस्यैवोपादेयस्याऽवस्थानम् । यथा च निरुपादानकमेकक्षणावस्थानमदुष्टं, तथा निरुपादानकं कियत्कालावस्थानमपि न दोषावहमित्याशयेन परः शङ्कते —

**न[१] चोपादाननाशेऽपि, क्षणं कार्यं यथेष्यते ।**
**तार्किकैः स्थितिमत् तद्व-च्चिरं विद्वत्तनुस्थितिः ॥३.२७॥**

यथा **तार्किकैः**- नैयायिकै**रुपादाननाशेऽपि**- [२]समवायिकारणनाशेऽपि, **क्षणम्**- उपादाननाशोत्पत्तिक्षणमात्रं, **कार्यं**- समवायिकार्यं **स्थितिमदिष्यते । तद्वत्**- तथा **चिरं**- ज्ञानोत्पत्त्यनन्तरक्षणादारभ्याऽऽशरीर-

१. उपादाने विनष्टेऽपि, क्षणं कार्यं प्रतीक्षते ।
इत्याहुस्तार्किकास्तद्वदस्माकं किं न सम्भवेत् ? ॥ पञ्चदशी - ६.५४

२. न्यायमते उपादेयरूपं कार्यं स्वावयवेषु तन्नामोपादानकारणे समवायाभिधेन सम्बन्धेन तिष्ठति, अत उपादानं तन्मते समवायिकारणं प्रोच्यते ।

पाताव्यवहितपूर्वकालं यावद् यावत् क्षणप्रचयं तावत् क्षणप्रचयम्, उपादानभूताविद्याविवर्त-कर्मप्रचयविनाशेऽपि **विद्वत्तनुस्थितिः**- ज्ञानिशरीररूपोपादेयावस्थानं स्यादित्यर्थः[१] ॥३.२७॥

न्यायाभिमतं क्षणं निरुपादानकार्यावस्थानं युक्तिसङ्गतम् । यतस्तादृशोपादेयनाशं प्रति उपादान-*नाशातिरिक्तस्याऽकारणत्वेन कारणीभूतस्योपादाननाशस्य स्वोत्पत्तेः पूर्वमसत्त्वेनोपादाननाशक्षणे तत्पूर्वक्षणे कारणाभावादेवोपादेयनाशो नोत्पद्यते । तत्प्रागभावतद्ध्वंसानधिकरणक्षणस्य तदधिकरणक्षणत्वनियमतश्च* तदानीमुपादेयावस्थानमेव परिशेषाद् व्यवतिष्ठते[२] । न च तथा प्रकृते । तन्न्यायेनैकक्षणावस्थानमेव निरुपादानकस्य स्यान्न बहुक्षणावस्थानमित्याशयेन प्रतिक्षिपति –

**निरुपादानकार्यस्य, क्षणं यत् तार्किकैः स्थितिः ।**
**नाशहेत्वन्तराभावा-दिष्टाऽत्र च स दुर्वचः ॥३.२८॥**

**निरुपादानकार्यस्य**- समवायिकारणविगमकालीनोपादेयस्य, **क्षणं**- क्षणमात्रं, क्षणत्वं च स्ववृत्तिध्वंस-[३]प्रतियोग्यनधिकरणसमयत्वं, **यद्**- यस्माद्, **नाशहेत्वन्तराभावात्**- समवायिकारणनाशजन्यनाशस्य यद् हेत्वन्तरं समवायिकारणनाशव्यतिरिक्तं कारणं, तस्याऽभावात् ।

एवं च समवायिकारणनाशानन्तरक्षणे तन्नाशानुत्पादे तस्य तदहेतुकत्वतोऽन्यहेतोश्चाऽभावेनाऽहेतुकस्य तन्नाशस्य कदाऽपि भवनमेव न स्यात् । अतः समवायिकारणनाशरूपकारणस्य स्वोत्पत्तिपूर्वक्षणेऽभावादेव समवायिकारणनाशोत्पत्त्यधिकरणक्षणे उपादेयस्य कार्यस्य **स्थितिर**वस्थिति**स्तार्किकैः**- नैयायिकै**रिष्टा**-अभ्युपगता । स- नाशहेत्वन्तराभावो न च दुर्वचः- नैव वक्तुमशक्य इत्यर्थः ।

**किन्त्वत्र च**- **वेदान्ति**नो 'निरुपादानस्याऽपि ज्ञानिदेहस्य कियत्कालावस्थानं, न तु नाश' इति मते, **स**- नाशोपपादककारणविरहो **दुर्वचो**- वक्तुमशक्यो भवति, युक्त्योपपद्यमानत्वाभावादित्याशयः ॥३.२८॥

शिष्यादृष्टस्य गुरुशरीरपातप्रतिबन्धकत्वमभ्युपेत्य तदभावरूपकारणाभावाच्छरीरपातरूपकार्याभावतः कियत्कालं विदुषः शरीरावस्थानमित्युपगमोऽपि परस्य न विद्वज्जनचेतश्चमत्कारचञ्चुरित्याह –

**अन्यादृष्टस्य तत्पात-प्रतिबन्धकतां नयेत्[४] ।**
**म्रियमाणोऽपि जीव्येत, शिष्यादृष्टवशाद् गुरुः ॥३.२९॥**

---

१. इदं तु ध्येयम् - नैयायिकमतेऽदृष्टस्य शरीरोपादानकारणत्वं नैवाऽङ्गीक्रियते, परं वेदान्तिनो मतेऽविद्यापरपर्यायस्याऽदृष्टस्य शरीरोपादानकारणताऽस्त्येव, अतस्तन्नाशे शरीरस्य निरुपादानत्वोक्तिः सङ्गच्छते एव । २. उपादाननाश उपादेयनाशस्य कारणम् । कारणं कार्याव्यवहितपूर्वक्षणवृत्ति भवति, न तु समानक्षणवृत्ति । अत उपादाननाशक्षणे उपादेयनाशो न सम्भवति, किन्तु तदनन्तरक्षणे एव । तत उपादाननाशक्षणे क्षणमेकं निरुपादानमुपादेयस्याऽवस्थानं सम्भवति । ३. अत्र 'स्ववृत्तिध्वंसप्रागभावान्यतरप्रतियोग्यनधिकरणसमयत्व'मिति स्यात् तर्हि वरम् । तत्तात्पर्यं तु - तद्भिन्नेषु तत्पूर्वसमयेषु तद्वृत्तिध्वंसप्रतियोग्यधिकरणत्वं तदनन्तरसमयेषु च तद्वृत्तिप्रागभावप्रतियोग्यधिकरणत्वमिति । ४. वृत्त्यन्तरे "०न्धकतानये" इति पाठस्तदनुरूपोऽर्थश्च । तात्पर्यं तु सदृशमेव ।

**अन्यादृष्टस्ये**ति । शिष्यादृष्टस्येत्यर्थः । **तत्पातप्रतिबन्धकतां**- गुरुशरीरपातकारणीभूताभावप्रतियोगितां **नयेत्**- परः कल्पयेत् । यदि तदेति दृश्यम् ।

**म्रियमाणोऽपि** तन्मते क्षीणायुष्ट्वेन मृतावस्थाप्राप्तोऽपि **गुरुः**, **शिष्यादृष्टवशात्**- शिष्यादृष्टरूपमृति-प्रतिबन्धकताबलाद्, **जीव्येत**- विधृतप्राणः स्यात् । संसारिणः सतः प्राणवियोगानधिकरणकालस्य प्राण-संयोगाधिकरणत्वकालनियमात् ॥३.२९॥

शरीरधारणानुकूलादृष्टविशेषाभावेऽपि स्वभावादेव कियत्कालावस्थानं विदुषः शरीरस्येति वेदान्तिकदाग्रहं निग्रहीतुमाह —

**स्वंभावान्निरुपादानं, यदि विद्वत्तनुस्थितिः ।**
**तथापि कालनियमे, तत्र युक्तिर्न विद्यते ॥३.३०॥**

**यदि स्वभावात्**- कियत्कालावस्थानस्वभावबलादेव **निरुपादान**मुपादानभूताविद्यापदाभिषिक्ता-दृष्टमन्तरेणाऽपि, **विद्वत्तनुस्थितिः**- विदुषः शरीरावस्थानम्, इष्यते इति शेषः ।

**तथापि**- एवमभ्युपगमेऽपि, **कालनियमे**- तत्त्वज्ञानेनाऽविद्यारूपोपादानापगमानन्तरमेतावत्कालपर्यन्तं विदुषः शरीरेण स्थातव्यमिति नियमेऽभ्युपगम्यमाने सति; **तत्र**- स्वभावतः कालनियमे, **युक्तिः**- सत्तर्क-परिकरोपेतं प्रमाणं **न विद्यते**- नाऽस्ति । तथा चाऽप्रामाणिकस्तादृशकालनियमाभ्युपगमोऽनाकर्णनीय एव सकर्णानामिति भावः ॥३.३०॥

**उच्छृङ्खलस्य तच्चिन्त्यं, मतं वेदान्तिनो ह्यदः ।**
**प्रारब्धादृष्टतः किन्तु, ज्ञेया विद्वत्तनुस्थितिः ॥३.३१॥**

**तत्**- तस्माद्, **उच्छृङ्खलस्य**- कदाग्रहाविष्टतया सद्युक्तिमतिक्रम्य प्रमाणनियमरूपशृङ्खलाव्यपगतस्य, **वेदान्तिनः**- अद्वैतवादिनः, **अदः**- अनन्तरदर्शितं **मतं चिन्त्यम्** ।

तर्हि किमभ्युपेयं यत्र प्रमाणपक्षपातः स्यादित्यपेक्षायामाह - **किन्त्वि**ति । **प्रारब्धादृष्टतः**- प्रारब्धा-दृष्टवशात् । **विद्वत्तनुस्थितिर्ज्ञेया**- प्रमाणात्मकज्ञानविषयः[१] ॥३.३१॥

"नाऽभुक्तं क्षीयते कर्म कल्पकोटिशतैरपी"ति [ ] वचन-"मवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभ"मिति [ ] वचनं च प्रारब्धकर्मणां भोगादेव क्षय इत्येतावन्मात्रपरम्; "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन!" इत्यादि [भ.गी. ४.३७]वचनं च प्रारब्धेतरकर्मणामशेषाणां ज्ञाननाश्यत्वपरमिति ये विभजनमिच्छन्ति तेऽपि न सम्यक्प्रलापिनः । ज्ञाननाश्येषु कर्मसु वैजात्यमुररीकृत्य तादृशविजातीयाखिलकर्मनाशो ज्ञानात् तदितरकर्मनाशः क्रिययेत्येवंकल्पनस्य लाघवेनोचितत्वादित्याह —

**तत्प्रारब्धेतरादृष्टं, ज्ञाननाश्यं यदीष्यते ।**
**लाघवेन विजातीयं, तन्नाश्यं तत् प्रकल्प्यताम् ॥३.३२॥**

---

१. एवं च "ज्ञानिनो नाऽस्त्यदृष्ट" (३.२४) मिति यदुक्तं तन्निरस्तमवगन्तव्यम् ।

**तत्प्रारब्धेतरादृष्ट**मिति । तस्य विदुषो यत् प्रारब्धं कर्म तद्भिन्नं यत् तस्य कर्म तदित्यर्थः । **यदि ज्ञाननाश्यं**- तत्त्वज्ञाननाश्य**मिष्यते**- भवताऽभ्युपगम्यते । **लाघवेन**- प्रारब्धेतरादृष्टनाशत्वस्य ज्ञानजन्यतावच्छेदकत्वकल्पनापेक्षया विजातीयकर्मनाशत्वस्य तत्त्वकल्पने लाघवेन, **विजातीयं**- क्रियानाश्यकर्मविजातीयं, **तन्नाश्यं**- ज्ञाननाश्यं, **तत्**- कर्म, **प्रकल्प्यताम्**- अभ्युपगम्यताम् ॥३.३२॥

एवं च स्वस्य यदभीष्टं सिद्ध्यति तदुपदर्शयति –

**इत्थं च ज्ञानिनो ज्ञान-नाश्यकर्मक्षये सति ।**
**क्रियैकनाश्यकर्मौघ-क्षयार्थं साऽपि युज्यते ॥३.३३॥**

**इत्थं चे**ति । ज्ञाननाश्यस्य कर्मणो विजातीयतयाऽभ्युपगमे सतीत्यर्थः । **ज्ञानिनः**- तत्त्वज्ञानवतः, **ज्ञाननाश्यकर्मक्षये**- ज्ञाननाश्यतावच्छेदकवैजात्यवत्कर्मक्षये, **सति**- ज्ञानेन जाते सति, **क्रियैकनाश्यकर्मौघक्षयार्थं**- क्रियामात्रजन्यनाशप्रतियोगिकर्मसमूहविनाशार्थं, **साऽपि**- क्रियाऽपि, **उपयुज्यते**- ज्ञानिनः फलवतीत्यर्थः ॥३.३३॥

कस्यचिद् विजातीयस्य कर्मणो ज्ञानेन नाशः, तदन्यजातीयस्य कर्मणः क्रियया नाशं इति सर्वकर्मक्षयं प्रति न ज्ञानस्य न वा क्रियायाः सामर्थ्यमित्यशेषकर्मक्षयलक्षणा मुक्तिर्नैतयोरन्यतरस्याऽपि जन्यतासमालिङ्गिता; तथाऽपि सर्वकर्मक्षयो नाम नैकः कश्चित् समस्ति, किन्तु तत्तत्कर्मविनाशा एव समाहृताः सर्वकर्मक्षयतया व्यपदिश्यन्ते । इत्थं च कर्मक्षयसमूहलक्षणेऽशेषकर्मक्षये यावन्तः कर्मविशेषक्षया ज्ञानप्रभवास्तानाश्रित्य ज्ञानजन्यत्वं, यावन्तश्च कर्मविशेषक्षयाः क्रियाप्रभवास्तामाश्रित्य क्रियाजन्यत्वमिति कृत्वा ज्ञानक्रियोभयजन्यत्वं सर्वकर्मक्षये निर्वहति । एतावताऽत्र ज्ञानक्रियासमुच्चयवादः समीचीनतामञ्चतीत्याह –

**सर्वकर्मक्षये ज्ञान-कर्मणोस्तत् समुच्चयः ।**
**अन्योन्यप्रतिबन्धेन, तथा चोक्तं परैरपि ॥३.३४॥**

समूहिनः परस्परं भेदे सत्यपि स्वाभिन्नसमूहाभिन्नत्वादभेदोऽपीति ज्ञानजन्योऽपि कर्मक्षयः क्रियाजन्यकर्मक्षयत्वादभिन्न इति क्रियाजन्यः । एवं क्रियाजन्योऽपि ज्ञानजन्य इतिकृत्वा तयोरेककार्यं प्रति कारणत्वतः सहकारित्वं घटते इति । **तत्**- तस्मात् कारणात्, **सर्वकर्मक्षये**- सर्वकर्मक्षयरूपमुक्तौ, **ज्ञानकर्मणोरन्योन्यप्रतिबन्धेन**- परस्परसहकारेण, **समुच्चयः**- समुदितरूपतया कारणत्वम् । उक्तार्थे परसम्मतिमुपनिबध्नाति - **तथा चोक्तं परैरपी**ति ॥३.३४॥

परवचनमेवोपनिबध्नाति –

**"न यावत् सममभ्यस्तौ, ज्ञान-सत्पुरुषक्रमौ ।**
**एकोऽपि नैतयोस्तावत्, पुरुषस्येह सिध्यति" ॥३.३५॥**

**यावदि**त्यवस्थाव्याप्तिमादर्शयति, यादृशीमवस्थामभिव्याप्य । **समं**- समकालं[१], यदा ज्ञानाभ्यासस्तदा सदनुष्ठानाभ्यासः, यदा च सदनुष्ठानाभ्यासस्तदा ज्ञानाभ्यास इत्येवं समकालम् । एतच्च क्षणसन्ततिरूपस्थूल-कालमाश्रित्य, तेन ज्ञानक्रिययोर्भेदेनैकस्मिन् समये सहाभ्यासासम्भवेऽपि न क्षतिः । यदा क्रियानुष्ठानं तदा व्यक्त्या ज्ञानाभ्यासाभावेऽपि शक्त्या ज्ञानाभ्यासः समस्त्येव । एवं ज्ञानाभ्यासकालेऽपि शक्त्या क्रियाभ्यास इत्येवं वा तयोः समकालता ।

**अभ्यस्तौ**- भूयो भूयः साम्मुख्यपद्धतिमुपगतौ, **ज्ञानसत्पुरुषक्रमौ**- ज्ञानं- तत्त्वज्ञान'मिदं कर्तव्यमिदं न कर्तव्य'मित्यादिविवेकपरिज्ञानं वा । दर्शनस्य ज्ञानस्वरूपान्तर्भावाभिप्रायेण न पृथगुपन्यासः । **सता**माप्तानां शिष्टानां पुरुषाणां तत्तत्सत्कर्मानुष्ठानलक्षण**पुरुष**कारशालिनां यः **क्रम**- आचारः स सत्पुरुषक्रमः, तौ **न** स्तः ।

**तावत्**- तदवस्थापर्यन्तं, **पुरुषस्य**- जीवस्य, **इह**- लोके, **एतयोः**- ज्ञानक्रिययो**रेकोऽपि**- अन्यतरोऽपि, **न सिद्ध्यति**- न मोक्षसाधनीभवति । तथा च मोक्षं प्रति तयोः समुच्चय आवश्यक इति भावः ॥३.३५॥

ज्ञानक्रिययोः सर्वावस्थासु परस्परसहकारित्वं, तेन च्छाद्मस्थिकस्य ज्ञानस्य क्रियासापेक्षत्वेऽपि 'ज्ञानिनो ज्ञानस्य न तत्त्व'मित्युक्तेरपि नाऽवकाश इत्याह –

**यथा छाद्मस्थिके ज्ञान-कर्मणी सहकृत्वरे ।**
**क्षायिके अपि विज्ञेये, तथैव मतिशालिभिः ॥३.३६॥**

**यथे**ति उभयाविवादप्रदर्शनाय । **सहकृत्वरे**- परस्परसहकारिणी । **क्षायिके** इत्यनन्तरं **ज्ञानकर्मणी** इत्यनुषज्जनीयम् । **तथैव**- परस्परसहकारिणी एव । अन्यत् स्पष्टम् ॥३.३६॥

क्षायिकस्य ज्ञानस्य क्रियासङ्गतत्वं द्रढयति –

**सम्प्राप्तकेवलज्ञाना, अपि यज्जिनपुङ्गवाः ।**
**क्रियां योगनिरोधाख्यां, कृत्वा सिद्ध्यन्ति नाऽन्यथा ॥३.३७॥**

**यद्**- यस्मात् । **जिनपुङ्गवा** इति । रागद्वेषादीनन्तःशत्रूञ्जितवन्त इति जिनास्तेषां पुङ्गवाः- प्रधाना इत्यर्थः । **सम्प्राप्तकेवलज्ञाना** अपि योगनिरोधाख्यां क्रियां **कृत्वा सिद्ध्यन्ति**- मुक्तिमुपयान्ति । **अन्यथा**- योगनिरोधलक्षणक्रियामन्तरेण, न सिद्ध्यन्तीत्यर्थः ॥३.३७॥

उक्तदिशा ज्ञान-क्रिययोरुभयोरपि मुक्तिमार्गत्वव्यवस्थितौ क्रियाऽपलापिनो नास्तिका एवेति निगमयति –

**तेन ये क्रियया मुक्ता, ज्ञानमात्राभिमानिनः ।**
**ते भ्रष्टा ज्ञान-कर्मभ्यां, नास्तिका नाऽत्र संशयः ॥३.३८॥**

---

१. 'तुल्यवद्' इति वाऽर्थः ।

**तेने**ति । ज्ञानक्रिययोरन्योन्यसहकारेण कार्यकारित्वेनेत्यर्थः । **ये** इत्यनिर्दिष्टनामानः, **ज्ञानमात्राभिमानिनो** ज्ञानमेव केवलं मुक्तिसाधनमिति भ्रमात्मकज्ञानशालिनः, **क्रियया मुक्ताः**- सत्क्रियानुष्ठानपराङ्मुखाः । **ते**- प्रक्रान्तवादिनः **ज्ञानकर्मभ्यां भ्रष्टाः**, सम्यक्क्रियापरिगतस्यैव ज्ञानस्य ज्ञानत्वमन्यथा तदज्ञानमेवेति ज्ञानित्वमात्मन्यारोपयन्तोऽपि ते ज्ञानभ्रष्टा एव, क्रियां तु नाऽभ्युपगच्छन्त्येवेति क्रियाभ्रष्टा इत्येवं ज्ञानक्रियाभ्रष्टाः । अतस्ते **नास्तिका** एव मन्तव्याः । **अत्र**- अस्मिन् विषये **संशयः**- सन्देहो **न**- नैव कार्यः ॥३.३८॥

न केवलं ते ज्ञानकर्मोभयभ्रष्टत्वात् स्वयमेवाऽधः पतन्ति, किन्तु मुग्धान् विप्रतार्य परानपि भवगर्ते पातयन्तीत्याशयेनाऽऽह –

**ज्ञानोत्पत्तिं समुद्भाव्य, कामादीनन्यदृष्टितः ।**
**अपह्नुवानैर्लोकेभ्यो, नास्तिकैर्वञ्चितं जगत् ॥३.३९॥**

**ज्ञानोत्पत्ति**- 'मम सम्यग्ज्ञानमुत्पन्न'मित्येवं स्वस्य परान् प्रति **उद्भाव्य**- प्रकटीकृत्य; **अन्यदृष्टितः कामादीन् लोकेभ्योऽपह्नुवानैः**, 'नाऽहं स्वार्थं कामादीन् सेवे, किन्त्वेभ्यः कामादिभ्यः परस्योपकारो भवतु इत्यभिप्रायेणैव कामादिसेवायां मामकी प्रवृत्ति'रिति कुहकवचनेन, लोकेभ्यः सकाशाद् 'लोकाः कामादिलोलुपं मां मा ज्ञासिषु'रित्यपह्नुवानै**र्नास्तिकैर्जगद्**- मुग्धजनकदम्बकं **वञ्चितं**- मिथ्याभिनिवेशवशीकृतम् ॥३.३९॥

ननु ज्ञानिनोऽपि क्रियाया आवश्यकत्वे तस्या भूतोपमर्दनादिकमन्तरेणाऽसम्भविन्याः पापानुबन्धस्य सदनुष्ठानक्रोडीकृतायाः पुण्यार्जकत्वस्य चाऽवश्यम्भावे, तेषां च कुशलाकुशलकर्मणामनियतविपाकसमयतयाऽनल्पभवग्रहणानुभावत्वेन पुनरपि ससङ्गत्वात् संसरणमेव ज्ञानिनः प्राप्तम् । "असङ्गो ह्ययं पुरुष" [बृहदारण्यकोपनिषत् ४.३.१६] इत्यादिकं च स्तुतिमात्रमेवाऽऽपाद्येत, तादृशावस्थाविशेषस्य कदाप्यसम्भवादित्यत आह –

**ज्ञानस्य परिपाकाद्धि, क्रियाऽसङ्गत्वमङ्गति ।**
**न तु प्रयाति पार्थक्यं, चन्दनादिव सौरभम् ॥३.४०॥**

**क्रिया**- सत्पुरुषाचरितक्रियानुष्ठानलक्षणा, **ज्ञानस्य**- तत्त्वज्ञानस्य, **परिपाकाद्**- अनवरताभ्याससमासादितप्रकर्षकाष्ठा-निर्मूलितसङ्क्लेशजननस्वभावराग-शमेन्धनानलस्वभावद्वेषाद्यवस्थाविशेषाद्, **हि**- यतः, **असङ्गत्वं**- रागद्वेषमोहादिलक्षण-सहकारिसम्बन्धस्नेहापगमतोऽपूर्वकर्मबन्धकार्योपधानात्मकसङ्गविगमस्वभाव**मङ्गति**- प्राप्नोति ।

"अज्ञानसलिलावसिक्तायामात्मभूमौ कर्मबीजं धर्माधर्माङ्कुरावारभते, न तु तत्त्वज्ञाननिदाघनिपीतसलिलतयोखराया"मिति परवचनमप्येनमर्थमनुवदति । एवं च ज्ञानिनः सत्क्रियानुष्ठानसद्भावेऽपि तादृशावस्थाविशेषयोगादसङ्गत्वं न दुरुपपादम् । न वा तादृशक्रियया भवपरम्परोपनिपात इति हृदयम् ।

प्रतिक्षणं परिणमनलक्षणस्वभाववतश्चाऽऽत्मनः क्रिया स्वभावान्तःसन्निविष्टैव । तस्याश्चाऽपनयनं कस्यामप्यवस्थायां न शक्यते विधातुमित्याह - **न तु**- नैव **प्रयाति**- गच्छति ।

अत्राऽनुरूपं दृष्टान्तमाह - **चन्दनादिव सौरभ**मिति । चन्दनरूपद्रव्याद् यथा सौरभात्मको गुणस्तदाश्रितस्वभावः **पार्थक्यं**- पृथग्दशत्वं नैव गच्छति, गुणस्य गुणिनमन्तरेणाऽवस्थानासम्भवात्, गुणिनश्च गुणमन्तरेण स्वभावप्रच्युतेः । तथा सक्रियस्वभावस्याऽऽत्मनः क्रियामन्तरेण न सम्भवत्यवस्थानं, तत्स्वभावान्तःप्रविष्टत्वात् तस्या इति ॥३.४०॥

ज्ञानिनः क्रियाऽसङ्गानुष्ठानलक्षणा पराभिमतयोगिसम्मताऽपीत्थमेव घटते, ज्ञानिनोऽक्रियत्वेऽनुष्ठानार्थस्यैवाऽघटनान्न सा सङ्गता स्यादित्याह –

**प्रीति-भक्ति-वचो-ऽसङ्गै-रनुष्ठानं चतुर्विधम् ।**
**यत् परैर्योगिभिर्गीतं, तदित्थं युज्यतेऽखिलम् ॥३.४१॥**

**प्रीत्य**नुष्ठानं **भक्त्य**नुष्ठानं **वचो**ऽनुष्ठानम**सङ्गा**नुष्ठानमित्येव**मनुष्ठानं चतुर्विधं**- चतुःप्रकारं **यत् परैः**- परसम्मतै**र्योगिभिः**- आसादितयोगस्वरूपै**र्गीतम्**- अविगानेन प्ररूपितम् । **तद्**- उपदर्शितचतुःप्रकारमनुष्ठानम् । **अखिलं**- समग्रम्, **इत्थं**- ज्ञानिनः क्रियाया असङ्गत्वोपपादनलक्षणप्रकारेण, **युज्यते**- घटते । अन्यथा तुरीयस्याऽसम्भवे चतुःप्रकारत्वमनुष्ठानस्याऽसङ्गतं स्यात् ।

प्रीत्याद्यनुष्ठानस्वरूपमित्थं - यत्राऽनुष्ठाने प्रयत्नातिशयोऽस्ति परमा च प्रीतिरुत्पद्यते शेषत्यागेन च यत् क्रियते तत् प्रीत्यनुष्ठानम् । एतत्तुल्यमप्यालम्बनीयस्य पूज्यत्वविशेषबुद्ध्या विशुद्धतरव्यापारं भक्त्यनुष्ठानम् । शास्त्रार्थप्रतिसन्धानपूर्वा साधोः सर्वत्रोचितप्रवृत्तिर्वचनानुष्ठानम् । व्यवहारकाले वचनप्रतिसन्धाननिरपेक्षं दृढतरसंस्काराच्चन्दनगन्धन्यायेनाऽऽत्मसाद्भूतं जिनकल्पिकादीनां क्रियासेवनमसङ्गानुष्ठानमिति योगविंशिकावृत्तौ ॥३.४१॥

युगपज्ज्ञान-सत्पुरुषक्रमाभ्यासशालिनोऽवश्यमेव निर्वाणमिति निगमयति –

**ज्ञाने चैव क्रियायां च, युगपद्विहितादरः ।**
**द्रव्यभावविशुद्धः सन्, प्रयात्येव परं पदम् ॥३.४२॥**

**चैवे**त्यधिकमपि समुच्चयवादे स्वस्य ग्रन्थकर्तुरत्यन्तमेव पक्षपात इत्युपदर्शनपरं न दोषावहम् । उत्तानार्थमेवेदम् ॥३.४२॥

क्रियाज्ञानोभयाभ्यासिनः पुरुषधौरेयान्नभिष्टौति पद्याभ्याम् –

**क्रियाज्ञानसंयोगविश्रान्तचित्ताः, समुद्भूतनिर्बाधचारित्रवृत्ताः ।**
**नयोन्मेषनिर्णीतनिःशेषभावा-स्तपःशक्तिलब्धप्रसिद्धप्रभावाः ॥३.४३॥**

**भयक्रोधमायामदाज्ञाननिद्रा-प्रमादोज्झिताः शुद्धमुद्रा मुनीन्द्राः ।**
**यशःश्रीसमालिङ्गिता वादिदन्ति-स्मयोच्छेदहर्यक्षतुल्या जयन्ति ॥३.४४॥**

अत्र प्रथमान्तैरष्टभिः समस्तैर्वचनैः प्रतिपादितानामष्टानां विशेषणानां सम्बन्धतोऽन्यपुरुषव्यावृत्ता **मुनीन्द्रा जयन्ति-** सर्वोत्कर्षेण वर्तन्ते इत्युक्तितोऽप्रतिघगुणगणसम्पत्प्रकर्षशालित्वमेषामुपदर्शितं भवतीत्यस्य पद्ययुग्मस्य स्तुतिरूपत्वं स्पष्टमेव ।

**क्रियाज्ञानसंयोगविश्रान्तचित्ता** इति । क्रियाज्ञानयोर्यः परस्परसहकारिभावेन सहाभ्यस्तत्वेन च *संयोग-* एकत्र स्वात्मनि सम्यगवस्थानं तेन *विश्रान्तं- क्रियैकान्तवाद-ज्ञानैकान्तवादलब्धावकाशदोषलेशा-* संस्पृष्टत्वादविचलितस्वभावं चित्तं- स्वान्तं येषां ते तथा । अनेन क्रियाज्ञानसंयोगस्थिरीकृतमानसानां तेषां न मनागपि ज्ञानैकान्तादिवाद्युपनिपातिदोषप्रभवसन्त्रासोऽतः सुदृढयोगभूमाववस्थानमिति दर्शितम् ।

**समुद्भूतनिर्बाधचारित्रवृत्ता** इति । यत एव वशीकृतमानसत्वेन नाऽन्तर्विक्षेपोऽत एव बहिरपि समुद्भूतं- सम्यगाविर्भूतं निर्बाधमुत्तरकालीनातिचारादिबाधाविवर्जितं चारित्रं- पञ्चमहाव्रतात्मकं वृत्तं येषां ते तथा । एतेन च स्वस्याऽतिचारादिविशुद्धाचरणतः परेषामपि तथाविधक्रियासाम्मुख्यकरणात् तीर्थसम्मानन-प्रभावनाऽनायासकारिता तेषां सुव्यक्ता । तत आपामरजनसाधारणोपकारपरायणत्वमभिव्यञ्जितं भवति ।

**नयोन्मेषनिर्णीतनिःशेषभावा** इति । नयानां- सङ्ग्रहादीनां य उन्मेषः- स्वस्वनिमित्तापेक्षया महा-सामान्यावान्तरसामान्यविशेषादिगोचरतयाऽविप्रतिपत्तिभावतः स्वात्मनि तत्तदंशज्ञानानुकूलतयाऽभ्युपगमात्मकः प्रकटभावः, तेन निर्णीतो- निश्चयविषयतामानीतो निःशेषः- समस्तो भावो- धर्मो यैस्ते तथा । अनेन च सर्वापरतन्त्ररहस्याभिज्ञत्वेन तत्तत्तन्त्राभिमततत्त्ववस्तुस्थितिपरिपोषकत्वेन मध्यस्थभावाधिवासतया सर्व-तान्त्रिकनिष्कारणमित्रत्वं तेषां प्रकटितं भवति । ततश्च सर्वैरपि तान्त्रिकैः स्वस्वाभिमततत्त्वपरीक्षणाय ते उपासनीया, तेषां च वादे न केनाऽपि वादिना परिभवः कर्तुं शक्य इति व्यञ्जितं भवति ।

**तपःशक्तिलब्धप्रसिद्धप्रभावा** इति । तपसां श्रुतविहितानां बाह्याभ्यन्तरभेदपरिगतानां यथावत्करणेना-ऽऽविर्भूता या शक्तिः- अप्रतिघसामर्थ्यं सा तपःशक्तिस्तया लब्धः- प्राप्तः प्रसिद्ध- आपामरजनप्रतीतः प्रभावः- प्रभुत्वं, यद्यदिच्छति तत्तदनायासमेवोपतिष्ठते, यत्किमपि वक्ति तत् परस्याऽचिन्तितमपि सम्पद्यते, दर्शनमात्रेणाऽपि तेषां परस्याऽभीष्टं सम्पन्नमेवेत्यादिरूपं येषां ते तथा । एतेन वादिनोऽपि तत्पराजयार्थं तत्समीपमुपगतास्तत्प्रभावकुण्ठितमतयस्तत्समीपगमनाहितावैरभावाः सम्पद्यन्ते इत्यावेदितं भवति ।

**भयक्रोधमायामदाज्ञाननिद्राप्रमादोज्झिता** इति । भयं- परेभ्यः स्वस्याऽनिष्टाशङ्कनं, क्रोधो- द्वेषः परान् पराभवितुं स्वस्य समन्तात् तेजःप्रकटनं, माया- परवञ्चनं, मदो- जातिकुलविद्याद्यभिमानम्, अज्ञानं- यथास्थितवस्त्वपरिज्ञानं, निद्रा- बहिरिन्द्रियमतिक्रम्य मनसो विक्षेपविशेषरूपा प्रसिद्धैव, प्रमादः- अन्यमनस्कत्वं, एतैर्भयादिभिरुज्झिताः- परित्यक्ता ये ते तथा । अत्र भयवर्जितत्वेन परतैर्थिकप्रकाण्डसमूहेऽपि स्वमताविष्करणं शास्त्रोक्तक्रियानुष्ठानं चाऽनाकुलमेवैतेषाम् । क्रोधरहितत्वेन च परप्रयुक्तावर्णवादाद्युपनिपातेऽपि *यथास्थितस्वक्रियानुष्ठानादिराजमार्गतो न कदाप्यसहनादिदोषात् परिभ्रष्टत्वम् । मायाराहित्येन च न* वञ्चनादिनाऽन्येषां स्वमते प्रवर्तकत्वं, किन्तु समुपदेशत एव । मदाभावेन च कुलादिनाऽपकृष्टतोऽपि हितवचनाद्युपादानम् । अज्ञानाभावेन च न जिनोक्ते तत्त्वनिकुरम्बेऽश्रद्धाद्याविर्भावकथाऽपि । सदा

प्रबुद्धतयाऽप्रबुद्धावस्थाविशेषरूपनिद्राया अभावेन समुचिताहाराद्युपयोगात् कफपित्तवातप्रकोपादिप्रभाविताया: स्वप्नावस्थौत्तम्भिकाया दोषविशेषरूपाया वा निद्राया अभावेन च न मनागपि चित्तविक्षोभादिकम् । प्रमादाभावेन च गृहीतमहाव्रतनियमाप्रतिघात एवैतेषाम् ।

**शुद्धमुद्रा** इत्यनेन च न दाम्भिकादिलाञ्छनाशङ्कायास्तत्र समुन्मेष इति भव्यजनासेवनीयत्वं, **मुनीन्द्रा** इत्यनेन हितमितसत्यभाषाभाषकत्वेनाऽऽप्तप्रकाण्डत्वं मुनिनिकुरम्बोपासनीयत्वं च प्रकटितं भवति ।

विशेष्यतावच्छेदकस्याऽप्यस्याऽन्यव्यावर्तकत्वतो निरवच्छिन्नविशेष्यतानिरूपितप्रकारताश्रयत्वेन विशेषणत्वमविरुद्धम् । विशेषणत्वाव्यवहारश्च किञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपितप्रकारत्वाभावादेवेति बोध्यम्[१] ।

**यशःश्रीसमालिङ्गिता** इति । यशसस्त्रिभुवनव्यापिकीर्तेर्याश्रीः- परमशोभा तयाऽकीर्तिलेशासंस्पृष्टतया समीचीनतयाऽविष्वग्भावेनाऽभिव्याप्त्याऽऽलिङ्गिता ये तथा ।

अथवा 'नामैकदेशेन नामग्रहण'मिति न्यायेन यशसो- यशोविजयस्य स्वस्य या श्रीः- वादिव्रातपराजयसमुल्लसिता शोभा, तया समालिङ्गिता- यथाऽहं तथा तेऽपि । तेन च स्वस्याऽप्युक्तगुणगौरवास्पदत्वमाविष्कृतं भवति ।

यत उक्तगुणव्रातनिधयोऽतो **वादिदन्तिस्मयोच्छेदहर्यक्षतुल्या** इति । वादिनस्तीर्थान्तरीयाः स्वतीर्थ्या अपि पूर्वपक्षग्राहिणस्ते एव कदाग्रहमदोन्मत्तत्वेन दन्तिनो- दिग्गजास्तेषां यः स्मयः- स्वपक्षस्थापनसमर्थत्वाभिमानस्तदुच्छेदे- तदुन्मूलने हरेः- केशरिणो यदक्षं- कटाक्षाकलितं नयनं तेन तुल्या इत्यर्थः । यथा सिंहकटाक्षावलोकनमात्रेण दन्तिनोऽपगतमदा भवन्ति, तथा वादिनोऽप्येतद्युक्तिगणोपेत-'स्यात्'-पदाङ्कितवचनमात्रेण निरुद्धवचनप्रसरा भवन्तीति ॥३.४३, ४४॥

**॥ इति क्रियायोगशुद्धिनामा तृतीयोऽधिकारः ॥**

**॥ इति अध्यात्मोपनिषद्-वृत्तिः समाप्ता ॥**

---

१, 'मुनीन्द्रा' इत्येकमेव पदमत्र विशेषण-विशेष्योभयरूपेण कथं सङ्गमनीयमितीह निदर्श्यते ।

# परिशिष्टम्-१

## अध्यात्मोपनिषत्प्रकरणं मूलमात्रम्

### १

### शास्त्रयोगशुद्धिनामाऽधिकार:

ऐन्द्रवृन्दनतं नत्वा, वीतरागं स्वयम्भुवम् । अध्यात्मोपनिषन्नामा, ग्रन्थोऽस्माभिर्विधीयते ॥१.१॥
आत्मानमधिकृत्य स्याद्, यः पञ्चाचारचारिमा । शब्दयोगार्थनिपुणा-स्तदध्यात्मं प्रचक्षते ॥१.२॥
रूढ्यर्थनिपुणास्त्वाहु-श्चित्तं मैत्र्यादिवासितम् । अध्यात्मं निर्मलं बाह्य-व्यवहारोपबृंहितम् ॥१.३॥
एवम्भूतनये ज्ञेयः, प्रथमोऽर्थोऽत्र कोविदैः । यथायथं द्वितीयोऽर्थो, व्यवहारर्जुसूत्रयोः ॥१.४॥
गलन्नयकृतभ्रान्ति-र्यः स्याद् विश्रान्तिसम्मुखः । स्याद्वादविशदालोकः, स एवाऽध्यात्मभाजनम् ॥१.५॥
मनोवत्सो युक्तिगवीं, मध्यस्थस्याऽनुधावति । तामाकर्षति पुच्छेन, तुच्छाग्रहमनःकपिः ॥१.६॥
अनर्थायैव नाऽर्थाय, जातिप्रायाश्च युक्तयः । 'हस्ती हन्ती'ति वचने, प्राप्ताप्राप्तविकल्पवत् ॥१.७॥
ज्ञायेरन् हेतुवादेन, पदार्था यद्यतीन्द्रियाः । कालेनैतावता प्राज्ञैः, कृतः स्यात् तेषु निश्चयः ॥१.८॥
आगमश्चोपपत्तिश्च, सम्पूर्णं दृष्टिलक्षणम् । अतीन्द्रियाणामर्थानां, सद्भावप्रतिपत्तये ॥१.९॥
अन्तरा केवलज्ञानं, छद्मस्थाः खल्वचक्षुषः । हस्तस्पर्शसमं शास्त्र-ज्ञानं तद्व्यवहारकृत् ॥१.१०॥
शुद्धोञ्छाद्यपि शास्त्राज्ञा-निरपेक्षस्य नो हितम् । भौतहन्तुर्यथा तस्य, पदस्पर्शनिषेधनम् ॥१.११॥
शासनात् त्राणशक्तेश्च, बुधैः शास्त्रं निरुच्यते । वचनं वीतरागस्य, तच्च नाऽन्यस्य कस्यचित् ॥१.१२॥
वीतरागोऽनृतं नैव, ब्रूयात् तद्धेत्वभावतः । यस्तद्वाक्येष्वनाश्वास-स्तन्महामोहजृम्भितम् ॥१.१३॥
शास्त्रे पुरस्कृते तस्माद्, वीतरागः पुरस्कृतः । पुरस्कृते पुनस्तस्मिन्, नियमात् सर्वसिद्धयः ॥१.१४॥
एनं केचित् समापत्तिं, वदन्त्यन्ये ध्रुवं पदम् । प्रशान्तवाहितामन्ये, विसभागक्षयं परे ॥१.१५॥
चर्मचक्षुर्भृतः सर्वे, देवाश्चाऽवधिचक्षुषः । सर्वतश्चक्षुषः सिद्धा, योगिनः शास्त्रचक्षुषः ॥१.१६॥
परीक्षन्ते कषच्छेद-तापैः स्वर्णं यथा जनाः । शास्त्रेऽपि वर्णिकाशुद्धिं, परीक्षन्तां तथा बुधाः ॥१.१७॥
विधयः प्रतिषेधाश्च, भूयांसो यत्र वर्णिताः । एकाधिकारा दृश्यन्ते, कषशुद्धिं वदन्ति ताम् ॥१.१८॥
सिद्धान्तेषु यथा ध्याना-ध्ययनादिविधिव्रजाः । हिंसादीनां निषेधाश्च, भूयांसो मोक्षगोचराः ॥१.१९॥
अर्थकामविमिश्रं यद्, यच्च क्लृप्तकथाविलम् । आनुषङ्गिकमोक्षार्थं, यन्न तत् कषशुद्धिमत् ॥१.२०॥
विधीनां च निषेधानां, योगक्षेमकरी क्रिया । वर्ण्यते यत्र सर्वत्र, तच्छास्त्रं छेदशुद्धिमत् ॥१.२१॥
कायिकाद्यपि कुर्वीत, गुप्तश्च समितो मुनिः । कृत्ये ज्यायसि किं वाच्य-मित्युक्तं समये यथा ॥१.२२॥
अन्यार्थं किञ्चिदुत्सृष्टं, यत्राऽन्यार्थमपोह्यते । दुर्विधिप्रतिषेधं तद्, न शास्त्रं छेदशुद्धिमत् ॥१.२३॥
निषिद्धस्य विधानेऽपि, हिंसादेर्भूतिकामिभिः । दाहस्येव न सद्वैद्यै-र्याति प्रकृतिदुष्टता ॥१.२४॥

हिंसा भावकृतो दोषो, दाहस्तु न तथेति चेत् । भूत्यर्थं तद्विधानेऽपि, भावदोषः कथं गतः? ॥१.२५॥
वेदोक्तत्वान्मनःशुद्ध्या, कर्मयज्ञोऽपि योगिनः । ब्रह्मयज्ञ इतीच्छन्तः, श्येनयागं त्यजन्ति किम्? ॥१.२६॥
वेदान्तविधिशेषत्व-मतः कर्मविधेर्हतम् । भिन्नात्मदर्शकाः शेषा, वेदान्ता एव कर्मणः ॥१.२७॥
कर्मणां निरवद्यानां, चित्तशोधकता परम् । साङ्ख्याचार्या अपीच्छन्ती-त्यास्तामेषोऽत्र विस्तरः ॥१.२८॥
यत्र सर्वनयालम्बि-विचारप्रबलाग्निना । तात्पर्यश्यामिका न स्यात्, तच्छास्त्रं तापशुद्धिमत् ॥१.२९॥
यथाऽऽह सोमिलप्रश्ने, जिनः स्याद्वादसिद्धये । द्रव्यार्थादहमेकोऽस्मि, दृग्ज्ञानार्थादुभावपि ॥१.३०॥
अक्षयश्चाऽव्ययश्चाऽस्मि, प्रदेशार्थविचारतः । अनेकभूतभावात्मा, पर्यायार्थपरिग्रहात् ॥१.३१॥
द्वयोरेकत्वबुद्ध्याऽपि, यथा द्वित्वं न गच्छति । नयैकान्तधियाऽप्येव-मनेकान्तो न गच्छति ॥१.३२॥
सामग्र्येण न मानं स्याद्, द्वयोरेकत्वधीर्यथा । तथा वस्तुनि वस्त्वंश-बुद्धिर्ज्ञेया नयात्मिका ॥१.३३॥
एकदेशेन चैकत्व-धीर्द्वयोः स्याद् यथा प्रमा । तथा वस्तुनि वस्त्वंश-बुद्धिर्ज्ञेया नयात्मिका ॥१.३४॥
इत्थं च संशयत्वं य-न्नयानां भाषते परः । तदपास्तं द्वयालम्बः, प्रत्येकं न नयेषु यत् ॥१.३५॥
सामग्र्येण द्वयालम्बे-ऽप्यविरोधे समुच्चयः । विरोधे दुर्नयव्राताः, स्वशस्त्रेण स्वयं हताः ॥१.३६॥
कथं विप्रतिषिद्धानां, न विरोधः समुच्चये? । अपेक्षाभेदतो हन्त!, कैव विप्रतिषिद्धता? ॥१.३७॥
भिन्नापेक्षा यथैकत्र, पितृपुत्रादिकल्पना । नित्यानित्याद्यनेकान्त-स्तथैव न विरोत्स्यते ॥१.३८॥
व्यापके सत्यनेकान्ते, स्वरूप-पररूपयोः । आनेकान्त्यान्न कुत्रापि, निर्णीतिरिति चेन्मतिः ॥१.३९॥
अव्याप्यवृत्तिधर्माणां, यथाऽवच्छेदकाश्रया । नाऽपि ततः परावृत्ति-स्तत् किं नाऽत्र तथेक्ष्यते? ॥१.४०॥
आनैगमान्त्यभेदं त-त्परावृत्तावपि स्फुटम् । अभिप्रेताश्रयेणैव, निर्णयो व्यवहारकः ॥१.४१॥
अनेकान्तेऽप्यनेकान्ता-दनिष्ठैवमपाकृता । नयसूक्ष्मेक्षिकाप्रान्ते, विश्रान्तेः सुलभत्वतः ॥१.४२॥
आत्माश्रयादयोऽप्यत्र, सावकाशा न कर्हिचित् । ते हि प्रमाणसिद्धार्थात्, प्रकृत्यैव पराङ्मुखाः ॥१.४३॥
उत्पन्नं दधिभावेन, नष्टं दुग्धतया पयः । गोरसत्वात् स्थिरं जातं, स्याद्वादद्विड् जनोऽपि कः? ॥१.४४॥
इच्छन् प्रधानं सत्त्वाद्यै-र्विरुद्धैर्गुम्फितं गुणैः । साङ्ख्यः सङ्ख्यावतां मुख्यो, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.४५॥
विज्ञानस्यैकमाकारं, नानाकारकरम्बितम् । इच्छंस्ताथागतः प्राज्ञो, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.४६॥
चित्रमेकमनेकं च, रूपं प्रामाणिकं वदन् । योगो वैशेषिको वाऽपि, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.४७॥
प्रत्यक्षं मितिमात्रंशे, मेयांशे तद्विलक्षणम् । गुरुर्ज्ञानं वदन्नेकं, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.४८॥
जातिव्यक्त्यात्मकं वस्तु, वदन्ननुभवोचितम् । भट्टो वाऽपि मुरारिर्वा, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.४९॥
अबद्धं परमार्थेन, बद्धं च व्यवहारतः । ब्रुवाणो ब्रह्म वेदान्ती, नाऽनेकान्तं प्रतिक्षिपेत् ॥१.५०॥
ब्रुवाणा भिन्नभिन्नार्थान्, नयभेदव्यपेक्षया । प्रतिक्षिपेयुर्नो वेदाः, स्याद्वादं सार्वतान्त्रिकम् ॥१.५१॥
विमतिः सम्मतिर्वाऽपि, चार्वाकस्य न मृग्यते । परलोकात्ममोक्षेषु, यस्य मुह्यति शेमुषी ॥१.५२॥
तेनाऽनेकान्तसूत्रं यद्, यद्वा सूत्रं नयात्मकम् । तदेव तापशुद्धं स्याद्, न तु दुर्नयसञ्ज्ञितम् ॥१.५३॥
नित्यैकान्ते न हिंसादि, तत्पर्यायापरिक्षयात् । मनःसंयोगनाशादौ, व्यापारानुपलम्भतः ॥१.५४॥
बुद्धिलेपोऽपि को नित्य-निर्लेपात्मव्यवस्थितौ? । सामानाधिकरण्येन, बन्ध-मोक्षौ हि सङ्गतौ ॥१.५५॥
अनित्यैकान्तपक्षेऽपि, हिंसादिकमसङ्गतम् । स्वतो विनाशशीलानां, क्षणानां नाशकोऽस्तु कः? ॥१.५६॥
आनन्तर्यं क्षणानां तु, न हिंसादिनियामकम् । विशेषादर्शनात् तस्य, बुद्ध-लुब्धकयोर्मिथः ॥१.५७॥
सङ्क्लेशेन विशेषश्चे-दानन्तर्यमपार्थकम् । न हि तेनाऽपि सङ्क्लिष्ट-मध्ये भेदो विधीयते ॥१.५८॥

मनोवाक्काययोगानां, भेदादेवं क्रियाभिदा । समग्रैव विशीर्येते-त्येतदन्यत्र चर्चितम् ॥१.५९॥
नित्यानित्याद्यनेकान्त-शास्त्रं तस्माद् विशिष्यते । तद्दृष्ट्यैव हि माध्यस्थ्यं, गरिष्ठमुपपद्यते ॥१.६०॥
यस्य सर्वेषु समता, नयेषु तनयेष्विव । तस्याऽनेकान्तवादस्य, क्व न्यूनाधिकशेमुषी? ॥१.६१॥
स्वतन्त्रास्तु नयास्तस्य, नांऽशाः किन्तु प्रकल्पिताः । रागद्वेषौ कथं तस्य, दूषणेऽपि च भूषणे ॥१.६२॥
अर्थे महेन्द्रजालस्य, दूषितेऽपि च भूषिते । यथा जनानां माध्यस्थ्यं, दुर्नयार्थे तथा मुनेः ॥१.६३॥
दूषयेदज्ञ एवोच्चैः, स्याद्वादं न तु पण्डितः । अज्ञप्रलापे सुज्ञानां, न द्वेषः करुणैव तु ॥१.६४॥
त्रिविधं ज्ञानमाख्यातं, श्रुतं चिन्ता च भावना । आद्यं कोष्ठगबीजाभं, वाक्यार्थविषयं मतम् ॥१.६५॥
महावाक्यार्थजं यत्तु, सूक्ष्मयुक्तिशतान्वितम् । तद् द्वितीयं जले तैल-बिन्दुरीत्या प्रसृत्वरम् ॥१.६६॥
ऐदम्पर्यगतं यच्च, विध्यादौ यत्नवच्च यत् । तृतीयं तदशुद्धोच्च-जात्यरत्नविभानिभम् ॥१.६७॥
आद्ये ज्ञाने मनाक् पुंस-स्तद्रागाद् दर्शनग्रहः । द्वितीये न भवत्येष, चिन्तायोगात् कदाचन ॥१.६८॥
चारिसञ्जीविनीचार-कारकज्ञाततोऽन्तिमे । सर्वत्रैव हिता वृत्ति-र्गाम्भीर्यात् तत्त्वदर्शिनः ॥१.६९॥
तेन स्याद्वादमालम्ब्य, सर्वदर्शनतुल्यताम् । मोक्षोद्देशाविशेषेण, यः पश्यति स शास्त्रवित् ॥१.७०॥
माध्यस्थ्यमेव शास्त्रार्थो, येन तच्चारु सिध्यति । स एव धर्मवादः स्या-दन्यद् बालिशवल्गनम् ॥१.७१॥
पुत्रदारादि संसारो, धनिनां मूढचेतसाम् । पण्डितानां तु संसारः, शास्त्रमध्यात्मवर्जितम् ॥१.७२॥
माध्यस्थ्यसहितं ह्येक-पदज्ञानमपि प्रमा । शास्त्रकोटिर्वृथैवाऽन्या, तथा चोक्तं महात्मना ॥१.७३॥
"वादांश्च प्रतिवादांश्च, वदन्तोऽनिश्चितांस्तथा । तत्त्वान्तं नैव गच्छन्ति, तिलपीलकवद् गतौ" ॥१.७४॥
इति यतिवदनात् पदानि बुद्ध्वा, प्रशम-विवेचन-संवराभिधानि ।
प्रदलितदुरितः क्षणाच्चिलाति-तनय इह त्रिदशालयं जगाम ॥१.७५॥
न चाऽनेकान्तार्थावगमरहितस्याऽस्य फलितं, कथं माध्यस्थ्येन स्फुटमिति विधेयं भ्रमपदम् ।
समाधेरव्यक्ताद् यदभिदधति व्यक्तसदृशं, फलं योगाचार्या ध्रुवमभिनिवेशे विगलिते ॥१.७६॥
विशेषादोघाद् वा सपदि तदनेकान्तसमये, समुन्मीलद्भक्तिर्भवति य इहाऽध्यात्मविशदः ।
भृशं धीरोदात्तप्रियतमगुणोज्जागररुचि-र्यशःश्रीस्तस्याऽङ्कं त्यजति न कदाऽपि प्रणयिनी ॥१.७७॥

## २
## ज्ञानयोगशुद्धिनामाऽधिकारः

दिशा दर्शितया शास्त्रै-र्गच्छन्नच्छमतिः पथि । ज्ञानयोगं प्रयुञ्जीत, तद्विशेषोपलब्धये ॥२.१॥
योगजादृष्टजनितः, स तु प्रातिभसञ्ज्ञितः । सन्ध्येव दिन-रात्रिभ्यां, केवल-श्रुतयोः पृथक् ॥२.२॥
पदमात्रं हि नाऽन्वेति, शास्त्रं दिग्दर्शनोत्तरम् । ज्ञानयोगो मुनेः पार्श्व-माकैवल्यं न मुञ्चति ॥२.३॥
तत्त्वतो ब्रह्मणः शास्त्रं, लक्षकं न तु दर्शकम् । न चाऽदृष्टात्मतत्त्वस्य, दृष्टभ्रान्तिर्निवर्तते ॥२.४॥
तेनाऽऽत्मदर्शनाकाङ्क्षी, ज्ञानेनाऽन्तर्मुखो भवेत् । द्रष्टुर्दृगात्मता मुक्ति-र्दृश्यैकात्म्यं भवभ्रमः ॥२.५॥
आत्मज्ञाने मुनिर्मग्नः, सर्वं पुद्गलविभ्रमम् । महेन्द्रजालवद् वेत्ति, नैव तत्राऽनुरज्यते ॥२.६॥
*आस्वादिता सुमधुरा, येन ज्ञानरतिः सुधा । न लगत्येव तच्चेतो, विषयेषु विषेष्विव ॥२.७॥*
सत्तत्त्वचिन्तया यस्या-ऽभिसमन्वागता इमे । आत्मवान् ज्ञानवान् वेद-धर्मवान् ब्रह्मवाँश्च सः ॥२.८॥
विषयान् साधकः पूर्व-मनिष्टत्वधिया त्यजेत् । न त्यजेन्न च गृह्णीयात्, सिद्धो विन्द्यात् स तत्त्वतः ॥२.९॥

योगारम्भदशास्थस्य, दुःखमन्तर्बहिःसुखम् । सुखमन्तर्बहिर्दुःखं, सिद्धयोगस्य तु ध्रुवम् ॥२.१०॥
प्रकाशशक्त्या यद्रूप-मात्मनो ज्ञानमुच्यते । सुखं स्वरूपविश्रान्ति-शक्त्या वाच्यं तदेव तु ॥२.११॥
सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम् । एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥२.१२॥
ज्ञानमग्नस्य यच्छर्म, तद् वक्तुं नैव पार्यते । नोपमेयं प्रियाश्लेषै-र्नाऽपि तच्चन्दनद्रवैः ॥२.१३॥
तेजोलेश्याविवृद्धिर्या, पर्यायक्रमवृद्धितः । भाषिता भगवत्यादौ, सेत्थम्भूतस्य युज्यते ॥२.१४॥
चिन्मात्रलक्षणेनाऽन्य-व्यतिरिक्तत्वमात्मनः । प्रतीयते यदश्रान्तं, तदेव ज्ञानमुत्तमम् ॥२.१५॥
शुभोपयोगरूपोऽयं, समाधिः सविकल्पकः । शुद्धोपयोगरूपस्तु, निर्विकल्पस्तदेकदृक् ॥२.१६॥
आद्यः सालम्बनो नाम, योगोऽनालम्बनः परः । छायाया दर्पणाभावे, मुखविश्रान्तिसन्निभः ॥२.१७॥
यद् दृश्यं यच्च निर्वाच्यं, मननीयं च यद् भुवि । तद् रूपं परसंश्लिष्टं, न शुद्धद्रव्यलक्षणम् ॥२.१८॥
अपदस्य पदं नाऽस्ती-त्युपक्रम्याऽऽगमे ततः । उपाधिमात्रव्यावृत्त्या, प्रोक्तं शुद्धात्मलक्षणम् ॥२.१९॥
"यतो वाचो निवर्तन्ते, ह्यप्राप्य मनसा सह" । इतिश्रुतिरपि व्यक्त-मेतदर्थानुसारिणी ॥२.२०॥
अतीन्द्रियं परं ब्रह्म, विशुद्धानुभवं विना । शास्त्रयुक्तिशतेनाऽपि, नैव गम्यं कदाचन ॥२.२१॥
केषां न कल्पनादर्वी, शास्त्रक्षीरान्नगाहिनी । विरलास्तद्रसास्वाद-विदोऽनुभवजिह्वया ॥२.२२॥
पश्यतु ब्रह्म निर्द्वन्द्वं, निर्द्वन्द्वानुभवं विना । कथं लिपिमयी दृष्टि-र्वाङ्मयी वा मनोमयी ॥२.२३॥
न सुषुप्तिरमोहत्वा-न्नाऽपि च स्वाप-जागरौ । कल्पनाशिल्पविश्रान्ते-स्तुर्यैवाऽनुभवो दशा ॥२.२४॥
अधिगत्याऽखिलं शब्द-ब्रह्म शास्त्रदृशा मुनिः । स्वसंवेद्यं परं ब्रह्मा-ऽनुभवैरधिगच्छति ॥२.२५॥
ये पर्यायेषु निरता-स्ते ह्यन्यसमयस्थिताः । आत्मस्वभावनिष्ठानां, ध्रुवा स्वसमयस्थितिः ॥२.२६॥
आवापोद्वापविश्रान्ति-र्यत्राऽशुद्धनयस्य तत् । शुद्धानुभवसंवेद्यं, स्वरूपं परमात्मनः ॥२.२७॥
गुणस्थानानि यावन्ति, यावन्त्यश्चाऽपि मार्गणाः । तदन्यतरसंश्लेषो, नैवाऽतः परमात्मनः ॥२.२८॥
कर्मोपाधिकृतान् भावान्, य आत्मन्यध्यवस्यति । तेन स्वाभाविकं रूपं, न बुद्धं परमात्मनः ॥२.२९॥
यथा भृत्यैः कृतं युद्धं, स्वामिन्येवोपचर्यते । शुद्धात्मन्यविवेकेन, कर्मस्कन्धोर्जितं तथा ॥२.३०॥
मुषितत्वं यथा पान्थ-गतं पथ्युपचर्यते । तथा व्यवहरत्यज्ञ-श्चिद्रूपे कर्मविक्रियाम् ॥२.३१॥
स्वत एव समायान्ति, कर्माण्यारब्धशक्तितः । एकक्षेत्रावगाहेन, ज्ञानी तत्र न दोषभाक् ॥२.३२॥
दारुयन्त्रस्थपाञ्चाली-नृत्यतुल्याः प्रवृत्तयः । योगिनो नैव बाधायै, ज्ञानिनो लोकवर्तिनः ॥२.३३॥
प्रारब्धादृष्टजनिता, सामयिकविवेकतः । क्रियाऽपि ज्ञानिनो व्यक्ता-मौचितीं नाऽतिवर्त्तते ॥२.३४॥
संसारे निवसन् स्वार्थ-सज्जः कज्जलवेश्मनि । लिप्यते निखिलो लोको, ज्ञानसिद्धो न लिप्यते ॥२.३५॥
नाऽहं पुद्गलभावानां, कर्त्ता कारयिता च न । नाऽनुमन्ताऽपि चेत्यात्म-ज्ञानवान् लिप्यते कथम्? ॥२.३६॥
लिप्यते पुद्गलस्कन्धो, न लिप्ये पुद्गलैरहम् । चित्रव्योमाऽञ्जनेनेव, ध्यायन्निति न लिप्यते ॥२.३७॥
लिप्तताज्ञानसम्पात-प्रतिघाताय केवलम् । निर्लेपज्ञानमग्नस्य, क्रिया सर्वोपयुज्यते ॥२.३८॥
तपःश्रुतादिना मत्तः, क्रियावानपि लिप्यते । भावनाज्ञानसम्पन्नो, निष्क्रियोऽपि न लिप्यते ॥२.३९॥
समलं निर्मलं चेद-मिति द्वैतं यदा गतम् । अद्वैतं निर्मलं ब्रह्म , तदैकमवशिष्यते ॥२.४०॥
महासामान्यरूपेऽस्मिन्, मज्जन्ति नयजा भिदाः । समुद्र इव कल्लोलाः, पवनोन्माथनिर्मिताः ॥२.४१॥
षड्द्रव्यैकात्म्यसंस्पर्शि, सत्सामान्यं हि यद्यपि । परस्याऽनुपयोगित्वात्, स्वविश्रान्तं तथापि तत् ॥२.४२॥
नयेन सङ्ग्रहेणैव-मृजुसूत्रोपजीविना । सच्चिदानन्दरूपत्वं, ब्रह्मणो व्यवतिष्ठते ॥२.४३॥

सत्त्वचित्त्वादिधर्माणां, भेदाभेदविचारणे । न चाऽर्थोऽयं विशीर्येत, निर्विकल्पप्रसिद्धितः ॥२.४४॥
योगजानुभवारूढे, सन्मात्रे निर्विकल्पके । विकल्पौघासहिष्णुत्वं, भूषणं न तु दूषणम् ॥२.४५॥
यो ह्याख्यातुमशक्योऽपि, प्रत्याख्यातुं न शक्यते । प्राज्ञैर्न दूषणीयोऽर्थः, स माधुर्यविशेषवत् ॥२.४६॥
कुमारी न यथा वेत्ति, सुखं दयितभोगजम् । न जानाति तथा लोको, योगिनां ज्ञानजं सुखम् ॥२.४७॥
अत्यन्तपक्वबोधाय, समाधिर्निर्विकल्पकः । वाच्योऽयं नाऽर्धविज्ञस्य, तथा चोक्तं परैरपि ॥२.४८॥
''आदौ शमदमप्रायै-र्गुणैः शिष्यं प्रबोधयेत् । पश्चात् 'सर्वमिदं ब्रह्म, शुद्धस्त्व'मिति बोधयेत् ॥२.४९॥
अज्ञस्याऽर्धप्रबुद्धस्य, 'सर्वं ब्रह्मे'ति यो वदेत् । महानरकजालेषु, स तेन विनियोजितः'' ॥२.५०॥
तेनाऽऽदौ शोधयेच्चित्तं, सद्विकल्पैर्व्रतादिभिः । यत् कामादिविकाराणां, प्रतिसङ्ख्याननाश्यता ॥२.५१॥
विकल्परूपा मायेयं, विकल्पेनैव नाश्यते । अवस्थान्तरभेदेन, तथा चोक्तं परैरपि ॥२.५२॥
''अविद्ययैवोत्तमया, स्वात्मनाशोद्यमोत्थया । विद्या सम्प्राप्यते राम!, सर्वदोषापहारिणी ॥२.५३॥
शाम्यति ह्यस्त्रमस्त्रेण, मलेन क्षाल्यते मलः । शमं विषं विषेणैति, रिपुणा हन्यते रिपुः ॥२.५४॥
ईदृशी भूतमायेयं, या स्वनाशेन हर्षदा । न लक्ष्यते स्वभावोऽस्याः, प्रेक्ष्यमाणैव नश्यति'' ॥२.५५॥
व्रतादिः शुभसङ्कल्पो, निर्नाश्याऽशुभवासनाम् । दाह्यं विनैव दहनः, स्वयमेव विनङ्क्ष्यति ॥२.५६॥
इयं नैश्चयिकी शक्ति-र्न प्रवृत्तिर्न वा क्रिया । शुभसङ्कल्पनाशार्थं, योगिनामुपयुज्यते ॥२.५७॥
द्वितीयापूर्वकरणे, क्षायोपशमिका गुणाः । क्षमाद्या अपि यास्यन्ति, स्थास्यन्ति क्षायिकाः परम् ॥२.५८॥
इत्थं यथाबलमनुद्यममुद्यमं च, कुर्वन् दशानुगुणमुत्तममान्तरार्थे ।
चिन्मात्रनिर्भरनिवेशितपक्षपातः, प्रातर्द्युरत्नमिव दीप्तिमुपैति योगी ॥२.५९॥
अभ्यस्यतु प्रविततं व्यवहारमार्गं, प्रज्ञापनीय इह सद्गुरुवाक्यनिष्ठः ।
चिद्दर्पणप्रतिफलत्त्रिजगद्विवर्त्ते, वर्तेत किं पुनरसौ सहजात्मरूपे ॥२.६०॥
भवतु किमपि तत्त्वं बाह्यमाभ्यन्तरं वा, हृदि वितरति साम्यं निर्मलश्चिद्विचारः ।
तदिह निचितपञ्चाचारसञ्चारचारु-स्फुरितपरमभावे पक्षपातोऽधिको नः ॥२.६१॥
स्फुटमपरमभावे नैगमस्तारतम्यं, प्रवदतु न तु हृष्येत् तावता ज्ञानयोगी ।
कलितपरमभावं चिच्चमत्कारसारं, सकलनयविशुद्धं चित्तमेकं प्रमाणम् ॥२.६२॥
हरिरपरनयानां गर्जितैः कुञ्जराणां, सहजविपिनसुप्तो निश्चयो नो बिभेति ।
अपि तु भवति लीलोज्जृम्भिजृम्भोन्मुखेऽस्मिन्, गलितमदभरास्ते नोच्छ्वसन्त्येव भीताः ॥२.६३॥
कलितविविधबाह्यव्यापिकोलाहलौघ-व्युपरमपरमार्थे भावनापावनानाम् ।
क्वचन किमपि शोच्यं नाऽस्ति नैवाऽस्ति मोच्यं, न च किमपि विधेयं नैव गेयं न देयम् ॥२.६४॥
इति सुपरिणताऽऽत्मख्यातिचातुर्यकेलि-र्भवति यतिपतिर्यश्चिद्भरोद्भासिवीर्यः ।
हर-हिमकर-हार-स्फारमन्दार-गङ्गा-रजतकलशशुभ्रा स्यात् तदीया यशःश्रीः ॥२.६५॥

## ३

## क्रियायोगशुद्धिनामाऽधिकारः

यान्येव साधनान्यादौ, गृह्णीयाज्ज्ञानसाधकः । सिद्धयोगस्य तान्येव, लक्षणानि स्वभावतः ॥३.१॥
अत एव जगौ यात्रां, सत्तपोनियमादिषु । यतनां सोमिलप्रश्ने, भगवान् स्वस्य निश्चिताम् ॥३.२॥

अतश्चैव स्थितप्रज्ञ-भावसाधन-लक्षणे । अन्यूना-ऽभ्यधिके प्रोक्ते, योगदृष्ट्या परैरपि ॥३.३॥
नाऽज्ञानिनो विशेष्येत, यथेच्छाचरणे पुनः । ज्ञानी स्वलक्षणाभावात्, तथा चोक्तं परैरपि ॥३.४॥
"बुद्धाद्वैतस्वतत्त्वस्य, यथेच्छाचरणं यदि । शूनां तत्त्वदृशां चैव, को भेदोऽशुचिभक्षणे?" ॥३.५॥
अबुद्धिपूर्विका वृत्ति-र्न दुष्टा तत्र यद्यपि । तथापि योगजादृष्ट-महिम्ना सा न सम्भवेत् ॥३.६॥
निवृत्तमशुभाचारा-च्छुभाचारप्रवृत्तिमत् । स्याद् वा चित्तमुदासीनं, सामायिकवतो मुनेः ॥३.७॥
विधयश्च निषेधाश्च, नन्वज्ञाननियन्त्रिताः । बालस्यैवाऽऽगमे प्रोक्तो, नोद्देशः पश्यकस्य यत् ॥३.८॥
न च सामर्थ्ययोगस्य, युक्तं शास्त्रं नियामकम् । कल्पातीतस्य मर्यादा-ऽप्यस्ति न ज्ञानिनः क्वचित् ॥३.९॥
भावस्य सिद्ध्यसिद्धिभ्यां, यच्चाऽकिञ्चित्करी क्रिया । ज्ञानमेव क्रियामुक्तं, राजयोगस्तदिष्यताम् ॥३.१०॥
मैवं नाऽकेवली पश्यो, नाऽपूर्वकरणं विना । धर्मसंन्यासयोगी चे-त्यन्यस्य नियता क्रिया ॥३.११॥
स्थैर्याधानाय सिद्धस्या-ऽसिद्धस्याऽऽनयनाय च । भावस्यैव क्रिया शान्त-चित्तानामुपयुज्यते ॥३.१२॥
क्रियाविरहितं हन्त!, ज्ञानमात्रमनर्थकम् । गतिं विना पथज्ञोऽपि, नाऽऽप्नोति पुरमीप्सितम् ॥३.१३॥
स्वानुकूलां क्रियां काले, ज्ञानपूर्णोऽप्यपेक्षते । प्रदीपः स्वप्रकाशोऽपि, तैलपूर्त्यादिकं यथा ॥३.१४॥
बाह्यभावं पुरस्कृत्य, येऽक्रिया व्यवहारतः । वदने कवलक्षेपं, विना ते तृप्तिकाङ्क्षिणः ॥३.१५॥
गुणवद्बहुमानादे-र्नित्यस्मृत्या च सत्क्रिया । जातं न पातयेद् भाव-मजातं जनयेदपि ॥३.१६॥
क्षायोपशमिके भावे, या क्रिया क्रियते तया । पतितस्याऽपि तद्भाव-प्रवृद्धिर्जायते पुनः ॥३.१७॥
गुणवृद्ध्यै ततः कुर्यात्, क्रियामस्खलनाय वा । एकं तु संयमस्थानं, जिनानामवतिष्ठते ॥३.१८॥
अज्ञाननाशकत्वेन, ननु ज्ञानं विशिष्यते । न हि रज्जावहिभ्रान्ति-र्गमनेन निवर्तते ॥३.१९॥
सत्यं क्रियाऽऽगमप्रोक्ता, ज्ञानिनोऽप्युपयुज्यते । सञ्चितादृष्टनाशार्थं, नासूरोऽपि यदभ्यधात् ॥३.२०॥
"तण्डुलस्य यथा वर्म, यथा ताम्रस्य कालिका । नश्यति क्रियया पुत्र!, पुरुषस्य तथा मलम् ॥३.२१॥
जीवस्य तण्डुलस्येव, मलं सहजमप्यलम् । नश्यत्येव न सन्देह-स्तस्मादुद्यमवान् भव" ॥३.२२॥
अविद्या च दिदृक्षा च, भवबीजं च वासना । सहजं च मलं चेति, पर्यायाः कर्मणः स्मृताः ॥३.२३॥
ज्ञानिनो नाऽस्त्यदृष्टं चेद्, भस्मसात्कृतकर्मणः । शरीरपातः किं न स्या-ज्जीवनादृष्टनाशतः ॥३.२४॥
शरीरमीश्वरस्येव, विदुषोऽप्यवतिष्ठते । अन्यादृष्टवशेनेति, कश्चिदाह तदक्षमम् ॥३.२५॥
शरीरं विदुषः शिष्या-द्यदृष्टाद् यदि तिष्ठति । तदाऽसुहृददृष्टेन, न नश्येदिति का प्रमा ? ॥३.२६॥
न चोपादाननाशेऽपि, क्षणं कार्यं यथेष्यते । तार्किकैः स्थितिमत् तद्व-च्चिरं विद्वत्तनुस्थितिः ॥३.२७॥
निरुपादानकार्यस्य, क्षणं यत् तार्किकैः स्थितिः । नाशहेत्वन्तराभावा-दिष्टाऽत्र च स दुर्वचः ॥३.२८॥
अन्यादृष्टस्य तत्पात-प्रतिबन्धकतां नयेत् । म्रियमाणोऽपि जीव्येत, शिष्यादृष्टवशाद् गुरुः ॥३.२९॥
स्वभावान्निरुपादानं, यदि विद्वत्तनुस्थितिः । तथापि कालनियमे, तत्र युक्तिर्न विद्यते ॥३.३०॥
उच्छृङ्खलस्य तच्चिन्त्यं, मतं वेदान्तिनो ह्यदः । प्रारब्धादृष्टतः किन्तु, ज्ञेया विद्वत्तनुस्थितिः ॥३.३१॥
तत्प्रारब्धेतरादृष्टं, ज्ञाननाश्यं यदीष्यते । लाघवेन विजातीयं, तन्नाश्यं तत् प्रकल्प्यताम् ॥३.३२॥
इत्थं च ज्ञानिनो ज्ञान-नाश्यकर्मक्षये सति । क्रियैकनाश्यकर्मौघ-क्षयार्थं साऽपि युज्यते ॥३.३३॥
सर्वकर्मक्षये ज्ञान-कर्मणोस्तत् समुच्चयः । अन्योन्यप्रतिबन्धेन, तथा चोक्तं परैरपि ॥३.३४॥
"न यावत् सममभ्यस्तौ, ज्ञान-सत्पुरुषक्रमौ । एकोऽपि नैतयोस्तावत्, पुरुषस्येह सिध्यति" ॥३.३५॥
यथा छाद्मस्थिके ज्ञान-कर्मणी सहकृत्वरे । क्षायिके अपि विज्ञेये, तथैव मतिशालिभिः ॥३.३६॥

सम्प्राप्तकेवलज्ञाना, अपि यज्जिनपुङ्गवाः । क्रियां योगनिरोधाख्यां, कृत्वा सिद्ध्यन्ति नाऽन्यथा ॥३.३७॥
तेन ये क्रियया मुक्ता, ज्ञानमात्राभिमानिनः । ते भ्रष्टा ज्ञान-कर्मभ्यां, नास्तिका नाऽत्र संशयः ॥३.३८॥
ज्ञानोत्पत्तिं समुद्भाव्य, कामादीनन्यदृष्टितः । अपह्नुवानैर्लोकेभ्यो, नास्तिकैर्वञ्चितं जगत् ॥३.३९॥
ज्ञानस्य परिपाकाद्धि, क्रियाऽसङ्गत्वमङ्गति । न तु प्रयाति पार्थक्यं, चन्दनादिव सौरभम् ॥३.४०॥
प्रीति-भक्ति-वचो-ऽसङ्गै-रनुष्ठानं चतुर्विधम् । यत् परैर्योगिभिर्गीतं, तदित्थं युज्यतेऽखिलम् ॥३.४१॥
ज्ञाने चैव क्रियायां च, युगपद्विहितादरः । द्रव्यभावविशुद्धः सन्, प्रयात्येव परं पदम् ॥३.४२॥
क्रियाज्ञानसंयोगविश्रान्तचित्ताः, समुद्भूतनिर्बाधचारित्रवृत्ताः ।
नयोन्मेषनिर्णीतनिःशेषभावा-स्तपःशक्तिलब्धप्रसिद्धप्रभावाः ॥३.४३॥
भयक्रोधमायामदाज्ञाननिद्रा-प्रमादोज्झिताः शुद्धमुद्रा मुनीन्द्राः ।
यशःश्रीसमालिङ्गिता वादिदन्ति-स्मयोच्छेदहर्यक्षतुल्या जयन्ति ॥३.४४॥

## ४

## साम्ययोगशुद्धिनामाऽधिकारः

ज्ञानक्रियाश्वद्वययुक्तसाम्य-रथाधिरूढः शिवमार्गगामी ।
न ग्रामपूःकण्टकजारतीनां, जनोऽनुपानत्क इवाऽर्तिमेति ॥ ४.१ ॥
आत्मप्रवृत्तावतिजागरूकः, परप्रवृत्तौ बधिरान्धमूकः ।
सदा चिदानन्दपदोपयोगी, लोकोत्तरं साम्यमुपैति योगी ॥ ४.२ ॥
परीषहैश्च प्रबलोपसर्ग-योगाच्चलत्येव न साम्ययुक्तः ।
स्थैर्याद् विपर्यासमुपैति जातु, क्षमा न शैलैर्न च सिन्धुनाथैः ॥ ४.३ ॥
इतस्ततो नाऽरतिवह्नियोगा-दुड्डीय गच्छेद् यदि चित्तसूतः ।
साम्यैकसिद्धौषधमूर्छितः सन्, कल्याणसिद्धेर्न तदा विलम्बः ॥ ४.४ ॥
अन्तर्निमग्नः समतासुखाब्धौ, बाह्ये सुखे नो रतिमेति योगी ।
अटत्यटव्यां क इवाऽर्थलुब्धो, गृहे समुत्सर्पति कल्पवृक्षे? ॥ ४.५ ॥
यस्मिन्नविद्यार्पितबाह्यवस्तु-विस्तारजभ्रान्तिरुपैति शान्तिम् ।
तस्मिंश्चिदेकार्णवनिस्तरङ्ग-स्वभावसाम्ये रमते सुबुद्धिः ॥ ४.६ ॥
शुद्धात्मतत्त्वप्रगुणा विमर्शाः, स्पर्शाख्यसंवेदनमादधानाः ।
यदाऽन्यबुद्धिं विनिवर्तयन्ति, तदा समत्वं प्रथतेऽवशिष्टम् ॥ ४.७ ॥
विना समत्वं प्रसरन्ममत्वं, सामायिकं मायिकमेव मन्ये ।
आये समानां सति सद्गुणानां, शुद्धं हि तच्छुद्धनया विदन्ति ॥ ४.८ ॥
निशानभोमन्दिररत्नदीप्र-ज्योतिर्भिरद्योतितपूर्वमन्तः ।
विद्योतते तत् परमात्मतत्त्वं, प्रसृत्वरे साम्यमणिप्रकाशे ॥ ४.९ ॥
एकां विवेकाङ्कुरितां श्रिता यां, निर्वाणमापुर्भरतादिभूपाः ।
सैवर्जुमार्गः समता मुनीना-मन्यस्तु तस्या निखिलः प्रपञ्चः ॥ ४.१० ॥

अल्पेऽपि साधुर्न कषायवह्वा-वह्वाय विश्वासमुपैति भीतः ।
प्रवर्धमानः स दहेद् गुणौघं, साम्याम्बुपूरैर्यदि नाऽपनीतः ॥ ४.११ ॥
प्रारब्धजा ज्ञानवतां कषाया, आभासिका इत्यभिमानमात्रम् ।
नाश्यो हि भावः प्रतिसङ्ख्यया यो, नाऽबोधवत् साम्यरतौ स तिष्ठेत् ॥ ४.१२ ॥
साम्यं विना यस्य तपःक्रियादे-र्निष्ठा प्रतिष्ठार्जनमात्र एव ।
स्वर्धेनु-चिन्तामणि-कामकुम्भान्, करोत्यसौ काणकपर्दमूल्यान् ॥ ४.१३ ॥
ज्ञानी क्रियावान् विरतस्तपस्वी, ध्यानी च मौनी स्थिरदर्शनश्च ।
साधुर्गुणं तं लभते न जातु, प्राप्नोति यं साम्यसमाधिनिष्ठः ॥ ४.१४ ॥
दुर्योधनेनाऽभिहतश्चुकोप, न पाण्डवैर्यो न नुतो जहर्ष ।
स्तुमो भदन्तं दमदन्तमन्तः-समत्ववन्तं मुनिसत्तमं तम् ॥ ४.१५ ॥
यो दह्यमानां मिथिलां निरीक्ष्य, शक्रेण नुन्नोऽपि नमिः पुरीं स्वाम् ।
न मेऽत्र किञ्चिज्ज्वलतीति मेने, साम्येन तेनोरुयशो वितेने ॥ ४.१६ ॥
साम्यप्रसादास्तवपुर्ममत्वाः, सत्त्वाधिकाः स्वं ध्रुवमेव मत्वा ।
न सेहिरेऽर्तिं किमु तीव्रयन्त्र-निष्पीडिताः स्कन्धकसूरिशिष्याः? ॥ ४.१७ ॥
लोकोत्तरं चारुचरित्रमेतन्, मेतार्यसाधोः समतासमाधेः ।
हृदाऽप्यकुप्यन्न यदार्द्रचर्म-बद्धेऽपि मूर्धन्ययमाप तापम् ॥ ४.१८ ॥
जज्वाल नाऽन्तश्च नराधमेन, प्रोज्ज्वालितेऽपि ज्वलनेन मौलौ ।
मौलिर्मुनीनां स न कैर्निषेव्यः, कृष्णानुजन्मा समतामृताब्धिः? ॥ ४.१९ ॥
गङ्गाजले यो न जहौ सुरेण, विद्धोऽपि शूले समतानुवेधम् ।
प्रयागतीर्थोदयकृन्मुनीनां, मान्यः स सूरिस्तनुजोऽन्निकायाः ॥ ४.२० ॥
स्त्री-भ्रूण-गो-ब्राह्मणघातजात-पापादधःपातकृताभिमुख्याः ।
दृढप्रहारिप्रमुखाः क्षणेन, साम्यावलम्बात् पदमुच्चमापुः ॥ ४.२१ ॥
अप्राप्तधर्माऽपि पुरादिमार्हन्-माता शिवं यद् भगवत्यवाप ।
नाऽऽप्नोति पारं वचसोऽनुपाधि-समाधिसाम्यस्य विजृम्भितं तत् ॥ ४.२२ ॥
इति शुभमतिर्मत्वा साम्यप्रभावमनुत्तरं, य इह निरतो नित्यानन्दः कदापि न खिद्यते ।
विगलदखिलाविद्यः पूर्णस्वभावसमृद्धिमान्, स खलु लभते भावारीणां जयेन यशःश्रियम् ॥४.२३॥

✿ ✿ ✿

# परिशिष्टम्-२

## अध्यात्मोपनिषत्प्रकरणस्य श्लोकार्द्धानुक्रमः


| श्लोकार्धः | क्रमाङ्कः | श्लोकार्धः | क्रमाङ्कः |
|---|---|---|---|
| अ | | अन्योन्यप्रतिबन्धेन | ३.३४ उ. |
| अक्षयश्चाऽव्ययश्चास्मि | १.३१ पू. | अपदस्य पदं नाऽस्ति | २.१९ पू. |
| अज्ञप्रलापे सुज्ञानां | १.६४ उ. | अपह्नुवानैर्लोकेभ्यो | ३.३१ उ. |
| अज्ञस्याऽर्धप्रबुद्धस्य | २.५० पू. | अपि तु भवति लीलो- | २.६३ उ. |
| अज्ञाननाशकत्वेन | ३.१९ पू. | अपेक्षाभेदतो हन्त! | १.३७ उ. |
| अटत्यटव्यां क इवा- | ४.५ उ. | अप्राप्तधर्माऽपि पुरा- | ४.२२ पू. |
| अत एव जगौ यात्रां | ३.२ पू. | अबद्धं परमार्थेन | १.५० पू. |
| अतश्चैव स्थितप्रज्ञ- | ३.३ पू. | अबुद्धिपूर्विका वृत्ति- | ३.६ पू. |
| अतीन्द्रियं परं ब्रह्म | २.२१ पू. | अभिप्रेताश्रयेणैष | १.४१ उ. |
| अतीन्द्रियाणामर्थानां | १.९ उ. | अभ्यस्यतु प्रविततं | २.६० पू. |
| अत्यन्तपक्वबोधाय | २.४८ पू. | अर्थकामविमिश्रं यद् | १.२० पू. |
| अद्वैतं निर्मलं ब्रह्म | २.४० उ. | अर्थे महेन्द्रजालस्य | १.६३ पू. |
| अधिगत्याऽखिलं शब्द- | २.२५ पू. | अल्पेऽपि साधुर्न क- | ४.११ पू. |
| अध्यात्मं निर्मलं बाह्य- | १.३ उ. | अवस्थान्तरभेदेन | २.५२ उ. |
| अध्यात्मोपनिषन्नामा | १.१ उ. | अविद्ययैवोत्तमया | २.५३ पू. |
| अनर्थायैव नाऽर्थाय | १.७ पू. | अविद्या च दिदृक्षा च | ३.२३ पू. |
| अनित्यैकान्तपक्षेऽपि | १.५६ पू. | अव्याप्यवृत्तिधर्माणां | १.४० पू. |
| अनेकभूतभावात्मा | १.३१ उ. | आ | |
| अनेकान्तेऽप्यनेकान्ता- | १.४२ पू. | आगमश्चोपपत्तिश्च | १.९ पू. |
| अन्तरा केवलज्ञानं | १.१० पू. | आत्मज्ञाने मुनिर्मग्नः | २.६ पू. |
| अन्तर्निमग्नः समता- | ४.५ पू. | आत्मप्रवृत्तावतिजा- | ४.२ पू. |
| अन्यादृष्टवशेनेति | ३.२५ उ. | आत्मवान् ज्ञानवान् वेद- | २.८ उ. |
| अन्यादृष्टस्य तत्पात- | ३.२९ पू. | आत्मस्वभावनिष्ठानां | २.२६ उ. |
| अन्यार्थं किञ्चिदुत्सृष्टं | १.२३ पू. | आत्मानमधिकृत्य स्याद् | १.२ पू. |
| अन्यूना-ऽभ्यधिके प्रोक्ते | ३.३ उ. | आत्माश्रयादयोऽप्यत्र | १.४३ पू. |

| श्लोकार्धः | क्रमाङ्कः |
|---|---|
| आदौ शमदमप्रायै- | २.४९ पू. |
| आद्यं कोष्ठगबीजाभं | १.६५ उ. |
| आद्यः सालम्बनो नाम | २.१७ पू. |
| आद्ये ज्ञाने मनाक् पुंस- | १.६८ पू. |
| आनन्तर्यं क्षणानां तु | १.५७ पू. |
| आनुषङ्गिकमोक्षार्थं | १.२० उ. |
| आनेकान्त्यान्न कुत्रापि | १.३९ उ. |
| आनैगमान्त्यभेदं तत् | १.४१ पू. |
| आये समानां सति स- | ४.८ उ. |
| आवापोद्वापविश्रान्ति- | २.२७ पू. |
| आस्वादिता सुमधुरा | २.७ पू. |
| **इ** | |
| इच्छंस्ताथागतः प्राज्ञो | १.४६ उ. |
| इच्छन् प्रधानं सत्त्वाद्यै- | १.४५ पू. |
| इतस्ततो नाऽरति- | ४.४ पू. |
| इति यतिवदनात् | १.७५ पू. |
| इति शुभमतिर्मत्वा | ४.२३ पू. |
| इति सुपरिणताऽऽ- | २.६५ पू. |
| इतिश्रुतिरपि व्यक्त- | २.२० उ. |
| इत्थं च ज्ञानिनो ज्ञान- | ३.३३ पू. |
| इत्थं च संशयत्वं स- | १.३५ पू. |
| इत्थं यथाबलमनु- | २.५९ पू. |
| इयं नैश्चयिकी शक्ति- | २.५७ पू. |
| **ई** | |
| ईदृशी भूतमायेयं | २.५५ पू. |
| **उ** | |
| उच्छृङ्खलस्य तच्चिन्त्यं | ३.३१ पू. |
| उत्पन्नं दधिभावेन | १.४४ पू. |
| उपाधिमात्रव्यावृत्त्या | २.१९ उ. |
| **ए** | |
| एकं तु संयमस्थानं | ३.१८ उ. |
| एकक्षेत्रावगाहेन | २.३२ उ. |
| एकदेशेन चैकत्व- | १.३४ पू. |
| एकां विवेकाङ्कुरितां | ४.१० पू. |
| एकाधिकारा दृश्यन्ते | १.१८ उ. |
| एकोऽपि नैतयोस्ताव- | ३.३५ उ. |
| एतदुक्तं समासेन | २.१२ उ. |
| एनं केचित् समापत्तिं | १.१५ पू. |
| एवम्भूतनये ज्ञेयः | १.४ पू. |
| **ऐ** | |
| ऐदम्पर्यगतं यच्च | १.६७ पू. |
| ऐन्द्रवृन्दनतं नत्वा | १.१ पू. |
| **क** | |
| कथं लिपिमयी दृष्टि- | २.२३ उ. |
| कथं विप्रतिषिद्धानां | १.३७ पू. |
| कर्मणां निरवद्यानां | १.२८ पू. |
| कर्मोपाधिकृतान् भावा- | २.२९ पू. |
| कलितपरमभावं | २.६२ उ. |
| कलितविविधबाह्य- | २.६४ पू. |
| कल्पनाशिल्पविश्रान्ते- | २.२४ उ. |
| कल्पातीतस्य मर्यादा- | ३.९ उ. |
| कायिकाद्यपि कुर्वीत | १.२२ पू. |
| कालेनैतावता प्राज्ञैः | १.८ उ. |
| कुमारी न यथा वेत्ति- | २.४७ पू. |
| कृत्ये ज्यायसि किं वाच्य- | १.२२ उ. |
| केषां न कल्पनादर्वी | २.२२ पू. |
| क्रियाऽपि ज्ञानिनो व्यक्ता- | २.३४ उ. |
| क्रियां योगनिरोधाख्यां | ३.३७ उ. |
| क्रियाज्ञानसंयोगवि- | ३.४३ पू. |
| क्रियाविरहितं हन्त | ३.१३ पू. |
| क्रियैकनाश्यकर्मौघ- | ३.३३ उ. |
| क्वचन किमपि शोच्यं | २.६४ उ. |

| श्लोकार्धः | क्रमाङ्कः |
|---|---|
| क्ष | |
| क्षमाद्या अपि यास्यन्ति | २.५८ उ. |
| क्षायिके अपि विज्ञेये | ३.३६ उ. |
| क्षायोपशमिके भावे | ३.१७ पू. |
| ग | |
| गङ्गाजले यो न जहौ | ४.२० पू. |
| गतिं विना पथज्ञोऽपि | ३.१३ उ. |
| गलन्नयकृतभ्रान्ति- | १.५ पू. |
| गुणवद्बहुमानादे- | ३.१६ पू. |
| गुणवृद्ध्यै ततः कुर्यात् | ३.१८ पू. |
| गुणस्थानानि यावन्ति | २.२८ पू. |
| गुरुर्ज्ञानं वदन्नेकं | १.४८ उ. |
| गोरसत्वात् स्थिरं जातं | १.४४ उ. |
| भ | |
| चर्मचक्षुर्भृतः सर्वे | १.१६ पू. |
| चारिसञ्जीविनीचार- | १.६९ पू. |
| चित्रमेकमनेकं च | १.४७ पू. |
| चित्रव्योमाऽञ्जनेनेवं | २.३७ उ. |
| चिद्दर्पणप्रतिफ- | २.६० उ. |
| चिन्मात्रनिर्भरनिवे- | २.५९ उ. |
| चिन्मात्रलक्षणेनाऽन्य- | २.१५ पू. |
| छ | |
| छायाया दर्पणाभावे | २.१७ उ. |
| ज | |
| जज्वाल नाऽन्तश्च न- | ४.१९ पू. |
| जातं न पातयेद् भावं- | ३.१६ उ. |
| जातिव्यक्त्यात्मकं वस्तु | १.४९ पू. |
| जीवस्य तण्डुलस्येव | ३.२२ पू. |
| ज्ञ | |
| ज्ञानक्रियाश्वद्वययु- | ४.१ पू. |
| ज्ञानमग्नस्य यच्छर्म | २.१३ पू. |

| श्लोकार्धः | क्रमाङ्कः |
|---|---|
| ज्ञानमेव क्रियामुक्तं | ३.१० उ. |
| ज्ञानयोगं प्रयुञ्जीत | २.१ उ. |
| ज्ञानयोगो मुनेः पार्श्व- | २.३ उ. |
| ज्ञानस्य परिपाकाद्धि | ३.४० पू. |
| ज्ञानिनो नाऽस्त्यदृष्टं चेत् | ३.२४ पू. |
| ज्ञानी क्रियावान् विर- | ४.१४ पू. |
| ज्ञानी स्वलक्षणाभावा- | ३.४ उ. |
| ज्ञाने चैव क्रियायां च | ३.४२ पू. |
| ज्ञानोत्पत्तिं समुद्भाव्य | ३.३९ पू. |
| ज्ञायेरन् हेतुवादेन | १.८ पू. |
| त | |
| तण्डुलस्य यथा वर्म | ३.२१ पू. |
| तत्त्वतो ब्रह्मणः शास्त्रं | २.४ पू. |
| तत्त्वान्तं नैव गच्छन्ति | १.७४ उ. |
| तत्प्रारब्धेतरादृष्टं | ३.३२ पू. |
| तथा वस्तुनि वस्त्वंश- | १.३३ उ. |
| तथा वस्तुनि वस्त्वंश- | १.३४ उ. |
| तथा व्यवहरत्यज्ञ- | २.३१ उ. |
| तथापि कालनियमे | ३.३० उ. |
| तथापि योगजादृष्ट- | ३.६ उ. |
| तदन्यतरसंश्लेषो | २.२८ उ. |
| तदपास्तं द्वयालम्बः | १.३५ उ. |
| तदाऽसुहृददृष्टेन | ३.२६ उ. |
| तदिह निचितपञ्चा- | २.६१ उ. |
| तदेव तापशुद्धं स्या- | १.५३ उ. |
| तद् द्वितीयं जले तैल- | १.६६ उ. |
| तद् रूपं परसंश्लिष्टं- | २.१८ उ. |
| तद्दृष्ट्यैव हि माध्यस्थ्यं- | १.६० उ. |
| तपःश्रुतादिना मत्तः | २.३९ पू. |
| तस्मिंश्चिदेकार्णवनि- | ४.६ उ. |
| तस्याऽनेकान्तवादस्य- | १.६१ उ. |

| श्लोकार्धः | क्रमाङ्कः |
|---|---|
| तात्पर्यश्यामिका न स्या- | १.२९ उ. |
| तामाकर्षति पुच्छेन | १.६ उ. |
| तार्किकैः स्थितिमत् त- | ३.२७ उ. |
| तृतीयं तदशुद्धोच्च- | १.६७ उ. |
| ते भ्रष्टा ज्ञान-कर्मभ्यां | ३.३८ उ. |
| ते हि प्रमाणसिद्धार्था- | १.४३ उ. |
| तेजोलेश्याविवृद्धिर्या | २.१४ पू. |
| तेन ये क्रियया मुक्ता | ३.३८ पू. |
| तेन स्याद्वादमालम्ब्य | १.७० पू. |
| तेन स्वाभाविकं रूपं | २.२९ उ. |
| तेनाऽऽत्मदर्शनाकाङ्क्षी | २.५ पू. |
| तेनाऽऽदौ शोधयेच्चित्तं | २.५१ पू. |
| तेनाऽनेकान्तसूत्रं यद् | १.५३ पू. |
| त्रिविधं ज्ञानमाख्यातं | १.६५ पू. |
| **द** | |
| दारुयन्त्रस्थपाञ्चाली- | २.३३ पू. |
| दाहस्येव न सद्वैद्यै- | १.२४ उ. |
| दाह्यं विनैव दहनः | २.५६ उ. |
| दिशा दर्शितया शास्त्रै- | २.१ पू. |
| दुर्योधनेनाऽभिह- | ४.१५ पू. |
| दुर्विधिप्रतिषेधं त- | १.२३ उ. |
| दूषयेदज्ञ एवोच्चैः | १.६४ पू. |
| दृढप्रहारिप्रमुखाः | ४.२१ उ. |
| द्रव्यभावविशुद्धः स- | ३.४२ उ. |
| द्रव्यार्थादहमेकोऽस्मि | १.३० उ. |
| द्रष्टुर्दृगात्मता मुक्ति- | २.५ उ. |
| द्वयोरेकत्वबुद्ध्याऽपि | १.३२ पू. |
| द्वितीयापूर्वकरणे | २.५८ पू. |
| द्वितीये न भवत्येष | १.६८ उ. |
| **ध** | |
| धर्मसंन्यासयोगी चे- | ३.११ उ. |
| **न** | |
| न ग्रामपूःकण्टकजा- | ४.१ उ. |
| न च सामर्थ्ययोगस्य | ३.९ पू. |
| न चाऽदृष्टात्मतत्त्व- | २.४ उ. |
| न चाऽनेकान्तार्थाव- | १.७६ पू. |
| न चाऽर्थोऽयं विशी- | २.४४ उ. |
| न चोपादाननाशेऽ- | ३.२७ पू. |
| न जानाति तथा लोको | २.४७ उ. |
| न तु प्रयाति पार्थक्यं | ३.४० उ. |
| न त्यजेन्न च गृह्णीया- | २.९ उ. |
| न मेऽत्र किञ्चिज्ज्वल- | ४.१६ उ. |
| न यावत् सममभ्यस्तौ | ३.३५ पू. |
| न लक्ष्यते स्वभावोऽस्या | २.५५ उ. |
| न लगत्येव तच्चेतो | २.७ उ. |
| न सुषुप्तिरमोहत्वा- | २.२४ पू. |
| न सेहिरेऽर्तिं किमु | ४.१७ उ. |
| न हि तेनाऽपि सङ्क्लिष्ट | १.५८ उ. |
| न हि रज्जावहिभ्रान्ति- | ३.१९ उ. |
| नयसूक्ष्मेक्षिकाप्रान्ते | १.४२ उ. |
| नयेन सङ्ग्रहेणैव | २.४३ पू. |
| नयैकान्तधियाऽप्येवं | १.३२ उ. |
| नयोन्मेषनिर्णीतनिः- | ३.४३ उ. |
| नश्यति क्रियया पुत्र! | ३.२१ उ. |
| नश्यत्येव न सन्देह- | ३.२२ उ. |
| नाऽऽप्नोति पारं वच- | ४.२२ उ. |
| नाऽज्ञानिनो विशेष्येत | ३.४ पू. |
| नाऽनुमन्ताऽपि चेत्यात्म- | २.३६ उ. |
| नाऽपि ततः परावृत्ति- | १.४० उ. |
| नाऽहं पुद्गलभावानां | २.३६ पू. |
| नाशहेत्वन्तराभावा- | ३.२८ उ. |
| नाश्यो हि भावः प्रतिस- | ४.१२ उ. |

| श्लोकार्धः | क्रमाङ्कः |
|---|---|
| नित्यानित्याद्यनेकान्त- | १.३८ उ. |
| नित्यानित्याद्यनेकान्त- | १.६० पू. |
| नित्यैकान्ते न हिंसादि | १.५४ पू. |
| निरुपादानकार्यस्य | ३.२८ पू. |
| निर्लेपज्ञानमग्नस्य | २.३८ उ. |
| निवृत्तमशुभाचारा- | ३.७ पू. |
| निशानभोमन्दिरर- | ४.९ पू. |
| निषिद्धस्य विधानेऽपि | १.२४ पू. |
| नोपमेयं प्रियाश्लेषै- | २.१३ उ. |
| **प** | |
| पण्डितानां तु संसारः | १.७२ उ. |
| पतितस्याऽपि तद्भाव- | ३.१७ उ. |
| पदमात्रं हि नाऽन्वेति | २.३ पू. |
| परलोकात्ममोक्षेषु | १.५२ उ. |
| परस्याऽनुपयोगित्वा- | २.४२ उ. |
| परीक्षन्ते कषच्छेद- | १.१७ पू. |
| परीषहैश्च प्रबलो- | ४.३ पू. |
| पश्चात् सर्वमिदं ब्रह्म- | २.४९ उ. |
| पश्यतु ब्रह्म निर्द्वन्द्वं | २.२३ पू. |
| पुत्रदारादि संसारो | १.७२ पू. |
| पुरस्कृते पुनस्तस्मि- | १.१४ उ. |
| प्रकाशशक्त्या यद्रूप- | २.११ पू. |
| प्रतिक्षिपेयुर्नो वेदाः | १.५१ उ. |
| प्रतीयते यदश्रान्तं | २.१५ उ. |
| प्रत्यक्षं मितिमात्रंशे | १.४८ पू. |
| प्रदलितदुरितः क्ष- | १.७५ उ. |
| प्रदीपः स्वप्रकाशोऽपि | ३.१४ उ. |
| प्रयागतीर्थोदयकृ- | ४.२० उ. |
| प्रवर्धमानः स देहे- | ४.११ उ. |
| प्रशान्तवाहितामन्ये | १.१५ उ. |
| प्राज्ञैर्न दूषणीयोऽर्थः | २.४६ उ. |

| श्लोकार्धः | क्रमाङ्कः |
|---|---|
| प्रारब्धजा ज्ञानवतां | ४.१२ पू. |
| प्रारब्धादृष्टजनिता | २.३४ पू. |
| प्रारब्धादृष्टतः किन्तु | ३.३१ उ. |
| प्रीति-भक्ति-वचो-ऽसङ्गैः | ३.४१ पू. |
| **ब** | |
| बालस्यैवाऽऽगमे प्रोक्तो | ३.८ उ. |
| बाह्यभावं पुरस्कृत्य | ३.१५ पू. |
| बुद्धाद्वैतस्वतत्त्वस्य | ३.५ पू. |
| बुद्धिलेपोऽपि को नित्य- | १.५५ पू. |
| बुवाणो ब्रह्म वेदान्ती | १.५० उ. |
| ब्रह्मयज्ञ इतीच्छन्तः | १.२६ उ. |
| ब्रुवाणा भिन्नभिन्नार्था- | १.५१ पू. |
| **भ** | |
| भट्टो वाऽपि मुरारिर्वा- | १.४९ उ. |
| भयक्रोधमायामदा- | ३.४४ पू. |
| भवतु किमपि तत्त्वं | २.६१ पू. |
| भावनाज्ञानसम्पन्नो | २.३९ उ. |
| भावस्य सिद्ध्यसिद्धिभ्यां | ३.१० पू. |
| भावस्यैव क्रिया शान्त- | ३.१२ उ. |
| भाषिता भगवत्यादौ | २.१४ उ. |
| भिन्नात्मदर्शकाः शेषा | १.२७ उ. |
| भिन्नापेक्षा यथैकत्र | १.३८ पू. |
| भूत्यर्थं तद्विधानेऽपि | १.२५ उ. |
| भृशं धीरोदात्तप्रिय- | १.७७ उ. |
| भौतहन्तुर्यथा तस्य | १.११ उ. |
| **म** | |
| मनःसंयोगनाशादौ | १.५४ उ. |
| मनोवत्सो युक्तिगवीं | १.६ पू. |
| मनोवाक्काययोगानां | १.५९ पू. |
| महानरकजालेषु | २.५० उ. |
| महावाक्यार्थजं यत्तु | १.६६ पू. |

| श्लोकार्धः | क्रमाङ्कः |
|---|---|
| महासामान्यरूपेऽस्मिन् | २.४१ पू. |
| महेन्द्रजालवद् वेत्ति | २.६ उ. |
| माध्यस्थ्यमेव शास्त्रार्थो | १.७१ पू. |
| माध्यस्थ्यसहितं ह्येक- | १.७३ पू. |
| मुषितत्वं यथा पान्थ- | २.३१ पू. |
| मैवं नाऽकेवली पश्यो | ३.११ पू. |
| मोक्षोद्देशाविशेषेण | १.७० उ. |
| मौलिर्मुनीनां स न कै- | ४.१९ उ. |
| म्रियमाणोऽपि जीव्येत | ३.२९ उ. |
| **य** | |
| यतनां सोमिलप्रश्ने | ३.२ उ. |
| यतो वाचो निवर्तन्ते | २.२० पू. |
| यत् कामादिविकाराणां | २.५१ उ. |
| यत् परैर्योगिभिर्गीतं | ३.४१ उ. |
| यत्र सर्वनयालम्बि- | १.२९ पू. |
| यथा छाद्मस्थिके ज्ञान- | ३.३६ पू. |
| यथा जनानां माध्यस्थ्यं | १.६३ उ. |
| यथा भृत्यैः कृतं युद्धं | २.३० पू. |
| यथाऽऽह सोमिलप्रश्ने | १.३० पू. |
| यथायथं द्वितीयोऽर्थो | १.४ उ. |
| यदाऽन्यबुद्धिं विनि- | ४.७ उ. |
| यद् दृश्यं यच्च निर्वाच्यं | २.१८ पू. |
| यशःश्रीसमालिङ्गिता | ३.४४ उ. |
| यस्तद्वाक्येष्वनाश्वास- | १.१३ उ. |
| यस्मिन्नविद्यार्पितबा- | ४.६ पू. |
| यस्य सर्वेषु समता | १.६१ पू. |
| यान्येव साधनान्यादौ | ३.१ पू. |
| ये पर्यायेषु निरता | २.२६ पू. |
| यो दह्यमानां मिथिलां | ४.१६ पू. |
| यो ह्याख्यातुमशक्योऽपि | २.४६ पू. |
| योगजादृष्टजनितः | २.२ पू. |
| योगजानुभवारूढे | २.४५ पू. |
| योगारम्भदशास्थस्य | २.१० पू. |
| योगिनो नैव बाधायै | २.३३ उ. |
| योगो वैशेषिको वाऽपि | १.४७ उ. |
| **र** | |
| रागद्वेषौ कथं तस्य | १.६२ उ. |
| रूढ्यर्थनिपुणास्त्वाहु- | १.३ पू. |
| **ल** | |
| लाघवेन विजातीयं | ३.३२ उ. |
| लिप्तताज्ञानसम्पात- | २.३८ पू. |
| लिप्यते निखिलो लोको | २.३५ उ. |
| लिप्यते पुद्गलस्कन्धो | २.३७ पू. |
| लोकोत्तरं चारुचरि- | ४.१८ पू. |
| **व** | |
| वचनं वीतरागस्य | १.१२ उ. |
| वदने कवलक्षेपं | ३.१५ उ. |
| वर्ण्यते यत्र सर्वत्र | १.२१ उ. |
| वाच्योऽयं नाऽर्धविज्ञस्य | २.४८ उ. |
| वादांश्च प्रतिवादांश्च | १.७४ पू. |
| विकल्परूपा मायेयं | २.५२ पू. |
| विकल्पौघासहिष्णुत्वं | २.४५ उ. |
| विगलदखिलाविद्यः | ४.२३ उ. |
| विज्ञानस्यैकमाकारं | १.४६ पू. |
| विद्या सम्प्राप्यते राम! | २.५३ उ. |
| विद्योतते तत् पर- | ४.९ उ. |
| विधयः प्रतिषेधाश्च | १.१८ पू. |
| विधयश्च निषेधाश्च | ३.८ पू. |
| विधीनां च निषेधानां | १.२१ पू. |
| विना समत्वं प्रसर- | ४.८ पू. |
| विमतिः सम्मतिर्वाऽपि | १.५२ पू. |
| विरलास्तद्रसास्वाद- | २.२२ उ. |

| श्लोकार्धः | क्रमाङ्कः |
|---|---|
| विरोधे दुर्नयव्राताः | १.३६ उ. |
| विशेषादर्शनात् त- | १.५७ उ. |
| विशेषादोघाद् वा स- | १.७७ पू. |
| विषयान् साधकः पूर्व- | २.९ पू. |
| वीतरागोऽनृतं नैव | १.१३ पू. |
| वेदान्तविधिशेषत्व- | १.२७ पू. |
| वेदोक्तत्वान्मनःशुद्ध्या | १.२६ पू. |
| व्यापके सत्यनेकान्ते | १.३९ पू. |
| व्रतादिः शुभसङ्कल्पो | २.५६ पू. |
| **श** | |
| शब्दयोगार्थनिपुणा- | १.२ उ. |
| शमं विषं विषेणैति | २.५४ उ. |
| शरीरं विदुषः शिष्या- | ३.२६ पू. |
| शरीरपातः किं न स्या- | ३.२४ उ. |
| शरीरमीश्वरस्येव | ३.२५ पू. |
| शाम्यति ह्यस्त्रमस्त्रेण | २.५४ पू. |
| शासनात् त्राणशक्ते- | १.१२ पू. |
| शास्त्रकोटिर्वृथैवाऽन्या | १.७३ उ. |
| शास्त्रयुक्तिशतेनाऽपि | २.२१ उ. |
| शास्त्रे पुरस्कृते तस्मा- | १.१४ पू. |
| शास्त्रेऽपि वर्णिकाशुद्धि | १.१७ उ. |
| शुद्धात्मतत्त्वप्रगुणा | ४.७ पू. |
| शुद्धात्मन्यविवेकेन | २.३० उ. |
| शुद्धानुभवसंवेद्यं | २.२७ उ. |
| शुद्धोञ्छाद्यपि शास्त्राज्ञा- | १.११ पू. |
| शुद्धोपयोगरूपस्तु | २.१६ उ. |
| शुभसङ्कल्पनाशार्थं | २.५७ उ. |
| शुभोपयोगरूपोऽयं | २.१६ पू. |
| शूनां तत्त्वदृशां चैव | ३.५ उ. |
| **ष** | |
| षड्द्रव्यैकात्म्यसंस्पर्शि | २.४२ पू. |
| **स** | |
| स एव धर्मवादः स्या- | १.७१ उ. |
| संसारे निवसन् स्वार्थं | २.३५ पू. |
| सङ्क्लेशेन विशेषश्चे- | १.५८ पू. |
| सच्चिदानन्दरूपत्वं | २.४३ उ. |
| सञ्चितादृष्टनाशार्थं | ३.२० उ. |
| सत्तत्त्वचिन्तया यस्या- | २.८ पू. |
| सत्त्वचित्त्वादिधर्माणां | २.४४ पू. |
| सत्यं क्रियाऽऽगमप्रोक्ता | ३.२० पू. |
| सदा चिदानन्दपदो- | ४.२ उ. |
| सन्ध्येव दिन-रात्रिभ्यां | २.२ उ. |
| समग्रैव विशीर्येते- | १.५९ उ. |
| समलं निर्मलं चेद- | २.४० पू. |
| समाधेरव्यक्ताद् य- | १.७६ उ. |
| समुद्र इव कल्लोलाः | २.४१ उ. |
| सम्प्राप्तकेवलज्ञाना | ३.३७ पू. |
| सर्वं परवशं दुःखं | २.१२ पू. |
| सर्वकर्मक्षये ज्ञान- | ३.३४ पू. |
| सर्वतश्चक्षुषः सिद्धा | १.१६ उ. |
| सर्वत्रैव हिता वृत्ति- | १.६९ उ. |
| सहजं च मलं चेति | ३.२३ उ. |
| साङ्ख्यः सङ्ख्यावतां मुख्यो | १.४५ उ. |
| साङ्ख्याचार्या अपीच्छन्ती- | १.२८ उ. |
| साधुर्गुणं तं लभते | ४.१४ उ. |
| सामग्र्येण द्वयालम्बे | १.३६ पू. |
| सामग्र्येण न मानं स्या- | १.३३ पू. |
| सामानाधिकरण्येन | १.५५ उ. |
| साम्यं विना यस्य तपः- | ४.१३ पू. |
| साम्यप्रसादास्तवपु- | ४.१७ पू. |
| साम्यैकसिद्धौषधमू- | ४.४ उ. |
| सिद्धयोगस्य तान्येव | ३.१ उ. |

| श्लोकार्धः | क्रमाङ्कः |
|---|---|
| सिद्धान्तेषु यथा ध्याना- | १.१९ पू. |
| सुखं स्वरूपविश्रान्ति- | २.११ उ. |
| सुखमन्तर्बहिर्दुःखं | २.१० उ. |
| सैवर्जुमार्गः समता | ४.१० उ. |
| स्तुमो भदन्तं दमद- | ४.१५ उ. |
| स्त्री-भ्रूण-गो-ब्राह्मणघा- | ४.२१ पू. |
| स्थैर्याद् विपर्यासमु- | ४.३ उ. |
| स्थैर्याधानाय सिद्धस्या- | ३.१२ पू. |
| स्फुटमपरमभावे | २.६२ पू. |
| स्याद् वा चित्तमुदासीनं | ३.७ उ. |
| स्याद्वादविशदालोकः | १.५ उ. |
| स्वत एव समायान्ति | २.३२ पू. |
| स्वतन्त्रास्तु नयास्तस्य | १.६२ पू. |
| स्वतो विनाशशीलानां | १.५६ उ. |
| स्वभावान्निरुपादानं | ३.३० पू. |
| स्वर्धेनु-चिन्तामणि-का- | ४.१३ उ. |
| स्वसंवेद्यं परं ब्रह्म- | २.२५ उ. |
| स्वानुकूलां क्रियां काले | ३.१४ पू. |
| **ह** | |
| हर-हिमकर-हार- | २.६५ उ. |
| हरिरपरनयानां | २.६३ पू. |
| हस्तस्पर्शसमं शास्त्र- | १.१० उ. |
| हस्ती हन्तीति वचने | १.७ उ. |
| हिंसा भावकृतो दोषो | १.२५ पू. |
| हिंसादीनां निषेधाश्च | १.१९ उ. |
| हृदाऽप्यकुप्यन्न य- | ४.१८ उ. |

# परिशिष्टम्-३

## अध्यात्मोपनिषद्वृत्तौ चर्चिता विषयविशेषाः


| विषयः | पृष्ठम् |
| --- | --- |
| 'योगाद् रूढिर्बलीयसी'ति न्यायस्य तात्पर्यम् | २ |
| सङ्ग्रहादिनयेषु अध्यात्मार्थाभावकारणानि | ३ |
| अध्यात्मपदस्य रूढ्यर्थप्रदर्शकश्लोके यथास्थितासत्तिसमाश्रयणा-ऽसमाश्रयणविचारः | ३-४ |
| प्रमाणेनाऽध्यात्मस्वरूपम् | ५ |
| आगमोपपत्तिभ्यामेव सम्पूर्णदृष्टित्वसम्भवः | ७ |
| छद्मस्थानां सम्पूर्णदृष्टित्वेम् | ८ |
| सप्तभङ्गीवाक्यस्य समूहालम्बनज्ञानात्मकता | १५ |
| चित्ररूपस्यैकत्वा-ऽनेकत्वे | २० |
| प्रभाकरभते ज्ञानस्य स्वप्रकाशत्वम् | २१ |
| स्याद्वादस्य सार्वतान्त्रिकत्वम् | २२ |
| श्रुतज्ञानस्य कोष्ठगबीजाभत्वम् | २८ |
| चिन्ताज्ञानस्य वैशिष्ट्यम् | २८ |
| भावनाज्ञानस्य स्वरूपम् | २९ |
| ब्रह्मणः सद्रूपत्वम् | ४९ |
| अतिरिक्तसत्ताया अर्थक्रियाकारित्वाभावः | ४९ |
| शशशृङ्गादेः प्रत्याख्यानत्वसम्भवः | ५२ |
| अविद्यायाः स्वनाशकत्वम् | ५५ |
| क्रियाज्ञानोभयाभ्यासिनो योगिनो वर्णना | ७८-७९ |

# परिशिष्टम्-४

## अध्यात्मोपनिषत्प्रकरणे सवृत्तावुद्धरणानि


| उद्धरणम् | पृष्ठम् |
|---|---|
| ● अज्ञस्याऽर्धप्रबुद्धस्य... | ५३ |
| अज्ञानसलिलावसिक्ता... | ७६ |
| अवश्यमेव भोक्तव्यं... | ७३ |
| ● अविद्ययैवोत्तमया... | ५५ |
| असङ्गो ह्ययं पुरुषः | ७६ |
| अस्ति भाति प्रियं नाम... | ५० |
| आग्रही बत निनीषति... | ६ |
| ● आदौ शमदमप्रायै... | ५३ |
| ● ईदृशी भूतमायेयं... | ५५ |
| ऊर्ध्वरेता भवेत् प्राज्ञः | ३६ |
| एकमेवाऽद्वितीयं ब्रह्म... | २२,५०,५४ |
| चित्तमेव हि संसारो... | ३ |
| ● जीवस्य तण्डुलस्येव... | ७० |
| ज्ञानाग्निः सर्वकर्माणि... | ७०, ७३ |
| ज्ञानिनोऽज्ञानिनश्चाऽत्र... | ४५ |
| ● तण्डुलस्य यथा वर्म... | ६९ |
| दुःखेष्वनुद्विग्नमनाः... | ६४ |
| ध्यातृध्याने परित्यज्य | ३९ |
| ● न यावत् सममभ्यस्तौ... | ७४ |
| नाऽभुक्तं क्षीयते कर्म... | ७३ |
| नाऽयं वस्तु न चाऽवस्तु... | ४ |
| पक्षपातो न मे वीरे... | ६ |
| परित्राणाय साधूनां... | ७१ |
| प्रजहाति यदा कामान्... | ६४ |
| प्रमाणनयैरधिगमः | ५० |
| बुद्धाद्वैतसतत्त्वस्य... | ६५ |
| मा हिंस्यात् सर्वभूतानि | ११ |
| मार्गे गन्त्रोर्द्वयोर्भ्रान्तौ... | ४५ |
| यः सर्वत्राऽनभिस्नेह... | ६४ |
| यदा यदा हि धर्मस्य... | ७१ |
| यदा संहरते चाऽयं... | ६४ |
| ● वादांश्च प्रतिवादांश्च... | ३१ |
| वायव्यं श्वेतं छागमाल... | ११ |
| वृत्तयस्तु तदानीम० | ३९ |
| वृत्तीनामनुवृत्तिस्तु | ३९ |
| व्यावर्त्याभाववत्तैव... | ५२ |
| ● शाम्यति ह्यस्त्रमस्त्रेण... | ५५ |
| सत्त्वं लघु प्रकाशकमिष्ट... | १९ |
| सत्यं ज्ञानमनन्तं ब्रह्म | २२ |
| सदेव सौम्येदमग्र आसीत्... | २२ |
| सप्तभङ्गीनयो न प्रमाणम् | १५ |
| स्थितप्रज्ञस्य का भाषा... | ६४ |
| स्याद्वादकेवलज्ञाने... | ५ |


● चिह्नितानि मूलप्रकरणस्थानि ।

# परिशिष्टम्-५

## अध्यात्मोपनिषत्प्रकरण-सवृत्तिगत-विशेषनामसूचिः


| नाम | पृष्ठम् | नाम | पृष्ठम् |
|---|---|---|---|
| ईश्वरकृष्णः | १९ | भगवती | ३८ |
| उत्तरमीमांसा | ६५ | महावीरः ( भगवान्, जिनः ) | १३, ६३, ६४ |
| कुमारिलभट्टः ( भट्टः ) | २०, २१ | मीमांसकः | २० |
| चार्वाकः | २२ | मुरारिमिश्रः ( मुरारिः ) | २०, २१ |
| दीधितिकारः | १५ | योगवासिष्ठः | ५५ |
| नासूरः | ६९ | योगविंशिकावृत्तिः | ७७ |
| नैयायिकः ( योगः, तार्किकः ) | २०, ७१, ७२ | योगाचार्याः | ३२ |
| पञ्चदशीकृत् | ६५ | वेदः ( श्रुतिः ) | २२, ४१ |
| प्रभाकरः ( गुरुः ) | २० | वेदान्ती | १२, २२, ७२, ७३ |
| बुद्धः ( सुगतः ) | २४ | वैशेषिकः | २० |
| बृहस्पतिः | २३ | साङ्ख्यः | १९, २४ |
| बौद्धः ( ताथागतः ) | १९, २४ | हरिभद्रसूरिः | ६ |


❁ ❁ ❁

# परिशिष्टम्-६

## अध्यात्मोपनिषत्प्रकरणगत-दृष्टान्ताः


| दृष्टान्तः | श्लोकः | दृष्टान्तः | श्लोकः |
|---|---|---|---|
| अन्निकापुत्रसूरिः | ४.२० | भरतः | ४.१० |
| गजसुकुमालः | ४.१९ | भृत्यकृतयुद्धम् | २.३० |
| चिलातिपुत्रः | १.७५ | भौतहन्ता | १.११ |
| तिलपीलकः ( -बलीवर्दः ) | १.७४ | मरुदेवामाता | ४.२२ |
| दमदन्तमुनिः | ४.१५ | महेन्द्रजालम् | १.६३ |
| दृढप्रहारी | ४.२१ | मेतार्यमुनिः | ४.१८ |
| नमिराजः | ४.१६ | सोमिलः | १.३०, ३.२ |
| पथज्ञगतिः | ३.१३ | स्कन्धकसूरिशिष्याः | ४.१७ |
| पान्थमोषणम् | २.३१ | हस्तिहततार्किकः | १.७ |
| प्रदीपस्य तैलाद्यपेक्षणम् | ३.१४ | | |


❁ ❁ ❁

# परिशिष्टम्-७

## अध्यात्मोपनिषत्प्रकरणे सवृत्तौ विशिष्टा व्याख्याः

**अत्यन्तपक्वबोधः** - हिताहितविचारप्रवणत्वेनोहापोहसमर्थत्वेन च कषच्छेदतापादिपरिकर्मिततया च परिनिष्ठितो बोधः (२.४८ वृ●.)

**अध्यात्मभाजनत्वम्** - नयाभासकृतभ्रान्तिराहित्ये सति विश्रान्तिसाम्मुख्ये सति स्याद्वादविशदालोकत्वम् (१.५)

**अध्यात्मम्** - आत्मानमधिकृत्य जायमानं पञ्चाचारपालनम् (१.२*) / मैत्र्यादिवासितं बाह्यव्यवहारोपबृंहितं निर्मलं चित्तम् (१.३)

**अनालम्बनत्वम्** - ध्येयस्वरूपव्यतिरिक्तध्यातृध्यानाविषयकत्वम् (२.१७ वृ.)

**अन्यसमयस्थितत्वम्** - आत्मनः पर्यायेषु निरतत्वम् (२.२६)

**अर्धविज्ञत्वम्** - स्वमनोऽभिलषितमात्रस्य दुषत्वादुष्टत्वादिविमर्शनराहित्येनाऽवगमनम् (तन्नाम सम्पूर्णस्य शास्त्रस्य यथावदनवगमनम्) (२.४८ वृ.)

**आनन्दत्वम्** - परप्रेमानास्पदत्वाभावः (२.४४ वृ.)

**आवापः** - स्वधर्मस्य कल्पनारूपान्वयः (२.२७ वृ.)

**उत्तमं ज्ञानम्** - नैरन्तर्येण चिन्मात्रलक्षणेनाऽऽत्मनोऽन्यव्यतिरिक्तत्वबोधः

**उद्वापः** - अन्यधर्मप्रतिक्षेपरूपव्यतिरेकः (२.२७ वृ.)

**कषशुद्धिः** - एकोद्देशेन प्रवृत्तानां विधीनां निषेधानां चोपवर्णनम् (१.१८)

**कषशुद्ध्यभावः** - गौणीकृतमोक्ष-प्रधानीकृतार्थकामाधिकारत्वे सति काल्पनिककथोद्बोधप्रवणविधिनिषेध-गुम्फितत्वम् (१.२०)

**चित्त्वम्** - अस्वप्रकाशत्वाभावः (२.४४ वृ.)

**चिन्ताज्ञानम्** - जलतैलबिन्दुसदृशं सूक्ष्मयुक्तिशतान्वितं महावाक्यार्थजं ज्ञानम् (१.६६)

**छेदशुद्धिः** - विधिनिषेधानां योगक्षेमयोः सम्पादिकायाः क्रियाया वर्णनम् (१.२१)

**छेदशुद्ध्यभावः** - अन्यार्थकस्य सामान्यशास्त्रविषयस्याऽन्यार्थकेन विशेषशास्त्रविषयेन कृतेन प्रच्यावनेन युक्तत्वम् (१.२३)

**ज्ञानम्** - वस्तुप्रकाशनसामर्थ्योपेतमात्मरूपम् (२.११)

**ज्ञानयोगः** - योगजादृष्टजनितः प्रातिभज्ञानसञ्ज्ञितः केवल-श्रुतयोः पृथग् ज्ञानविशेषः (२.२)

**तापशुद्धिः** - सर्वनयालम्बिविचारैस्तात्पर्यापरिशुद्ध्यभावः (१.२९)

**दमः** - बाह्येन्द्रियनिग्रहः (२.४९ वृ.)

**दुःखम्** - स्वरूपविश्रान्त्यभावलक्षणमात्मनोऽस्वस्थत्वम् (२.११ वृ.) / परवशं सर्वम् (२.१२)

**धर्मवादः** - माध्यस्थ्यपर्यवसितः शास्त्रार्थः (१.७१)

---

★ श्लोकक्रमाङ्कोऽयम् । ● वृ. = वृत्तिः ।

नयात्मकं सूत्रम् - स्वाभिमतधर्मातिरिक्तधर्मावबोधने गजनिमीलिकामवलम्बमानं सत् स्याद्वाद-प्रतिपन्नानन्तधर्मात्मकवस्त्वेकदेशावबोधनप्रवणं सूत्रम् (१.५३ वृ.)
निर्मलत्वम् - भावनाज्ञानसम्पन्नत्वेन रागद्वेषविमुक्तान्तःकरणत्वम् (२.४० वृ.)
परमात्मस्वरूपम् - अशुद्धनयकृतयोरावापोद्वापयोर्विश्रान्त्यात्मिका शुद्धानुभवसंवेद्या स्थितिः (२.२७)
बुद्धिलेपः (साङ्ख्यमते) - बुद्ध्या भेदाग्रहनिबन्धन-तत्प्रतिबिम्बताप्रयुक्त-तद्धर्मकर्तृत्वाद्यभिमानः (१.५५ वृ.)
बुधः - पक्षपातरहितः स्वपरसिद्धान्ताभिज्ञो मध्यस्थः (१.१७ वृ.)
ब्रह्मयज्ञत्वम् - मनःशुद्धिद्वारा ब्रह्मज्ञानाङ्गत्वम् (१.२६ वृ.)
भावनाज्ञानम् - ऐदम्पर्यगतं विधिनिषेधयोर्यत्नवदशुद्धोच्चजात्यरत्नविभानिभं ज्ञानम् (१.६७)
महावाक्यत्वम् - निराकाङ्क्षप्रतिपत्तिजनकवाक्यत्वम् (१.६६ वृ.)
मुनिः - मुक्तिमार्गमननशीलो मुमुक्षुः (२.३ वृ.)
वर्णिकाशुद्धिः - विधिनिषेधोपवर्णनशुद्धिः (१.१७ वृ.)
वीतरागपुरस्कारः - वीतरागप्रणीतशास्त्रस्य प्रमाणत्वेन स्वीकारः तदाज्ञापालनं च (१.१४)
शब्दब्रह्म - शब्देनोल्लिख्यमानस्वरूपत्वाच्छब्दतया व्यवसितं जीवाजीवादितत्त्वं स्वात्मना जगत एव क्रोडीकृतत्वाद् ब्रह्म (२.२५ वृ.)
शमः - अन्तःकरणस्यैकत्र विषयेऽवस्थापनम् (२.४९ वृ.)
शास्त्रपुरस्कारः - शास्त्रं प्रमाणीकृत्य तद्विधिबोधितहिताचरणं तन्निषिद्धाहितानाचरणं च (१.१४ वृ.)
शास्त्रम् - शासनकर्तृ त्राणशक्तिसमन्वितं वचनम् (१.१२)
शास्त्रवित्त्वम् - स्याद्वादमालम्ब्य मोक्षोद्देशाविशेषेण सर्वदर्शनतुल्यतादर्शनम् (१.७०)
शुद्धोपयोगः - ध्यातृध्येयध्यायानां पृथगनवभासात्मकः चिन्मात्रस्वरूपात्ममात्रावलम्बनावबोधरूपो निर्विकल्पकः समाधिः (२.१६)
शुभोपयोगः - ध्यातृध्येयध्यानानां पृथगवभासात्मकः सविकल्पकः समाधिः (२.१६)
श्रुतज्ञानम् - कोष्ठगबीजाभं वाक्यार्थविषयकं ज्ञानम् (१.६५)
सत्त्वम् - बाध्यत्वाभावः (२.४४ वृ.)
समता - पक्षपाताराहित्येन माध्यस्थ्यम् (१.६१ वृ.)
समलत्वम् - पौद्गलिकभावानां स्वात्मगततयाऽऽकलनेन रागद्वेषादिपरिभूतान्तःकरणत्वम् (२.४० वृ.)
सम्पूर्णदृष्टिः - आगमोपपत्त्युभयजन्यबोधः (१.९)
सार्वतान्त्रिकत्वम् - सर्वतन्त्रमध्यस्थत्वम् (१.५१ वृ.)
सालम्बनत्वम् - ध्येयस्वरूपव्यतिरिक्ततया ध्यातृध्यानविषयकत्वम् (२.१७ वृ.)
सुखम् - शुद्धात्मस्वभावमात्रावस्थानम् (२.११) / आत्मवशं सर्वम् (२.१२)
स्याद्वादः - अपेक्षावचनात्मकनयभेदाश्रयणम् (१.५१ वृ.)
स्वसमयस्थितत्वम् - आत्मस्वभावे निष्ठत्वम् (२.२६)
हिंसा - घात्यजीवानां पूर्वपर्यायविनाशनम् (१.५४ वृ.)

## शासनसम्राट्-शताब्दीग्रन्थमाला

**पुष्पम् १ सप्तभङ्गीप्रभा**

कर्ता - श्रीविजयनेमिसूरिः सं. - कीर्तित्रयी

**पुष्पम् २ न्यायसिन्धुः**

कर्ता - श्रीविजयनेमिसूरिः सं. - कीर्तित्रयी

**पुष्पम् ३ जैनतर्कभाषा-सवृत्तिद्वयम्**

कर्ता - उपा.श्रीयशोविजयः

वृत्तिकर्ता - श्रीविजयोदयसूरिः, पं.श्रीसुखलालजी संघवी

सं. - मुनिश्रीत्रैलोक्यमण्डनविजयः

**पुष्पम् ४ पर्युषणपर्वकल्पलता पर्युषणपर्वकल्पप्रभा च**

कर्ता - श्रीविजयदर्शनसूरिः

सं. - मुनिश्रीत्रैलोक्यमण्डनविजयः

**पुष्पम् ५ स्तोत्रग्रन्थसमुच्चयः ( षण्णां स्तोत्रग्रन्थानां सङ्ग्रहः )**

कर्ता - मुनिश्रीयशोविजयः, पं.श्रीप्रतापविजयः,
श्रीविजयनन्दनसूरिः, श्रीविजयपद्मसूरिश्च

सं. - मुनिश्रीत्रैलोक्यमण्डनविजयः

KIRIT GRAPHICS : 9898490091